Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्रीस्तोत्ररत्नाकरद्वितीयभागः सटीकः ।

श्रीजिनवल्लभसूरिकृतेन प्रश्नोत्तरैकषष्टिशतेन श्रीजयतिलकसूरिकृतैश्चतुर्हारावलीचित्रस्तवैः, पूर्वसूरिविहितप्रश्नावल्या, श्रीपार्श्वचन्द्रकविकृतमहावीरस्तोत्रेण श्रीवर्द्धमानस्तोत्रद्वयेन श्रीपार्श्वजिनस्तोत्रषट्केन संगृहीतः श्रीनेमिस्तवेन विहरमाणस्तवेन एकाक्षरविचित्रकाव्येन षट्श्लोकीचतुःश्लोकीस्तुतिभ्यां च मिलितः ।

प्रसिद्धकर्त्री—श्रीयशोविजयजैनसंस्कृतपाठशाला—म्हेसाणा

इदं पुस्तकं शाह वेणिचन्द सुरचन्द, सेक्रेटरी श्रीजैनसंस्कृतपाठशाला इत्यनेन

निर्णयसागरमुद्रणालये कोलभाटवीथ्यां २३ तमे गृहे रामचंद्र यशवन्त शेडगेद्वारा मुद्रयित्वा प्रकाशितम्

प्रति ५००. All Rights Reserved. Price Annas.

वीरसंवत् २४४० विक्रमसंवत् १९७० ईस्वी १९१४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# उपोद्घातः ।

## वन्दे वीरम्

सुधारसतिरस्कारिणा साहित्यरसेन आत्मबलं परिपोष्य परिपोष्य परमकाष्ठां सम्पादनीयमित्येतत्सिद्धान्ते अन्यसाहित्यदिदृक्षोपशमनपरिपोषणयोरभ्युपायतया, कृतितत्कर्तृगौरवप्रख्यापनैकबीजतया च अलब्धव्यावहारिकरूपत्वात् स्वल्पप्रचारां शास्त्रमात्राधारां भूयिष्ठसिद्धान्तरत्नगर्भां आर्यावर्तीयप्राचीनार्वाचीनबहुसंख्यकदार्शनिकसंख्यावत्सत्कृतां, देशान्तरीयैरपि विद्वद्भिः समादृतां कोमलालापां श्रुतिप्रियां शब्दसंक्षेपेऽपि गम्भीरार्थां कामदुघाकल्पां, गीर्वाणगिरं कोषवर्धनद्वारा समुपासितुकामतया च वाचनाध्ययनमननादिभिः सर्वोऽपि वाचकवर्गः शब्दरचनार्थयोजनागोचरव्युत्पत्तिभाग् भवतु इति धिया च शब्दार्थतदुभयालङ्कारैरलङ्कृतान् रमणीयार्थान् कतिपयान् पुरातनेदानीन्तनग्रन्थान् यथासंभवटीकानुवादकलितान् मुद्रयित्वा प्रकाशपथमानेतुं धृतहस्तकार्यभाराः वयं यथाशक्ति प्रयतामहे। श्रीमन्त इव तदितरेऽपि बद्धसाहित्यप्रेमाणः साहित्यविनोदात् वञ्चिता मा भूवन् इतिविचार्य स्वल्पमूल्यता निर्मूल्यता च व्यवस्थापिता वर्तते ॥

भिन्नभिन्नाचार्यप्रणीतभक्तिरसमूर्त्तिभूतानेकस्तोत्रसङ्ग्रहरूपे स्तोत्ररत्नाकरद्वितीयभागनामधेये अस्मिन् पुस्तकरत्ने यानि यावन्ति यादृंशि च स्तोत्राणि सङ्गृहीतानि सन्ति तानि सर्वाण्यपि सादरं विलोकन्तां प्रेक्षावन्तो वाचका इत्यतोऽधिकं किञ्चिदपि नतरां समीहामहे । अस्मिन् स्तोत्रसङ्ग्रहद्वितीयभागनामके पुस्तके स्वोपज्ञटीकोपेतः चैत्यवासीयश्रीजिनेश्वरसूरिशिष्यश्रीमदभयदेवपादच्छात्रखरतरगच्छीयश्रीमज्जिनवल्लभसूरिप्रणीतः प्रश्नोत्तरैकषष्टिशतकनामकः ग्रन्थः प्रथमतया निवेशितश्चकास्ति, यदीयास्सर्वेऽपि श्लोकाः प्रश्नमयास्सन्ति, उत्तराणि तु टीकायां संक्षेपेण एकैकस्मिन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पदे योजितानि, तानि च पदानि शृङ्खलाकमलादिचित्रालङ्कारचित्रितचित्रकाव्यरूपाणि सन्ति। तानि तानि च सर्वाणि चित्राणि ग्रन्थादौ दृष्टिपथमायास्यन्ति। निभालनीयं निष्णातानां नितरामत्र प्रान्ते श्रीमद्भिरेव ख्यापितं श्रीमदभयदेवगुरोर्विद्यार्थित्वमात्रं शिष्यत्वं तु श्रीजिनेश्वराणामिति। एवमागमिकगच्छीयश्रीजयतिलकसूरिविनिर्मितः स्वोपज्ञटीकासंवलितः चतुर्हारावलीचित्रस्तवः द्वितीयतया स्थापितोऽस्ति, यस्मिन् अतीतानागतवर्तमानविहरमाणशाश्वतजिनानां चतस्रश्चतुर्विंशतिका विद्यन्ते, प्रत्येकं श्लोके च द्वयोर्द्वयोस्तीर्थकृतोरतिभक्तिभरेण चमत्कारकारिणी स्तुतिरकारि, पादचतुष्टयाद्यन्ताक्षरग्रहणेन पुनः स्तूयमानयोराद्यन्तयोः प्रभ्वोर्नाम्नी अपि अभिव्यज्येते। तथा पूर्वसूरिविरचिता प्रश्नावलिः स्वोपज्ञावचूरिशालिनी तृतीयतया प्रनिवेशिता, मौलिकं वस्तु नाममात्रादेव स्पष्टं उत्तराणि पुनस्सविशेषतया द्वादशाक्षर्यामेव गुम्फितानि, तदर्थः पुनः क्लिष्टतया स्वयमेव स्फारितोऽस्ति। तथा आदिपदव्यपदेश्यं गयरायंस्तोत्रं सावचूरिकं चतुर्थतया न्यधायि, तच्च संस्कृतव्याख्याभागि प्राकृतमयं यमकपदसंनिवेशितं बहु रमणीयमस्ति। तथा पूर्णिमागच्छीयश्रीभावप्रभकृतटीकाकलितं श्रीपार्श्वचन्द्रग्रथितं महावीरस्तोत्रं पञ्चमतया स्थिरीकृतं वरीवर्त्ति, तत्पुनः सारस्वतसंज्ञाधिकारसूत्रसंकलितपदमयं समस्ति। तथागयकलहादिपदतया गयकलहनामकं महावीरस्तोत्रं प्राकृतमयं संस्कृतावचूरिशालितं षष्ठतया, सटीकं पुनः नेमिजिनस्तोत्रं नमरूपनिजद्व्यक्षरमात्रखचितं सप्तमतया, टीकासंटङ्कितं पार्श्वजिनसमस्यामयं स्तोत्रं पुनरष्टमतया, टीकासंयुक्तं एकाक्षरविचित्रकाव्यं यदीयस्य एकैकस्य काव्यस्य अरनाथब्रह्मविष्णुमहेश्वरपराः चत्वारोऽर्थाः समुल्लसन्ति तत् नवमतया, टीकासहिता द्विस्वरत्रिव्यञ्जनाश्रिता श्रीमद्भगवत्स्तुतिरूपा षट्श्लोकी पुनर्दशमतया, यमकालङ्कारमयी तीर्थकरस्तुतिभूता सटीका चतुःश्लोकी पुनरेकादशतया च संकलितास्सन्ति। तथा श्रीमच्चारित्रोदयवाचनाऽऽचार्यविनेयश्रीसूरचन्द्रउपनिबद्धः सटीकः श्रीवर्द्धमानजिनस्तवः श्रीफलवर्द्धिपार्श्वनाथजिनस्तवश्च द्वादशत्रयोदशतया विनिहितोऽस्ति। तथा श्रीपार्श्वजिनस्तवत्रयी टीका-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहचरिता चतुर्दशतया, विहरमाणजिनस्तुतिश्च पञ्चदशतया प्रापितस्थाना विद्यते, तदेवं संस्कृतव्युत्पित्सूनां विद्याप्रेम्णां भूयःसमुपकारं जनयितुमलंभवन्तः लघवो लघुतराश्च किन्तु प्रचुराश्चर्यजनकशब्दसंघटनप्रकारार्थयोजनक्रमाभ्यामतिरुचिराः ग्रन्थाः सङ्गृह्य संशोध्य प्राकाश्यं नीयन्ते । मुद्रणसंशोधनप्रमादाद्यायातं दूषणं यदि कश्चिदपि विपश्चित् सूचयिष्यति तदा द्वितीयस्यामावृत्तौ तन्निराकृत्य मुद्रणं कारयिष्यते ।

अस्य ग्रन्थस्य मुद्रणे पुस्तकप्रदानेन मुनिश्रीभक्तिविजया यन्त्रालयप्रेषणोचितपुस्तकादर्शनिरीक्षणेन मुनिश्रीकल्याणविजयाः महत्प्रशस्यं च साहाय्यकं दत्त्वा मुनिपदसमुचितं ज्ञानार्चनं बहुमानपुरस्सरं कृतवन्तस्ते अस्मान् सततमुपकृतिपथे निवेशयन्तेतराम् ।

निवेदकाः—प्रसिद्धकर्तारः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





# श्रीस्तोत्ररत्नाकरस्यानुक्रमणिका ।


| नामवर्गः | पत्राङ्कः |
|---|---|
| उपोद्घातः | १ |
| जातिचक्रादियन्त्राणि | ७ |
| १ श्रीजिनवल्लभसूरिकृतप्रश्नशतम् | १ |
| २ श्रीजयतिलकसूरिकृतचतुर्हारावलिचित्रस्तवः | ३४–५४ |
| १ वर्तमानजिनचतुर्विंशतिका | ३४ |
| २ अतीतजिनचतुर्विंशतिका | ४१ |
| ३ अनागतजिनचतुर्विंशतिका | ४६ |
| ४ विहरमाणशाश्वतजिनस्तुतिः | ५१ |
| ३ प्रश्नावलिः | ५५ |
| ४ गयरायस्तवः | ५९ |
| ५ श्रीपार्श्वचन्द्रकृतं महावीरस्तवनम् भावप्रभविरचितटीकासहितम् | ६१ |
| ६ श्रीगयकलहंमहावीरस्तवः | ६५ |

| नामवर्गः | पत्राङ्कः |
|---|---|
| ७ श्रीनेमिजिनस्तवः | ६७ |
| ८ श्रीसमस्यामयपार्श्वजिनस्तवः | ६९ |
| ९ एकाक्षरविचित्रकाव्यम् | ७३ |
| १० द्विस्वरत्रिव्यञ्जनयुक्तषट्श्लोकी | ७६ |
| ११ चतुःश्लोकीस्तुतिः | ७७ |
| १२ श्रीवर्द्धमानजिनस्तवः ( निर्वर्ग्यः ) | ७९ |
| १३ श्रीफलवर्द्धिपार्श्वजिनस्तवः | ८० |
| १४ श्रीपार्श्वजिनस्तवः ( वरसंवरसं ) | ८४ |
| १५ श्रीपार्श्वजिनलघुस्तवः | ८६ |
| १६ श्रीशङ्खेश्वरपार्श्वजिनस्तवः | ८८ |
| १७ श्रीविहरमाणविंशतिजिनस्तवः | ८९ |




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ प्रश्नैकषष्टिशतकान्तर्गत जातिचक्र संग्रहः ॥

श्लोक ६




शृंखलाजातिः

श्लोक १० मन्थानजातिः




श्लोक १२ मन्थानजातिः




श्लोक १४ अष्टदलकमलम्




श्लोक २० विपरीतमष्टदलकं




For Private And Personal Use Only

जाति-चक्र ॥७॥




संग्रहः

॥७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लोक ५८-५९ षोडशदलं कमलं विपरीतं युगलस्थापनम्
कजाक्षी वाचास्मान हहसहसा चुक्षुभदरे ।




श्लोक ६१ मन्थानजातिः




श्लोक ६३ शृंखलाजातिः




श्लोक ६९ मन्थानान्तरजातिः




श्लोक ७१ शृंखलाजातिः




श्लोक ७४ मन्थानान्तरजातिः




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir







श्लोक ७७-७८




षोडशदलं कमलं विपरीतं

श्लोक ११८




अष्टदलं विपरीतं कमलं

श्लोक १३२




मन्थानजातिः

श्लोक १३३




मन्थानजातिः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्लोक १३८




मन्थानजातिः

श्लोक १३९




मन्थानजातिः

श्लोक १४३




मन्थानान्तरजातिः

श्लोक १४५




पद्मजातिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाति-चक्र ॥१॥

टीकान्तरे – मन्थानान्तरजातिः




श्लोक १४७ पद्मजातिः




श्लोक १५२ मन्थानजातिः




श्लोक १५४ मन्थानान्तरजातिः




संग्रहः

॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## चतुर्हारावली चित्रस्तवान्तर्गत जातिचक्रम्.

प्रथम हारावली श्लोक १३ पद्मजातिः




द्वितीय हारावली श्लोक १३ स्वस्तिक जातिः




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जाति-चक्र ॥१०॥

तृतीय हारावली श्लोक १३ वज्रबन्ध विचित्र जातिः




चतुर्थ हारावली श्लोक १३ बन्धुक स्वस्तिकचित्र स्थापना.




संग्रहः

॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनवल्लभसूरिविरचितम् ॥

# ॥ प्रश्नशतम् ॥

॥ सावचूरिकम् ॥

स्वस्तिश्रीपार्श्वमानम्य, धनकान्तिविराजितम् । पङ्कमातङ्गपञ्चास्यं, नमामि पुण्यभास्करम् ॥ १ ॥

क्रमनखदशकोटीदीप्रदीप्तिप्रतानै-र्दशविधतनुभाजामुज्ज्वलं मोक्षमार्गम् ।
पृथगिव विदिशन्तं पार्श्वमानम्य सम्यक्, कतिचिदबुधबुद्ध्यै वच्म्यहं प्रश्नभेदान् ॥१॥

अवचूरिः—अहं श्रीजिनवल्लभसूरिः, कतिचित्प्रश्नभेदान्, वच्मि कथयिष्यामि । वर्तमानायां भविष्यतीरूपं । किं कृत्वा ? पार्श्वं पार्श्वनाथमानम्य सम्यक् नत्वा । कथं ? सम्यक् चारु यथा स्यात्तथा । किं कुर्वन्तं पार्श्वं ? दशविध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तनुभाजां भवनपतिव्यन्तरज्योतिष्कवैमानिकदेवैस्तिर्यङ्मनुष्याणां पुंस्त्रीनपुंसकरूपाणा पृथग्भेदानामुज्ज्वलं निर्मलं, मोक्षमार्गं मुक्तिपथं पृथगिव भिन्नमिव विदिशन्तं प्रकाशयन्तं । कैः कृत्वा ? क्रम० क्रमाणां चरणानां नखाः क्रमनखाः, दश च ते क्रमनखाश्च, तेषां कोटी अग्रं, दीप्राणि च तानि दीप्तीनां प्रतानानि क्रम० तैः कृत्वेत्यर्थः । क्रमाणामित्यत्र बहुवचनं पूज्यत्वसूचकं । यथा कल्याणमन्दिरस्तोत्रे—'यद्यस्ति नाथ भवदङ्घ्रिसरोरुहाणां' इतिवचनात् तीर्थकृतां पादाः सर्वेषां पूजनीया इति भावः । इति प्रथमश्लोकार्थः ॥ १ ॥

कीदृग्वपुस्तनुभृता?[1]मथ शिल्पिशिक्य–देहानुदाहरति काध्वनिरत्र कीदृक्[2] ?।
काश्चारुचन् समवसृत्यवनौ भवाम्बु–मध्यप्रपातिजनतोद्धृतिरज्जुरूपाः[3] ?॥ २ ॥

अव०—"जिनदन्तरुचेयः" ।[3] तनुभृतां शरीरिणां वपुः शरीरं कीदृक् स्यात् ? जिनत्, हानिं गच्छत् । ज्या हानौ धातुः । शतृ प्र० नाविकरणे गृहिज्यावयीत्यादिना ( ४-१-७१ ज्याव्येव्यधिव्यचिव्यथेरिः ) संप्रसारणं । तद्दीर्घेत्यादिना ( ४-१-१०३ दीर्घमवोऽन्त्यम् ) दीर्घत्वं । प्वादीत्यादिना ( ४-२-१०५ प्वादेर्ह्रस्वः ) ह्रस्वत्वं । क्यादीत्यादिना ( ४-३-९४ इडेत्पुसि चातो लुक् ) आकारलोपः । रुश्च चश्च यश्च रुचयाः तेऽन्ते यस्य काध्वनेः । ततो यथाक्रमं कारु काच काय इति भवति । अर्हद्दशनदीप्तयः ॥ २ ॥ ॥ १ ॥

१ कारुः शिल्पी, काचः शिक्यं, कायो देहः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सश्रीकं यः कुरुते स कीदृ–गित्याह जलचरविशेषः ?।
अप्सु ब्रुडन् किमिच्छति, कीदृक्कामी च किं वाञ्छेत् ? ॥ ३ ॥

अव०—"समुद्रतरणं" सह मया लक्ष्म्या वर्तत इति समः, तं करोतीति णिज् । ततः क्विप् सम् । उद्रः कश्चिज्जलचरजीवविशेषः, हे* उद्र । तरणं प्लवनं। सह मुदा हर्षेण वर्तते यः स समुत् कामी । रते मोहने रणं युद्धं रतरणम् ॥३॥

कीदृक् पुष्पमलिव्रजो न भजते?वर्षासु केषां गति–र्न स्यादध्वनि ?कं श्रितश्च कुरुते कोकं सशोकं रविः ?।
लङ्केशस्य किल स्वसारमकरोद्रामानुजःकीदृशीं?, केषां वा न मनो मुदे मृगदृशः शृङ्गारलीलास्पृशः ?॥४॥

अव०—"अपरागमनसां" द्विर्व्यस्तसमस्तजातिः । न विद्यते परागः किञ्जल्को यस्मिंस्तदपरागं । अनसां शकटानां । अपरस्यां दिशि योऽगः पर्वतः सोऽपरागस्तं । अनसां नासारहितां न विद्यते नासा यस्याः सा । नासिकाया नस् बहुव्रीहौ आप् च । अपगतो रागो मनसि चित्ते येषां, अपगतरागं मनो येषां इति वा तेऽपरागमनसस्तेषां ॥ ४ ॥

प्रभविष्णुविष्णुजिष्णुनि, युद्धे कर्णस्य कीदृगभिसन्धिः ? ।
नकुलकुलसंकुलभुवि, प्रायः स्यात्कीदृगहिनिवहः ? ॥ ५ ॥

* जलचरविशेषः प्रश्नं कुरुते सश्रीकं यः कुरुते स कीदृक् इति, तत्र जलचरामन्त्रणेन प्रश्नोत्तरं वाच्यं यथा–हे उद्र! जलचरविशेष इति टीकान्तरम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"विलसदनरतः[२]" द्विः समस्तः। अः विष्णुः, नरः अर्जुनः, अश्च नरश्च अनरौ, विलसन्तौ च तौ अनरौ च विलसदनरौ, तौ तस्यति (स्यामि) क्षयं नयती (यामी) ति, धातुत्वान्न दीर्घः। वि (बि) लसदनरतः छिं[+]द्रगृहासक्तः॥५॥

ब्रूतो ब्रह्मस्मरौ[१] के रणशिरसि जितौ[२]ः ? केन जेत्रा[३]ह विद्वा[४]न्– ?
नुद्यानं स्यान्न कीदृग्जं[५]लधिजलमहो कीदृशं स्यान्न गम्यम् ? ।
को मां वक्त्याह कृ[६]ष्णः ? क्व सति पटु वचः ? स्यादु[७]तः केन वृद्धि–
स्याज्यं कीदृक् तडागं[८] ? नतिमति लघुका किं करोत्युत्कटं किं[९]म्[१०] ?॥६॥

अव०—"वीराज्ञा विनुदति पापं" शृङ्खला जातिः ( वी[१]-वीरा[२]-राज्ञा[३]-ज्ञावि[४]-विनु[५]-नुद[६]-दति[७]-तिपा[८]-ऽपापम्[९]। १०) उश्च इश्च वी हे वीं[*]। वीराः सुभटाः। केन जेत्रा ? राज्ञा भूपेन। जानातीति ज्ञः हे ज्ञ। न विद्यन्ते वयः पक्षिणो यत्र तत् अवि उद्यानं न भवति। विगता नौर्त्रेटिका यत्र तत् विनु। नौतीति नुत्, हे अ विष्णो, यस्त्वां नौति स वक्ति। दति दशने सति पटुवचनो भवतीत्यर्थः। दन्तस्य दत् इति दत्। तिपा तिप्प्रत्ययेन उतो वृद्धिरित्यादिना ( ४-३-५९ उत

---

+ बिलगृहनिवासी। * ब्रह्मकामौ पृच्छां कुरुतः केन जेत्रा रणसीम्नि के जिता इति, उत्तरं ब्रह्मकामामन्त्रणपूर्वं वाच्यं हे वी राज्ञा वीराः, उर्ब्रह्मा इः कामः ततो द्वन्द्वे वी, एवमन्यत्रापि ब्रूते पृच्छति अप्राक्षीत् प्राहेत्यादिषु पृच्छाकर्तृसंबोधनपूर्वमेवोत्तरं देयं इति टीकान्तरम्।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

और्विति० )। अपगता आपः पानीयानि यत्र तत् पापं, वष्टीत्यादिनाऽलोपः (वष्टि भागुरिरल्लोपमवाप्योः उपसर्गयोः ) वीराज्ञा विनुदति पापं श्रीमहावीरस्याज्ञा पापं विनुदति प्रेरयति ॥ ६ ॥

**दृष्ट्वा राहुमुखग्रस्य–मानमिन्दुं किमाह तद्दयिता ?। असुमेतिपदं कीदृ–कामं लक्ष्मीं च बोधयति? ॥७॥**

अव०"अवत [1]मसं"[2] ।अवत रक्षत मसं चन्द्रं । उश्च अश्च तश्च मश्च सश्च वतमसाः, न विद्यन्ते वतमसा यत्र तत् अवतमसं, ततो[+] हे ए काम ! हे इ लक्ष्मि ! इति भवति ॥ ७ ॥

**कमभिसरति लक्ष्मीः[1] ? किं सरागैरजय्यं[2] ?, सकलमलविमुक्तं कीदृशं ज्ञानमुक्तम्[3] ?।**
**सततरतविमर्दे निर्दये बद्धबुद्धिः, किमभिलषति कान्ता ? किं च चक्रे हनूमान्[5] ? ॥ ८ ॥**

अव०—"अक्षरणं" ( अं-[1]अक्षं-अक्ष[2]रं-अक्षर[4]णं-अक्षरणं[5] ) चलद्बिन्दुजातिः । अं विष्णुं । अक्षं इन्द्रियं । अक्षरं न क्षरति न चलतीत्यक्षरं केवलज्ञानमित्यर्थः । अक्षरणं वीर्याच्युतिं । अक्षेण रावणसुतेन रणं सङ्ग्रामं, अक्षैः पाशकैर्वा रणं दावलक्षणं ॥ ८ ॥

**भूरापृच्छति किल चक्रवाकमेषोऽपि भूमिमप्राक्षीत् । पीतांशुकं किमकरोत्कुत्र ? क नु मादृशां वासः? ॥९॥**

+ असुमेतिपदात् व ( उअ ) तमसापहारे 'ए इ' इत्यवशिष्टम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—“कोकनदे” ( को ऽकनत्-ए १ कोक नदे २ ) द्विर्गतजातिः । हे* को पृथिवि । अकनत् अशोभत् । ए विष्णौ । हे कोक चक्रवाक! नदे ह्रदे । कनै दीप्तिकान्तिगतिषु ॥ ९ ॥

हरिरतिरमा यूयं कान् किं कुरुध्वमदोऽक्षरं[1]?, किमपि वदति भ्रेजे गीतश्रियापि च कीदृशां[2]?।
जिनमतजुषां का स्यादस्मिन् कियच्चिरमङ्गिनां[3]?, गतशुभधियां का स्यात् कुत्राभियोगविधायिनाम्[4]? ॥१०॥

अव०—“[2]यानतां[1]म स, समतानेया[2], विभुता सदा[3], दासता भुवि[4]” मन्थानजातिः । ईश्च इश्च अश्च याः तान् । अताम गच्छाम । हे स । अदोऽक्षरं । हरिः ईं लक्ष्मीं, रतिः इं कामं, लक्ष्मीः अं विष्णुं यातीत्यर्थः । समः तानो यस्यां सा समताना तया । विभुता नायकत्वं । सदा सर्वकालं । दासता कर्मकरत्वं । भुवि पृथिव्याम् ॥ १० ॥

प्रतिवादिद्विरदभिदे गुरुणेह किमक्रियन्त के कस्य[1]? । उरशब्दः कल्याणदबलहिमश्रृङ्गान् वदति कीदृक्[2]? ११

अव०—“आदिश्यन्त रवविशिखा नुः” [1-2]व्यस्तसमस्तजातिः । आदिश्यन्त आदिष्टाः, रवविशिखाः शब्दबाणाः, नुः पुरुषस्य । न विद्यते उर्यत्र सः अनुः । आदौ शिः, अन्तरे मध्ये वश्च विश्च शिश्च खश्च यस्य स चासौ अनुश्च स तथा । ततः शिवरः शिविरः शिशिरः शिखरः ॥ ११ ॥

---

* भूश्चक्रवाकमापृच्छति—पीतांशुकं कुत्र किमकरोदिति । सोऽपि भूमिं पृच्छति स्म, मादृशां क वास इति । अत्रोत्तरं ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरति क इह कीदृक् कामिनीनां मनांसि[1]?, व्यरचि सचिवभावः केन धूमध्वजस्य[2]? ।
क्षयमुपगमिता रुक् कीदृशेनातुरेण?, प्रसरति च विबाधा कीदृशीहार्शसानाम्?॥ १२ ॥

अव०—"ना युवा[1], वायुना[2], जायुपा[3], पायुजा[4]" मन्थानजातिः । ना पुरुषो युवा तरुणः । वायुना वातेन । जायु औषधं पिबति विच् जायुपा तेन । पायौ अपाने जाता पायुजा ॥ १२ ॥

वाजिबलिवर्दविनाशसुष्ठुनिष्ठुरमुरद्विषो यमिह । प्रश्नं विदधुर्वपुषस्तस्मिन्नेवोत्तरमवापुः ॥ १३ ॥

अव०—"हेतुरङ्ग मोक्षान्तसुखराजिनयेकः" समवर्णप्रश्नोत्तरजातिः । मोक्षान्तं च तत् सुखं च मोक्षान्तसुखं तस्य राजिः श्रेणिस्तस्या नये प्रापणे । हे अङ्ग शरीर । हेतुः कः । तुरङ्गमश्च अश्वः, उक्षा च बलीवर्दः, अन्तश्च अवसानं, सु च सुष्ठु, खरं च अतिकठिनं, अश्च विष्णुः, ते तथा सम्बोधनं हे तुरङ्गमोक्षान्तसुखरा जिन एकः ॥ १३ ॥

क्रव्यादां केन तुष्टिर्[1]जगदनभिमता का[2] रिपुः ? कीदृगुग्रैः[3] ?,
कं नेच्छन्तीह लोकाः[4] ? प्रणिगदति गिरिर्[5]वृश्चिकानां विषं[6] क ।
कुत्र क्रीडन्ति मत्स्याः[7] प्रवदति मुरजित्कापिले भोगभाक्कः ?,
कीदृक्का कीदृशेन प्रणयभृदपि चालिङ्ग्यते न प्रियेण ? ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"अस्ना[1]तां[2]स्त्री[3]मं[4]ङ्ग[5]ले[6]प्सु[7]ना[8]" ( ९ )अष्टदलकमलं। अस्ना मासेन। अता *अलक्ष्मीः । अस्त्रं विद्यते यस्यासौ अस्त्री शस्त्रवान् । अमं रोगं । हे अग पर्वत । अले पुच्छे । अप्सु पानीयेषु । हे अ विष्णो । ना पुरुषः । अस्नाता अकृतस्नाना मङ्गलेप्सुना मङ्गलं वाञ्छता पुरुषेणेति शेषः ॥ १४ ॥

कीदृश्यो नाव इष्यन्ते, तरीतुं वारि वारिधेः ?। अशिवध्वनिराख्याति, तिर्यग्भेदं च कीदृशः ? ॥१५॥

अव०—"अपराजयः" द्विः समस्तः । अपगता राजयः छिद्राणि यासु ता अपराजयः । अकारात्परोऽच् इकारः अपराच् तस्यायः क्षयो यत्राशिवध्वनौ स तथा ( अशिवशब्दादकारेकारक्षये ऽश्वेति स्थितं )॥ १५ ॥

पीनकुचकुम्भलुभ्यन्,किमाह भगिनीं स्मरातुरः कौलः?।हरनिकरपथस्वः—सृष्टिवाचि नर्नगपदं कीदृग्?१६

अव०"भव मा स्वसा दिश स्तनं" ( भवमास्वसादि, शस्तनं ) द्विर्गतजातिः । स्वसा भगिनी मा भव, स्तनं दिश प्रयच्छ । शस्तौ लुप्तौ +नौ यत्र तत् शस्तनं । भश्च वश्च माश्च स्वश्च सश्च भवमास्वसाः, ते आदौ यस्य लुप्तनकारद्वयस्य नर्नगपदस्य तत् भवमास्वसादि, तच्च तत् शस्तनं च, ( एतावता ) भर्ग १ वर्ग २ मार्ग ३ स्वर्ग ४ सर्ग ( इति हरादिशब्दवाचि पदं )॥ १६ ॥ ॥ ४ ॥

---

* दारिद्र्यं । + नकारद्वयं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाभ्यम्भोजभुवः स्मरस्य च रुचो विस्तारयेति श्रियः, पत्युः पत्युपदेशनं कथमथो पत्नीष्यते कीदृशी ?।
इत्याख्यत् कमला तथाकलियुगे कीदृक्कुराज्यस्थितिः?,कीदृश्याऽहनि चण्डभास्करकरेनक्षत्रराज्याऽजनि ?

अव०—“विभा वितानया[१]” गतागतद्विर्गतः । (या नता विभौ इ २ विभाविताऽनयाः ३ विभावितानया ४) विभा वितानय उश्च[१] ईश्च[२] वी तयोर्व्योः भा दीप्तयः विभाः ताः, वितानय विस्तारय । हे अ विष्णो । या पत्नी नता विभौ । हे ई[३] । विभावितः प्रकटितोऽनयो यस्यां सा । विगतो भाया वितानो विस्तारो यस्याः सा तथा तया ॥ १७ ॥

प्रभुमाश्रित्य श्रीदं,किमकुर्वन् के[१] कया[२] समं लक्ष्मि[३] !?। कह केरिसया के मरण-मुवगया लुद्धयनिरुद्धा? १८

अव०—“समगंसंताऽसा[१] मया[२][३]” द्विर्गतभाषाचित्रकजातिः ( समगं-सतासा-मया) समगंसत संगं गतवन्तः । असाः अलक्ष्मीकाः । मया लक्ष्म्या । समगं एककालं । ( सतासा ) सत्रासाः । ( मया ) मृगाः ॥ १८ ॥

वसुदेवेन मुररिपुर्यौहिंसाहेतुतां श्रियां पृष्टः । तेणं तेहिं चिय अक्खरेहिँ से उत्तरं सिट्ठं ॥ १९ ॥

अव०—“तायऽकमऽनयंत रयं” भाषाचित्रसमवर्णप्रश्नोत्तरं । ताः लक्ष्म्यः, हे अ, कं (पुरुषं) अनयन्त नीतवत्यः,

---

१ ब्रह्मा । २ कामदेवः ३ लक्ष्मि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रयं क्षयं, इति प्रश्नः । इदमुत्तरं—हे तात क्रमनयौ कुलधर्मौ तयोरन्ते क्षये विनाशे रतं आसक्तं पुमांसं पुरुषं ॥ १९ ॥

किं प्राहुः परमार्थतः कमृषयः?[१] किं दुर्गमं वारिधेः[२]—र्विद्याःकं न भजन्ति?[३] रागिमिथुनं कीदृक्[४] किमर्घं स्मृतम्?[५]।
रक्षांसि स्पृहयन्ति किं?, तनुमतां[६] कीदृक् सुखार्थादिकं?[७], कीदृक्कर्षुकलोकहर्षजनकं न व्योम वर्षास्वपि? २०

अव०—"विगतजलदपटलं" विपरीतमष्टदलकं । किं प्राहुः कमृषयः ? बिलं विवरं, गलं कण्ठं प्राहुः कथयन्ति स्म । तलं मध्यभूतलं । जलं ( डं ) मूर्खं । ललं विलासयुक् । दलं खण्डं । पलं मांसं । टलं चञ्चलं ॥ २० ॥

अभिसारिकाह कांश्चित्तरुणाःकिं कुर्वतेऽत्र कं कस्याः?। रतिसागरे मृगदृशः, किं किमकार्षीत्कथंकामी?२१

अव०—"समयं ते अधरदलं" समस्तव्यस्तजातिः । अभिसारिकाह कांश्चित् तरुणाः० समयन्ते समागच्छन्ति समयं सङ्केतं ते तव अधरदलं ओष्ठपुटं अधरत् भृतवान् अलं अत्यर्थं ॥ २१ ॥

कामाः प्राहुरुमापते ! तव रुषः प्रागत्र कीदृग् सती, का केषां किमकारि वारितनुदे रत्या स्वचेतो मुदे ।
पश्चादुद्भवजानुसंभवनरान् दैत्यान्त्यदंष्ट्राङ्गजान् ,मन्दं च क्रमशोमुजध्वनिरगात् कीदृक् क कस्मिन्सति २२

अव०—"अजा मदहतभा पूर्वो मेने" द्विः समस्तजातिः । हे अजाः कामाः । मेने मनिता । का ? पूः शरीरं । कीदृक् ? मदहतभा मया अहताः भाः प्रभाः यस्याःसा । केषां ? वो युष्माकं । अश्च जाश्च मश्च दश्च हश्च तश्च भाश्च



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अजामदहतभाः, ते पूर्वे यस्य स तथा । मुजशब्दसंबन्धि मकारे नकारे सति अनुज १ जानुज २ मनुज ३ दनुज ४ हनुज ५ तनुज ६ भानुजा ७ इति भवति ॥ २२ ॥

जलस्य जारजातस्य, हरितालस्य च प्रभुः । मुनिर्यं प्रश्नमाचष्टे, तत्रैव प्रापदुत्तरम् ॥ २३ ॥

अव०—"का कुलालेन मृद्यते ? " ( काकुलालेन मृद्यते ) समवर्णप्रश्नोत्तरजातिः । कं च अकुलश्च आलश्च काकुलालाः तेषां इनः स्वामी (स तथा) तस्य सम्बोधनं हे काकुलालेन एतय(द्य)तेर्विशेषणं । मृद् मृत्तिका ॥ २३ ॥

ब्रूते पुमांस्तन्वि ! तवाधरं कः ?, क्षिणोति को वा मनुजव्रजच्छित् ? ।
प्रिये ! स्वसान्निध्यमनभ्युपेते, किमुत्तरं यच्छति पृच्छतः श्रीः ? ॥ २४ ॥

अव०—"नारदः" त्रिर्गतः । हे नः पुरुष । रदः दशनः । रो रे लोपमित्यादिना दीर्घः । नराणां समूहो नारं, तत् द्यति खण्डयति यः स तथा । न आरत् नागतः । ऋशृगताबित्यस्य ह्यस्तनीप्रथमपुरुषैकवचने वृद्धौ च रूपं । अः विष्णुः ॥२४॥

किमिष्टं चक्राणां वदति बलमर्कः किमतनोत्?, जिनैः को दध्वंसे? विरहिषु सदा कः प्रसरति ?
भरं धौरेयाणां निरुपहतमूर्तिर्वहति कः?, सुरेन्द्राणां कीदृग् भवति जिनकल्याणकमहः ? ॥२५॥

---

१ स्पष्टतायै टीकान्तरपाठोऽत्र लिख्यते—जलजारजातहरितालस्वामिनो मुनिश्च का कुलालेन मृद्यते ? इति यं प्रश्नं चक्रुः, तत्रैवोत्तरं ते प्रापुः । यथा—हे केन, हे अकुलेन, हे आलेन, हे यते । मृद् मृत्तिका ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"असममोदावहः" मञ्जरीसनाथजातिः। अहः दिनं। हे सहः बल सह श (सहः श) बलवाचकः। महः तेजः। मोहः। दाहः विरहसमुद्भवं दहनं। वहः गलप्रदेशः। असमं असदृशं मोदं प्रमोदं आवहति बिभर्ति ॥ २५ ॥

प्राह द्विजो गजपतेरुपनीयते का?, पात्री प्रभुश्च जिनपङ्क्तिरवाचि कीदृक् ?।
कीदृग्विधेह वनिता नृपतेरदृश्या?, प्रस्थास्नुविष्णुतनुरैक्षत कीदृशी च ?॥ २६ ॥

अव०—"विप्र विधा विना विग्रा विप्रधानाग्रा" पद्मजातिः। हे द्विज विप्र। गजपतेः हस्तीन्द्रस्य का उपनीयते। विधा हस्त्याहारविधिः। अवतीति क्विपि ऊः रक्षिका, इना स्वामिनी, ऊश्च इना च विना। विग्रा विगतनासिका ? विः पक्षी प्रधानं अग्रे यस्याः सा तथा ॥ २६ ॥

वदति विहगहन्ता कः प्रियो निर्धनानां ?, भणति नभसि भूतः कीदृशः स्याद्विसर्गः ?।
वदति जविनशब्दः कीदृशः सत्कवीन्द्राः?, कथयत जनशून्यं कज्जलं भर्त्सनं च ?॥ २७ ॥

अव०—"व्यन्तरादिव्यस्तः" व्यस्तसमस्तजातिः। हे व्यन्त पक्षिहन्तः। रा द्रव्यं। दिवि भवो दिगादिद्वारेण यः प्रत्ययः दिव्यः तस्य संबोधनं। सकारं तस्यतीति स्तः क्विप्। विश्च अं च तरू च व्यंतरः, एते आदौ यस्य। विः अस्तः क्षिप्तो यत्र जविनशब्दे। स चासौ व्यस्तश्च स तथा। ततो विजनं अञ्जनं तर्जनं चेति भवति ॥ २७ ॥



१ अहः, सहः, महः, मोहः, दाहः, वह इति। २ पक्षिविनाशकः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीतस्मरः पृच्छति कुत्र चापलं, स्वभावजं ? कः सुरते श्रियः प्रियः ?।
सदोन्मुदो विन्ध्यवसुन्धरासु, क्रीडन्ति काः कोमलकन्दलासु ? ॥ २८ ॥

अव०—"अने कपाव ऽलयः" पूर्वोक्तेयं जातिः ( अनेकपावलयः ) । न विद्यते इः कामो यस्यासौ अनिः तस्य संबोधनं क्रियते हे अने अकामिन् । कपौ वानरे । अस्य विष्णोर्लयः संश्लेषः । अनेकपा हस्तिनस्तेषामावलयः श्रेणयस्तथा ॥ २८ ॥

मूषकनिकरः कीदृक्, खलधान्यादिधामसु ? । भीरुः संभ्रमकारी च, कीदृगम्भोनिधिर्भवेत् ? ॥२९॥

अव०—"विलसद्मकरः" द्विः समस्तः । बिलान्येव सद्मानि गृहाणि बिलसद्मानि तानि करोतीति बिलसद्मकरः । विलसन्तो मकरा मत्स्या यत्र स विलसद्मकरः ॥ २९ ॥

किं लोहाकरकारिणामभिमतं ?सोत्कर्षतर्षातुराः, किं वाञ्छन्ति ?हरन्ति के च हृदयं दारिद्र्यमुद्राभृताम् ?।
स्पर्धावद्भिरथाहवेषु सुभटैः कोऽन्योऽन्यमन्विष्यते?जैनाज्ञारतशान्तदान्तमनसः स्युःकीदृशा साधवः?३०

अव०—"अपराजयः" मञ्जरीसनाथजातिः । अयो लोहं । पयः पानीयं । रायो द्रव्याणि । जयो विजयः । न विद्यते परेषु आजिः संग्रामो येषां तेऽपराजयः ॥ ३० ॥

पापं पृच्छति विरतौ,को धातुः? कीदृशःकृतकपक्षी ?। उत्कण्ठयन्ति के वा,विलसन्तो विरहिणीहृदयम्?३१



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"मल यम ऽरुतः" व्यस्तसमस्तजातिः। हे मल पाप। विरतौ यम् धातुः। न विद्यते रुतं शब्दितं यस्य स तथा। मलयस्य मलयपर्वतस्य मरुतो वाता मलयमरुतो दक्षिणानिलाः ॥ ३१ ॥

केनोद्वहन्ति दयितं विरहे तरुण्यः?, प्राणैः श्रिया च सहितः परिपृच्छतीदम्।
तार्क्ष्यस्य का नतिपदं ? सुखमत्र कीदृक् ?, किं कुर्वताऽन्यवनितां किमकारि कान्ता? ॥३२॥

अव०—"मनसाविनता" मन्थानान्तरजातिः। मनसा, सानम, विनता, तानवि, नमता, असावि। मनसा हृदयेन। आनाः प्राणाः मा लक्ष्मीः, सह आनमैर्व (नमेन व) र्तत इति सानमः तस्य संबोधनं हे सानम। विनता गरुडजननी। तनोर्भावस्तानवं, तानवं विद्यते यस्य तत्तानवि। अन्यकान्तायाः नमता प्रणामं कुर्वता। असावि प्रसववती कृता ॥ ३२ ॥

भवति चतुर्वर्गस्य, प्रसाधने क इह पटुतरः प्रकटः? । पृच्छत्यङ्गावयवः कः, पूज्यतमस्त्रिजगतोऽपि? ३३

अव०—"नाभेयः" वर्धमानाक्षरजातिः। ना पुमान्। हे नाभे अङ्गावयव। नाभेय आद्यजिनः ॥ ३३ ॥

वैदिकविधिविशस्तबस्तामिषमदतां स्वर्गदं द्विजं, जैनादिः किमाह साक्षेपं सासूयं सकाकु च? कीदृक्।
पूतवातपरितापम्लेच्छोपास्तिनुतिगृहक्रीडा–होमविश्ववेगवतो जल्पति पवदनदपदम्? ॥ ३४ ॥



१ नकारस्थानेऽकारः चिन्त्यंचेदम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"पाप दयसे स्तभदेहभुजा दिवि पदं" द्विर्गतजातिः। हे पाप अधम, दयसे ददासि, स्तभस्य बस्तस्य देहः कायस्तस्य भुक् तया, दिवि स्वर्गे, पदं स्थानं। पाश्च पश्च दश्च यश्च सेश्च स्तश्च भश्च देश्च हश्च भुश्च जश्च ते आदिर्यस्य, दश्च दश्च दौ, पश्च दौ च पदाः, विगताः पदा यस्मात्तत् विपदं, तच्च तत् पवदनदपदं च। एतावताऽयमर्थः—पावन १ पवन २ दवन ३ यवन ४ सेवन ५ स्तवन ६ भवन ७ देवन ८ हवन ९ भुवन १० जवन ११ एतान् शब्दान् वदति ॥ ३४ ॥

औषधं प्राह रोगाणां, मया कः प्रविधीयते। जामातरं समाख्याति, कीदृशो वठरध्वनिः ? ॥३५॥

अव०—"अगद शमः"। हे अगद औषध। शम उपशमः। न विद्यते गकाराद्शमः ठकारो यत्र सोऽगदशमः, ततो वर इति भवति ॥ ३५ ॥

अग्रे गम्येत केन ? प्रविरलमसृणं किं प्रशंसन्ति सन्तः ?,
पाणिर्ब्रूते जटी कं प्रणमति ? विधवा स्त्री न कीदृक् प्रशस्या ?।
वक्ति स्तेनः क्व वेगो ? रणभुवि कुरुतः किं मिथः शत्रुपक्षा-
वुद्वेगावेगजातारतिरथ वदति स्त्री सखीं किं सुषुप्सुः ? ॥ ३६ ॥

अव०—"हला संस्तरं सारयेतः" अष्टदलं कमलं। हला व्यञ्जनेन। हसं ईषद्धसितं। हे हस्त कर। हरं शम्भुं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हसतीति हसा । हे हर चौर । हये अश्वे । हतः हन् हिंसागत्योः वर्तमाना तसि रूपं । हैला सखि संस्तरं शयनीयं सारय प्रगुणीकुरु सज्जीकुरु इतः स्थाने ॥ ३६ ॥

व्यथितः किमाह सदयः, क्षितकं क्षुत्क्षामकुक्षिमुद्वीक्ष्य ? । दारुणधन्वनि समरे, कीदृक्कातरनरश्रेणिः ? ३७

अव०—"हा वराक निरशन" गतागतः। हा खेदे हे वराक तपस्विन् निरशन गतभोजन । न शरनिकरं त्राणसङ्घातं आवहति या सा तथा ॥ ३७ ॥

चन्द्रः प्राह वियोगवानकरवं किं रोहिणीं प्रत्यहं?, शम्भोः केन जवाददाहि सरुषा कस्याङ्गयष्टिः किल ?।
शीघ्रं कैः पथि गम्यते?ऽथ कमला ब्रूते मुहुर्वल्लभं, ध्यानावेशवशादलाभि पुरतः कैर्वैश्वरूपं मम? ३८॥

अव०–"मयैः" चतुः समस्तः । हे म चन्द्र, ऐः अगाः त्वं, इण् गतौ ह्यस्तनी सि विकरणलोपे अवर्णस्याकार इति वृद्धौ रूपं । मया एः कामस्य । मयैः उष्ट्रैः । हे मे ऐः वैष्णवैः ॥ ३८ ॥

गुरुरहमिह सर्वस्याग्रजन्मेति भट्टं, समदममदयिष्यन् कोऽपि कुप्यन् किमाह ? ।
त्वमलदयपदं वा आश्रयाभावमूर्छा–कटकनगविशेषान् कीदृगामन्त्रयेत ? ॥ ३९ ॥

अव०–"आ विप्र वमाद्यत्वमदं" द्विर्गतजातिः । आः खेदे हे विप्र द्विज वम मुञ्च आद्यत्वमदं प्रथममदं अह-

१ हण्डे हञ्जे हलाऽऽह्वाने नीचां चेटीं सखीं प्रति इति वचनात् सखीं प्रति संबोधनवाचकोऽयमत्र हलाशब्दः ततश्च "हला" इत्यस्य हे सखि इत्यर्थः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ङ्कारं । आश्च विश्च प्रश्च वश्च मश्च आविप्रवमाः, आविप्रवमा आदौ यस्य त्वमलदयपदस्य तत्तथा । न विद्यते त्वश्च मश्च दश्च यत्र तत् अत्वमदं । आविप्रवमादि च तत् अत्वमदं च तत् आलय १ विलय २ प्रलय ३ वलय ४ मलय ५ एते शब्दाः संबोधनान्ता आश्रयादिवाचकाः ॥ ३९ ॥

कीदृग्मया सह रणे,दैत्यचमूर भवदिति हरिः प्राह ? । लोको वदति किमर्थं?, का विदिता दशमुखादीनाम् ?

अव०—"क्षीणारिहयवाहनाज" गतागतः । क्षीणानि अरीणां हयवाहनानि यस्यां सा तथा । हे अज हरे । हे जन लोक, आहवाय सङ्ग्रामाय, हरिणाक्षी सीता ॥ ४० ॥

दृष्ट्वाग्रतः किल कमप्यवसादवन्तं, स्वामी पुरः स्थितनरं किमभाषतैकम् ? ।
कश्चिद्ब्रवीत्ययि जिगीषुनृपा अकार्षीत्, किं कीदृशो वदत राजगणोऽत्र केषाम् ?॥ ४१ ॥

अव०—"अयं सीदति रे को नः" द्विर्गतजातिः । रे हे नः पुरुष अयं कः सीदति । अयंसीत् हतः,अतिरेकोऽधिकोनोऽस्माकम् ॥

सीरी पाणिं क्व धत्ते ? क्रतुरथ मुदगात्स्यात्कया देहिनां भी-
र्ब्रूतेऽश्वः क्वारि विष्णुर्व्यधृत सविधगं हन्तुकामः किमाह ? ।
शम्भुं घ्नन्तं गजं द्राक् सदय ऋषिरगात् किं तु काक्वा तथास्मिन्,
हारं किं नापिधत्से ? विरहिणि नभसीत्यूचुषीं सा वदेत् किम् ? ॥ ४२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अव०—"हलेवर्षत्यायस्तेम्भोदेहारस्तीतः" द्वादशपत्रमिदं पद्मं । हले लाङ्गले । हे हव क्रतो । हे हर्ष मुत् । हत्या ब्राह्मणादिघातेन । हे हय अश्व । हस्ते करे । हम्भो आमन्त्रणे । हदे पुरीषोत्सर्गं करोमि, हदि पुरीषोत्सर्गे इति धातोः । हहा अयं दयाप्रकाशकः । हे हर शङ्कर । हस्ती गजो हतो विनाशितः । हले[१] सखि वर्षति वृष्टिं कुर्वति आयस्ते विस्तीर्णे अम्भोदे ( मेघे ) हारस्तीतः आर्द्रभावं गतः ॥ ४२ ॥

मधुरिपुणा निहते सति, दनुजविशेषे तदनुगताः किमगुः ? ।
अभिदधते च विदग्धाः, सत्कवयः कीदृशीर्वाचः ? ॥ ४३ ॥

अव०—"अमृतमधुराः" द्विर्गतजातिः। अमृत प्राणत्यागं कृतवान्, मधुर्दानवः आः खेदे। अमृतवन्मधुराः ॥ ४३ ॥

ब्रूते पुमान् मुरजिता रतिकेलिकोपे, सप्रश्रयं प्रणमता किमकारि का कम् ? ।
दुःखी सुखाय पतिमीप्सति कीदृशं वा ?, कामी कमिच्छति सदा रतये प्रयोगम् ? ॥ ४४ ॥

अव०—"नरनारीप्रियंकरं" । हे नः पुरुष, अनारि नीता नृ नये इति धातुः, का ? ईः श्रीः, कं ? प्रियं प्रणयं (प्रीः) संपदादित्वात् क्विप् । कं सुखं राति ददाति करः तं पुमांसं । नरश्च नारी च तयोः प्रीतिं करोति यः स तथा तं ॥ ४४ ॥

१ अत्र हलाशब्दस्य सखीवाचकत्वं न तु तां प्रति संबोधनवाचकत्वं तेन आमन्त्रणे "एदापः" इत्येत्त्वं यत्र तु संबोधनवाचकत्वं तत्र नैतत् यथा "हला संस्तरं सारयेतः" इत्यत्र । परं हलाशब्दष्टाबन्तोऽपि सखीपर्यार्थः" इति व्याख्यासुधावचनादुभयं रम्यमेव.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यूयं किं कुरुत जनाः, स्वपूज्यमिति शिल्पिसुतखगौ ब्रूतः ।
स्मरविमुखचित्तजैनः, कथमाशास्ते जनविशेषम् ॥ ४५ ॥

अव०—"संनमाम कारुकुमारवी" गतागतः । कारुकुमारश्च विश्च कारुकुमारवी तयोः संबोधनं हे कारुकुमारवी संनमाम प्रणमामहे । हे वीर मा कुरु काममानसं ॥ ४५ ॥

सुभटोऽहं वच्मि रणे, रिपुगलनालानि केन किमकार्षम् ? ।
चेटीप्रियो ब्रुवेऽहं, किमकरवं काः स्वगुणपाशैः ? ॥ ४६ ॥

अव०—"असिनादासीः" द्विर्गतजातिः । असिना खड्गेन अदासीर्लूनवान् । पक्षे असिनाः अबध्नाः, काः ? दासीः षिञ् बन्धने ह्यस्तनी सिः ॥ ४६ ॥

भूषा कस्मिन् सति ? स्यात्कुचभुवि मदिरा वक्ति ? कुत्रेष्टिकाः स्युः ?,
कस्मिन् योधे जयश्रीर्युधि ? सरति रतिः प्राजने कुत्र नोक्षणः ? ।
कामद्वेषी तथोडुर्वदति दधि भवेत् कुत्र ? किं वा वियोगे,
दीर्घाक्ष्याः ? कोऽपि पीनस्तनघनघटितप्रीतिरन्यं ब्रवीति ॥ ४७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"हासुस्तनीसायताक्षीरे" व्यस्तं कमलमष्टदलं। हारे। हे सुरे मदिरे। स्तरे भिसत्के। नितरामतिशयेने-रयति रिपून् क्षेपयति यः स नीरस्तस्मिन्। सह आरया वर्तते सारस्तस्मिन्। एः कामस्य अरिः शत्रुः यरिः तस्य संबोधनं हे यरे। हे तारे नक्षत्र। क्षीरे। हा खेदे सुस्तनी शोभनकुचा सा आयताक्षी दीर्घनेत्रा रे कुत्र गतेति शेषः॥४७॥

**किं कुर्याः? कीदृक्षौ, रागद्वेषौ समाधिना त्वमृषे!। कीदृक्षः कक्षे स्यात्, किल भीष्मग्रीष्मदवदहनः ४८**

अव०—"तृणहानि कारी" द्विर्गतजातिः। कस्य सुखस्य अरी कारी, तृणहानि हन्मि, तृहि हिसि हिंसायां, पञ्चमी आनि। शेषं स्पष्टम्॥ ४८॥

**शुभगोरसभूमीरभि, किमाह तज्ज्ञः स्मरश्रीपृष्टः[1]?। विरहोद्विग्नः कामी, निन्दन् दयितां किमभिधत्ते? ४९**

अव०—"क्षीरादि मनोहारीमासु" गतागतजातिः। शुभगोरसभूमीः आश्रित्य क्षीरादि मनांसि हरतीत्येवंशीलं मनोहारि, इश्च मा च समाहारे इमं तस्य संबोधनं हे इम, आसु भूमिषु। सुष्ठु अत्यर्थं मारी मारणात्मिका हा खेदे नोऽस्माकं मदिराक्षी॥ ४९॥

**इह के मृषाप्रसक्ता, नरनिकराः? इति कृते सति प्रश्ने। यत्समवर्णं तूर्णं, तदुत्तरं त्वं वद विभाव्य ५०॥**

१ स्मरश्रिसंपृष्टः।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"केऽलीकरता मनुजनिवहाः" समवणप्रश्नोत्तरं। के अलीकरता मनुजनिवहाः पुरुषसङ्घा ? इति प्रश्ने केलीकरस्य भावः केलीकरता, तां अनु तामाश्रित्य जनिं उत्पत्तिं ये वहन्ति ते जनिवहाः ॥ ५० ॥

बभ्रुः प्रभूततुरगान् स्वजनास्तवेति, राज्ञोदितः कृपणकोऽपलपन् किमाह ? ।
पीत्वा छलेन दशनच्छदमुग्रमानां, भर्ता किमाह दयितां किमपि ब्रुवाणाम् ? ॥ ५१ ॥

अव०—"अधरं तवाहमपिबंधवोनमे" द्विर्गतजातिः । न अधरन्त न भृ(धृ)तवन्तः, वाहमपि अश्वमपि, बन्धवो मम । तव अधरं ओष्ठपुटं अहं अपिबं, धवो भर्ता त्वं न मे, साहङ्कारं ॥ ५१ ॥

श्रीराख्यदहं प्रियमभि, किमकरवं ? का च कस्य जनयित्री ?। अदिवारीशब्दो वा, कैस्त्यक्तः प्राह गृहदेशम्

अव०—"यैः" त्रिः समस्तः । ए (इ) लक्ष्मि, ऐः अगच्छस्त्वं । या लक्ष्मी एः कामस्य। इश्च ईश्च अश्च याः तैः यैः मुक्तो द्वार इति भवति ॥ ५२ ॥

कीदृक् सरः प्रसरदम्भसि भाति काले ?, भुक्त्यर्थतेह विहिता कतमस्य धातोः ? ।
उत्कण्ठयेद्विरहिणं (णीं) क इह प्रसर्पन्, ब्रूते शिफाध्वनिरथ श्रियमत्र कीदृक् ? ॥ ५३ ॥

अव०—"विशदपञ्चमः" व्यस्तद्विःसमस्तः । विशन्त्यः प्रविशन्त्यः आपो यत्र तत्तथा । चमः चमू अदने इत्यस्य । विशदपञ्चमः निर्मलपञ्चमरागः । विगतः शकारो दकाराच्च पञ्चमः फकारो यत्र स तथा, या इति भवति ॥ ५३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वदति मुरजित् कुत्राता च प्रिया वरुणस्य का ?, स च भणति यः क्रुद्धो नैव द्विषः परिरक्षति ।
दशमुखचमूः काकुत्स्थेन व्यधीयत कीदृशी?, खरवककवर्णाली कीदृग्ब्रवीति गतारतिः ?॥ ५४ ॥

अव०—"अपरावणा" वर्धमानाक्षरजातिः । हे अ विष्णो । तथा हे अप कुत्सितं पातीति अपः, कुत्सितार्थे नञ् । अपरा पश्चिमा । न परान् अवतीति अपरावस्तस्य संबोधनं हे अपराव हे परमारक । अपगतो रावणो यस्यां सा तथा । अकारात् परा अपरा अकारपूर्वा, तथा वकारयोः स्थाने णौ यत्र सा वणा चेति, ततो(ऽ) रणरणक इति भवति ॥५४॥

निःस्वःप्राह लसद्विवेककुलजैःसम्यग्विधीयेत को?,मुग्धे! स्निग्धदृशं प्रिये किमकरोः?किं वातदोष्ठं व्यधाः?
लोकैःकोऽत्र निगद्यते बलिवधूवैधव्यदीक्षागुरुः?,कीदृग्भूमिशुभासशब्द इह भो विश्रम्भवाची भवेत्? ५५

अव०—"अतनवमदशमः" द्विर्व्यस्तसमस्तः । न विद्यते ता लक्ष्मीर्यस्यासावतः, तस्य संबोधनं हे अत । नवश्चासौ मदश्च तथा तस्य शमः । अतनवं विस्तारितवती । अदशं अधरचुम्बनमकरवं । अः विष्णुः । न विद्येते तकारान्नवमदशमौ यत्र स तथा, ततश्च विश्वास इति भवति ॥ ५५ ॥

शशिना प्रमदपरवशः, पृच्छति कः स्वर्गवासमधिवसति?। च्युतसत्पथाःकिमाहुर्लौकिकसन्तो विषादपराः

अव०—"मयानंदवश नाकी" गतागतः । मसा चन्द्रमसा आनन्दः मयानन्दः तेन वशः परवशः तस्य सम्बोधनं मयानन्दवश । नाकी देवः । कीनाशवदनं याम ॥ ५६ ॥



For Private And Personal Use Only

उष्ट्रः पृच्छति किं चकार मद्दते कस्मिन् शमीवृक्षकः?, कीदृक् सन्नधिकं स्वभक्ष्यविरहे दुःखी किलाहं ब्रुवे ?
यूनः प्राह सरोजचारुनयना सम्भोगभङ्गि(गी)क्रमे, प्रारब्धेऽधरचुम्बने मम मुखं यूयं कुरुध्वे किमु?॥५७॥

अव०—"हे मयाननंन्द वने चलोऽलमक" गतागतः। हे मय उष्ट्र, आननन्द समृद्धिं गतवान्, वने, चलश्चञ्चलोऽलमत्यर्थं, न विद्यते कं सुखं यस्यासौ अकः तस्य संबोधनं हे अक सुदुःख। हे कमललोचने वदनं नयामहे ॥ ५७ ॥

चक्री चक्रं क धत्ते ? क सजति कुलटा ? प्रीतिरोतोः क ? कस्मै,
कूपं(पः)खन्येत राज्ञां ? क च नयनिपुणैर्नेत्रकृत्यं निरुक्तम् ?।
कन्दर्पापत्यमूचे रणशिरसि रुषा ताम्रवर्णः क कर्ण-
श्चक्षुश्चिक्षेप ? विष्णुर्वदति वसु पुरस्तेन किं त्वं करोषि ?॥ ५८ ॥
युज्यन्ते कुत्र मुक्ताः ? क च गिरिसुतयाऽसञ्जि ? कस्मिन्महान्तो,
यत्नं कुर्वन्ति ? चौर्यं निगदति विदिता कैकदिक् तिग्मधारा?।
कस्मिन्दृष्टे रटन्ति क च सति करभाः ? पक्ष्मलाक्ष्या किलोक्तः,
कश्चित्किं वा ब्रवीति स्मरशरनिकराकीर्णकायः सदेश्यान् ? ॥ ५९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"कजाक्षी वाचाऽस्मानहह सहसाऽचुक्षुभदरे" षोडशदलं कमलं विपरीतं युगलस्थापनं। करे हस्ते। जारे परस्त्रीलम्पटे। क्षीरे दुग्धे। वारे पानीयाय। वार् इत्ययं शब्दः पानीयवाचकः। चारे चरे राजानो हि चरनेत्राः। स्मरस्यापत्यं स्मारिः तस्य संबोधनं हे स्मारे। नरे अर्जुने। हे हरे विष्णो। हरे हृञ् हरणे इति धातुः वर्तमाना एरूपं चोरयामीत्यर्थः। ५८। सरे हारे। हरे शङ्करे। सारे प्रधाने वस्तुनि। हे चुरे चौर्ये। क्षुरे नापितोपकरणे। भरे बाह्यद्रव्ये। दरे भये सति। कजाक्षी स्त्री वाचा वचनेन अस्मान् कर्मतापन्नान् अहह सहसा अचुक्षुभत् क्षुभितवती, क्षुभ सञ्चलने पुषादिद्वारेणाण्[1] ॥ ५९ ॥

जलनिधिमध्ये गिरिमभिवीक्ष्य, क्षितिरिति वदन् किमाह विवादे ?।
स्निग्धस्मितमधुरं पश्यन्ती, हरति मनांसि मुनीनामपि का ?॥ ६० ॥

अव०—"नाचलोऽङ्ग रसा" गतागतः। न अचलः पर्वतः, अङ्ग इति कोमलामन्त्रणे, रसा पृथ्वी। सारङ्गलोचना सारङ्गा हरिणास्तद्वल्लोचने यस्याः सा तथा ॥ ६० ॥



---

१ प्रतिभातीदमशुद्धम् यतः "णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्" इति ण्यन्तादुचितोऽत्र चङ्। द्वित्वाभावः पुषाद्यङि स्यादन्यथा। अविषयस्तु न कणोऽपि प्रसङ्गस्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मेण किं कुरुत काः क नु यूयमार्याः ?, कीदृश्यहिंसनफलेन तनुः सदा स्यात् ?।
पुंसां कलौ प्रतिकलं किल केन हानिः ?, कीदृग्व्यधायि युधि कार्जुनचापनादैः ? ॥ ६१ ॥

अव०—"सारतादिना, यामतागवि" मन्थानजातिः । याम ता गवि, विगतामया, सारतादिना, नादितारसा । याम गच्छाम, ताः लक्ष्मीः कर्मतापन्नाः, गवि देवलोके । विगतामया गतरोगा । सारतादिना प्रधानत्वादिना । नादिता शब्दिता, रसा भूमिः ॥ ६१ ॥

कीदृशः स्यादविश्वास्यः ?, स्निग्धबन्धुरपीह सन् । नस्थातव्यंचशब्दोऽयं, प्रदोषं प्राह कीदृशः ? ॥६२॥

अव०—"वितथवचनः" । वितथं अलीकं वचनं यस्यासौ वितथवचनः । तश्च थश्च वश्च चश्च नश्च तथवचनाः, विगताः तथवचना यत्र स तथा, सायमिति सिद्धम् ॥ ६२ ॥

नृणां का कीदृगिष्टा वद ? सरसि बभुः के ? स्मरक्रीडितोष्ट्राः,
साधुः श्रीशश्च सर्वे पृथगभिदधतो बोधनीयाः क्रमेण ।
कुर्वेऽहं ब्रह्मणे किं ? वदति मुनिविशेषोऽथ कीदृक् समग्रः?,
स्यात्किंवा पङ्कजाक्षीसुखविमुखमना भुक्तभोगोऽभिदध्यात् ॥ ६३ ॥

अव०—"सा रामा रमयते न मनो नः" श्रृङ्खलाजातिः । सा लक्ष्मीः । सारा । रामाः सारसाः । हे मार काम ।

प्र० ३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हे रम क्रीडित । हे मय उष्ट्र । हे यते । तायाः लक्ष्म्याः इनः स्वामी तस्य संबोधनं हे तेन । नम नमस्कारं (कुरु)। हे मनो ऋषे । न ऊनः नोनः ॥ ६३ ॥

स्वजनः पृच्छति जैनैरघस्य कः कुत्र कीदृशे कथितः ?। कथयत वैयाकरणाः, सूत्रं कात्यायनीयं किम् ?६४

अव०—"बंधोऽधिकरणे" त्रिः समस्तसूत्रोत्तरजातिः । हे बंधो स्वजन । बंधः, कुत्र ? अधिकरणे पापव्यापारे, किंविशिष्टे ? अधिकरणे अधिकं रणं सङ्गामं(मो) यत्र तत्तथा तस्मिन् । अधिकरणे ॥ ६४ ॥

ब्रवीत्यविद्वान् गुरुरागतः[2] कौ ?, सावित्र्युमे किं कुरुतः सदैव ? ।
आशैशवात् कीदृगुरभ्रपोतः ?, पुष्टिं च तुष्टिं च किलाप्नुवीत ॥ ६५ ॥

अव०—"अविदूसरतः" । वेत्तीति वित्, न वित् अवित् तस्य संबोधनं हे अवित् अज्ञ । उश्च उश्च ऊ ब्रह्ममहेश्वरौ कर्मतापन्नौ प्रति, सरतः गच्छतः । अवेगड्डुरिकायाः दूसं दुग्धं तत्र रतः स तथा ॥ ६५ ॥

तन्वि ! त्वं नेत्रतूणोद्गतमदनशराकारचञ्चत्कटाक्षै-
र्लक्ष्यीकृत्य स्मरार्तान् सपदि किमकरोः सुभ्रु ! तीक्ष्णैरभीक्ष्णम् ? ।

१ चरमप्रश्नोत्तरमिदं—सा रामा नः अस्माकं मनो न रमयते (एकवचनप्रक्रमे "अविशेषणे द्वौ चास्मदः" इति श्रीसि० २-२-१२२इति बहुत्वे नः इति) । २ अविद्वान् ब्रवीति, सावित्र्युमे गुरुरागतः गुरुश्चासौ रागश्च गुरुरागः ततः महता रागेणेत्यर्थः, सदैव कौ कर्मतापन्नौ किं कुरुतः इति प्रश्ने कृते उत्तरमुच्यते, हे अवित् ऊ सरतः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किं कुर्वीते भवाब्धिं सुमुनिवितरणाद्दायकश्रावकौ द्राक् ?
श्रद्धालुः प्राप्तमंत्राद्युचितविधिपरः प्रायशः कीदृशः स्यात् ? ॥ ६६ ॥

अव०—"अविध्यंतरतः" । अविध्यं व्यध ताडने इत्यस्य दैवादिकस्य ह्यस्तन्यमि रूपं । तरतः पारं गच्छतः । अविधेरन्तो विनाशस्तत्र रतः स तथा ॥ ६६ ॥

कीदृगनिष्टमदृष्टं नुः, स्यादित्यक्षकीलिका ब्रूते । भणइ पिया ते पिययम, कए कहिं अभिरमइ दिट्ठी ॥६७॥

अव०—"मुद्धेतुहरमणे" । मुदो हर्षस्य हेतवः तान् हरतीति मुद्धेतुहरं । अणे शकटकीलिके । हे मुग्धे तुह तव रमणे सुरतव्यापारे ॥ ६७ ॥

कीदृग्जलधरसमयजरजनी?, पथिकमनांसि किमकरोत्कस्मिन् ? ।
मधुरस्निग्धविदग्धालोकं, स्त्रैणं कीदृग् भ्रमयति लोकम् ? ॥ ६८ ॥

अव०—"सज्जघनस्तननाभिनदध्वनि" । सज्जं घनस्य मेघस्य स्तननं शब्दितं यत्र सा तथा, अभिनत् भेदितवती, अध्वनि मार्गे । नाभिरेव नदः । सन्तः जघनस्तननाभिनदध्वनयो यस्य तत् ॥ ६८ ॥

पद्मस्तोमो वदति कपिसैन्येन भोः कीदृशा प्राक्?,सिन्धौ सेतुर्व्यरचि? रुचिरा का सतां वृत्तजातिः? ।
को वा दिक्षु प्रसरति सदा कण्ठकाण्डात् पुरारेः?, किं कुर्याः कं रह इति सखीं पृच्छतीं स्त्री किमाह ॥६९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"मन्थानान्तरजातिः, "नालिन, नलिना, मालिनी, नीलिमा, नामानि, इनं, आलि" । नलिनानां पद्मानां समूहो नालिनं, तस्य संबोधनं हे नालिन । नलिना नलो विद्यते यत्र इन् (प्रत्ययः) तेन नलिना सैन्येन । मालिनी छन्दोभेदः । नीलिमा कार्ष्ण्यं । नामानि पूजयामि, इनं स्वामिनं, हे आलि सखि ॥ ६९ ॥

पथि विषमे महति भरे, धुर्याः किं स्म कुरुथ कां कस्य?। अत्यम्लतामुपगतं,किं वा के नाभिकाङ्क्षन्ति? ७०

अव०—"दधिमधुरमनसः" दधिम भृतवन्तः,परोक्षापरस्मैपदोत्तमपुरुषबहुवचनं, स्तादिनियमादिट् । धुरं । अनसः शकटस्य । दधि कर्मभूतं । मधुरं(रे) मनो येषां ते तथा ॥ ७० ॥

भानोः केष्येत पद्मैरुडु वदति पदं ? पप्रथे किं सहार्थे?,
कामो वक्ति व्यवायोऽपि च पदनिपुणैः पञ्चमी केन वाच्या ? ।
सप्राणः प्राह पुंसि क्व सजति जनता ? भाषतेऽथार्द्रभावः,
कुर्वेऽहं क्लेदनं किं? क्व च न खलु मुखं राजति व्यङ्गतायाम् ?।
सत्यासक्तं च सेर्ष्याः किमथ मुररिपुं रुक्मिणीसख्य आख्यन्? ॥ ७१ ॥

१ अत्र चरमे प्रश्नोत्तरे "लिनानि,इनं,आलि" इति पदानि निष्कास्य "हे आलि,इनं,लिनानि,आश्लिष्यामि" इत्येवंरूपोऽर्थः टीकान्तरकृतो दृश्यते।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"भामारतसानतेमनसि" शृङ्खलाजातिः। भा प्रभा। हे भ नक्षत्र। अमा एतत्सहार्थे पदं। हे मार कन्दर्प। हे रत। तसा तसूप्रत्ययेन। सहानेन प्राणेन वर्तते इति सानस्तस्य संबोधनं हे सान। नते नम्रे। हे तेम आर्द्र-भाव। मन अभ्यस, मन अभ्यासे इत्यस्य भौवादिकस्य पञ्चम्या रूपं। नसि नासिकायां। हे भामारत सत्यासक्त विष्णो सा रुक्मिणी न ते मनसि ॥ ७१ ॥

तरुणेषु कीदृशं स्यात्,किं कुर्वत्कीदृगक्षि तरलाक्ष्याः?। सा जोवणं भयंती;भण मयणं केरिसं कुणइ ?।७२।

अव०—"उवलद्धबलं"। किं कुर्वत् ? च(व)लत्। कीदृक् स्यात् ? अवतीति उ रक्षकं, स्वरो ह्रस्व इत्यादिना ह्रस्वत्वं, नपुंसकत्वादक्षिशब्दस्य। वलद्धिवर्तमानं, धवलं। उपलब्धं बलं येन स तथा तं ॥ ७२ ॥

सत्यक्षमार्तिहर आह जयद्रथाजौ, पार्थ ! त्वदीयरथवाजिषु का किमाधात् ?।
अप्पोवमाइ किर मच्छरिणो मुणंति, किंरूवमिच्छ(त्थ)सुअणं भण के र(केरि)संति ? ॥७३॥

अव०—"सच्छमतुच्छमच्छरसरिच्छं"। सत् सत्यं, शमः क्षमा, तुदतीति तुत् क्विप् अर्तिः, सच्च शमश्च तुच्च ते सच्छमतुदः, तान् शमयति (श्यति) हरति यः स तथा तस्य संबोधनं हे सच्छमतुच्छ। मम शरा मच्छरास्तेषां सरित्

१ प्रीतीदं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नदी धोरणिरितियावत् । तथा शं सुखं आधादिति संबन्धः। सच्छरूपं(च्छं) स्वच्छस्वभावं संतं प्राणिनं,अतुच्छः प्रभूतो मत्सरो यस्य स तथा तेन सदृशम् ॥ ७३ ॥

कीदृक्षः कथयत दौषिकापणः स्यात्?, त्रा केन व्यरचि च पट्टसूत्ररागः ? ।
क्षुद्रारिर्वदति किमुत्कटं जिगीषोः ?, किं जघ्ने शकरिपुणेति वक्ति रङ्कः ? ॥ ७४ ॥

अव०—मन्थानान्तरजातिः । "शाटकी, कीटशा, कंटक, कटकं, शाकं, कीकट"। शाटका विद्यन्ते यत्र स शाटकी। कीटान् श्यति कीटश्, तेन कीटशा। हे कण्टक क्षुद्रारे। कटकं सैन्यं। शकानां राज्ञां समूहः शाकं। हे कीकट रङ्क ॥ ७४॥

ब्रह्मास्त्रगर्वितमरिं रणसीम्नि शत्रु-खड्गाक्षमं हरवितीर्णवरः किमाह ?।
कामी प्रियां भणति किं त्वरितं रतार्थी ?, वस्त्रं परास्यसहसादयितेभवाधः ॥ ७५ ॥

अव०—वृत्तमध्यस्थितोत्तरा द्विर्गतजातिः । उः ब्रह्मणोऽस्त्रं, परस्य असिं खड्गं न सहते यः स परास्यसहः तस्य संबोधनं हे परास्यसह, तं प्रति, सादयिता खंड(डन)शील[1]ः, इभबाधः हरः इभं बाधते इति कृत्वा । वस्त्रं वसनं परास्य त्यक्त्वा हे दयिते भार्ये अधो भव ॥ ७५ ॥

प्रत्याहारविशेषा व-दन्ति नन्दी निगद्यते कीदृक् ?। आपृच्छे गणकोऽहं,किमकार्षं ग्रहगणान् वदत ? ७६

---

१ विनाशको भावीत्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"अजगणः" त्रिः समस्तः । अच् च अक् च अण् च अजगणाः, तेषां संबोधनं हे अजगणः । अजस्य हरस्य गणः प्रमथः । अजगणः गणितवान्, गण संख्याने इत् सि अद्यतनी चणि अजगण इत्यङ्गावे रूपं ॥ ७६ ॥

कीदृक्षे कुत्र कान्ता रतिमनुभवति ? ब्रूत वल्लीं क मे मुत् ?,
प्राहर्षिः कोऽत्र कस्याः स्मरति गतधनः श्रीतया पृच्छ्यतेऽदः ?।
क स्यात्प्रीतिस्तृतीयं वदति युगमिह ? कोद्यमी कामशत्रुः ?,
कामी रज्येत् प्रियायाः क च ? नयविनयी कुत्र पुत्रः प्रतुष्येत् ?॥७७॥

स्पृहयति जनः कस्मै नास्मिन् सुखे वद कीदृशे?, प्रसजति सुधीः स्यात्कीदृक्षे क वा वपुरव्यथम् ?।
सुदृशमभितः [1]पश्यन् कामी किमाह सुखी युवा?, तरलनयना मामत्रेयं स्मितास्यमितीक्षते ॥ ७८ ॥ युगलं

अव०—"पादोत्तरं, षोडशदलं कमलं विपरीतं । तते विस्तीर्णे । रते क्रीडने । हे लते वीरुत् । नते प्रणते । हे यते । ना पुरुषः । ते तव । माया लक्ष्म्या भावो माता हे माते । मतेऽभिमते । हे त्रेते तृतीययुग । एः कामस्य अंते यंते । स्मिते ईषद्धसिते । ताते पितरि ॥ ७७ ॥ षोऽन्तकर्मणि स्यतीति स्यत् तस्मै स्यते विनाशाय । मिते

१ पश्यां पश्यन् किमाह सखीन् युवा इति वा पाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तोकेऽल्पे । तीतेऽतीते, क्षते व्रणादौ । तरलनयना चञ्चलनेत्रा मां कर्मतापन्नं अत्र प्रदेशे इयं स्मितास्यं यथा भवति तथा ईक्षतेऽवलोकयति ॥ ७८ ॥

राजन् ! कः समरभरे, किमकारयदाशु किं रिपुभटानाम् ?।
कुच्छिअविलास पभणइ, केरिसं पिसुणजणहिययं ? ॥ ७९ ॥

अव०—"अहमलीलवंकं" भाषा चित्रकद्विर्गतः । अहं कर्ता, अलीलवं लूनवान्, कं मस्तकं । अधमा कुत्सिता लीला यस्य स तथा हे अधमलील कुत्सितविलासिन्, वङ्कं कुटिलम् ॥ ७९ ॥

अयि सुमुखि! सुनेत्रे सुभ्रु सुश्रोणि मुग्धे, वरतनु कलकण्ठि स्वोष्ठि पीनस्तनि त्वम् ।
वद निजगुणपाशैः किं करोषीह केषां ?, सुगुरुरपि च दद्यात्कीदृशां मन्त्रविद्याम् ? ॥ ८० ॥

अव०—"नाहंयूनां" द्विर्गतः । नह बन्धने नाहं बन्धनं, यूनां तरुणानां पुंसां । नाहंयूनां अनहङ्कारिणामित्यर्थः ॥८०॥

पृच्छामि जलनिधिरहं, किमकरवं सपदि शशधराभ्युदये ? ।
अलमुद्यमैः सुकृतिना—मित्युक्ते कीदृशः कः स्यात् ? ॥ ८१ ॥

अव०—"समुदलसः" द्विर्गतः सम् सामस्त्येन उत्प्राबल्येन अलसः शब्दितवान्, 'तुस हस लस शब्दे' ह्यस्तनी सिपि रूपं । समुत् सहर्षः, अलसः आलस्योपहतः ॥ ८१ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वदति हरिरम्भोधिं पाणिं श्रियः करवाणि किं?, किमकुरुत भो यूयं लोकाः सदा निशि निद्रया? ।
मुनिरिह सतां वन्द्यः कीदृक् तथास्मि गुरुर्ब्रुवे?, तव जडमते तत्त्वं भूयोऽप्यहं किमचीकरम्? ॥८२॥

अव०—"असस्मरः" वर्धमानाक्षरजातिः । हे अ हरे, त्वं अस प्राप्नुहि अस दीप्त्यादानयोश्चेति (त्यस्य) रूपं । असस्म सुप्तवन्तः षस स्वप्ने ह्यस्तन्यां मे रूपं । सह स्मरेण वर्तते सस्मरः, न सस्मरोऽसस्मरः । स्मारितवान् स्मृ ध्यै चिन्तायां इञः अद्य० सित्वांरिदित्वात् अभ्यासस्य (णिगः अद्यतनीसि त्वरादित्वादति अभ्यासस्य (उपान्त्यस्य) ॥ ८२ ॥

रतये किमकुर्वातां, परस्परं दम्पती चिरान्मिलितौ ।
मोक्षपथप्रस्थितमतिः, परिहरति च कीदृशीं जनताम्? ॥ ८३ ॥

अव०—"अतत्त्वरतां" द्विर्गतः । कामाय शीघ्रीभवतः । अतत्त्वे रताऽतत्त्वरता तां अतत्त्वरताम् ॥ ८३ ॥

हे नार्यः किमकार्षुरुद्धतमुदो युष्मद्वराः काः किल?, क्रुद्धः कामरिपुः स्मरं किमकरोदित्याह कामप्रिया? ।
इच्छुर्लाभमहं मनोगृहगतं रक्षामि शम्भुं सदा—ऽपीति स्वं मतमूचुषे किल मुनिः कामाशिषं यच्छति? ।८४।

अव०—"उपायंसतनोतुभद्रते" व्यस्तसमस्तजातिः । उपायंसत परिणीतवन्तः, नोऽस्मान् । अतुभत् विनाशितवान्, हे रते कामप्रिये, णभ तुभ हिंसायां अद्यतनी पुषादित्वादण् । उपायं स महेश्वरः तनोतु विस्तारयतु भद्र! ते तव ॥ ८४ ॥

१ सि, त्वरादित्वात् अत अभ्यासस्य इति शुद्धं प्रतिभाति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सरभसमभिपश्यन्ती, किमकार्षीः कं मम त्वमिन्दुमुखि ?। नयनगतिपदं कीदृक्, पूजयतीत्यर्थमभिधत्ते?॥८५

अव०—"अपप्रथमंगजं" द्विर्गतः । अपप्रथं विस्तारितवती अङ्गजं कामं । न विद्येते पकारात् प्रथमौ नकारौ यत्र तत्तथा, गस्य जकारो यत्र तत् गजं, ततो यजतीति भवति ॥ ८५ ॥

विधुन्तुदः प्राह रविं ग्रहीतुं, कीदृक्षमाहुः स्मृतिवादिनो माम् ?।
का वा न दैवज्ञवरैः स्तुतेह, प्रायेण कार्येषु शुभावहेषु ?॥ ८६ ॥

अव०—"राहोनिशविरलगमं" गतागतः । हे राहो । अनिशि अरात्रौ अविरलो गमो यस्य स तथा तं, निशाया निशू । मङ्गलरविशनिहोरा रविरादिभ्यः ( रवेरारभ्य ) होराशब्दः प्रत्येकं, प्रश्नस्तावत् ॥ ८६ ॥

अग्निज्वालादिसाम्याय, यं प्रश्नं श्रीरुदीरयत् । तेनैव समवर्णेन, प्रापदुत्तममुत्तरम् ॥ ८७ ॥

अव०—"कोपमानलाभाद्ये" समवर्णप्रश्नोत्तरजातिः । का उपमा सादृश्यं अनलाभाद्ये वस्तुनि अनलस्येव अग्नेरिव आभा च्छाया आद्या प्रथमा यस्मिन् तत् अनलाभाद्यं तत्र । उत्तरमाह—कोपमानलाभाद्या हे इ लक्ष्मि कोपश्च मानश्च लाभश्च कोपमानलाभाः ते आद्या यस्यां उपमायां सा तथा । अयमत्र भावः—अग्निज्वालासदृशः कोपः, आदिशब्दा-त्पर्वतादिः, ततः पर्वतसदृशो मानः, खञ्जनसदृशो लोभ इत्यर्थः । उत्तरेऽनुक्तापि आद्यशब्दात् माया लभ्यते, तया सदृशा गोमूत्रिका अतीव वक्रा ॥ ८७ ॥ ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कीदृक्षोऽहमिति ब्रवीति वरुणः?काप्याह देवाङ्गना,हंहो लुब्धक को निहन्ति हरिणश्रेणीं वनान्याश्रिताम्?।
कान्तन्यस्तपदं स्तने रमयति स्त्रीं किं विधिर्वक्त्यदः, किं अन्नोन्नविरोहवारणकए जंपंति धम्मत्थिणो ।८८॥

अव०—"अवरोप्परंभेमच्छरोनखमो" भाषाचित्रकजातिः । अपो जलं पातीति अप्पः तस्य संबोधनं हे अप्प वरुण (अवरः)[1]अवरदिग्वर्ती अवरस्यां दिशि यतो वसति। हे रम्भे देवाङ्गने,मम शरो मच्छरः। नखं नखक्षतं कारणे कार्योपचारात्। उर्ब्रह्मा तस्य संबोधनं हे ओ । भे भवतां परस्परं मच्छरं ( मत्सरः ) न खमो न युक्तः ॥ ८८ ॥

खड्गश्रियोर्यमब्रवीत् , प्रश्नं मुनिः किल स्वकम् । उत्तरं प्राप तत्रैव, कामेसिसेविषायते ॥ ८९ ॥

अव०—"श्लोकमध्यस्थितसमवर्णप्रश्नोत्तरजातिः" । असिः खड्गः सा लक्ष्मीस्तयोः संबोधने हे असिसे का मे मम विषायते विषवदाचरति ( इति प्रश्नः । अथोत्तरं ) हे यते कामे कामविषये सिसेविषा सेवितुमिच्छा ॥ ८९ ॥

कीदृग्भवेत्करजकर्तनकारि शस्त्रं?, क्काकारि किं रहसि केलिकलौ भवान्या ?।
कश्चित्तरुः प्रवणयश्च पृथग्विबोध्यौ, किं वा मुनिर्वदति बुद्धभवस्वभावः ?॥ ९० ॥

अव०—"नखलुभवेकोपिशमितोत्र" व्यस्तसमस्तजातिः । नखान् लुनातीति नखलु । भवे हरे । अकोपि कुपिता । हे शमि वृक्षविशेष । हे तोत्र । नैव खलु निश्चयेन अत्र भवे कोऽपि शमित उपशान्तः ॥ ९० ॥

---

१ अवरः पश्चिमापतिः इति टीकान्तरं ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुमुदैः श्रीमान् कश्चि–द्ददपात्रं प्रश्नमाह यं भूमेः। तत्रैवोत्तरमलभत्, कैरवनिवहैरमामत्र ॥ ९१ ॥

अव०—"श्लोकमध्यस्थितसमवर्णप्रश्नोत्तरजातिः।" कैः वहै वहामि हे अवनि पृथ्वि रमां लक्ष्मीं अत्र जगति, वह प्रापणे पञ्चमी ऐप्। अमा रोगास्तेषां अमत्रं भाजनं तस्य संबोधनं हे अमामत्र कैरवनिवहैः पद्मसमूहैः। अयमत्र भावः—यः किल कुमुदैः श्रीमान् स तैरेव लक्ष्मीमावहति ॥ ९१ ॥

सदाहिताग्नेः क्व विभाव्यते का ?, प्रावृष्युपास्ते शयितं क्व का कम् ?।
दीर्घेक्षणा वक्ति पुरःस्थिताऽप्यह–मवीक्ष्यमाणा प्रिय ! किं करोमि कम् ? ॥ ९२ ॥

अव०—"आयतनेत्रेतापयसिमां" व्यस्तसमस्तजातिः। आयतने गृहे। त्रेताऽग्नित्रितयं। पयसि जले। मा लक्ष्मीः। अं विष्णुं। हे आयतनेत्रे तापयसि मां कर्मभूतं ॥ ९२ ॥

लक्ष्मीर्वदति बलिजितं, त्वमीश! किं पीतमंशुकं कुरुषे ?। अपरं पृच्छामि प्रिय!, किं कुर्वेऽहं भवच्चरणौ ? ९३

अव०—"सेवसे" गतागतः। हे से लक्ष्मि। वसे परिदधामि, वस आच्छादने वर्तमाना ए। सेवसे सेवां कुरुषे ॥ ९३॥

प्रवीरवरशू(सू)दकं किल जगुर्जनाः कीदृशं ?, पयो वदति कीदृशीं नृपततिं श्रयन्त्यर्थिनः ?।
चकार किमगं हरिर्वदत विस्मये किं पदं ?, निनीषुरमृतास्पदं कथमिहाह जैनो जनान् ? ॥ ९४ ॥

अव०—"सदाजिनवरागमंबुधनरामुदासेवत" व्यस्तसमस्तजातिः। सदा नित्यं। आजिषु सङ्ग्रामेषु नवो नूतनो रागो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यस्यासौ तथा तं। हे अम्बु जल। धनं राति ददाति धनरा क्विप् तां धनरां धनदायिकां। उदासे उत्पाटितवान् उत्पूर्वोऽसू क्षेपणे परोक्षा ए। बत। हे बुधनराः पण्डितमनुष्याः! सदा नित्यं जिनवरागमं जिनेन्द्रसिद्धान्तं सेवत मुदा हर्षेण ॥ ९४ ॥

का दुरितासद्दूषण–सान्त्वक्षतिभूमिरिति कृते प्रश्ने। यत्तत्समानवर्णं त–दुत्तरं कथयत विभाव्य ॥९५॥

अव०—"कामलालसामहेला" समवर्णप्रश्नोत्तरं। मलो दुरितं, आलं अविद्यमानदूषणं, साम समतां हन्ति सामहः, मलश्च आलश्च सामहश्च ते तथा तेषामिला भूमिः का ? इति प्रश्नः। अथोत्तरं—कामलालसा महेला मारलम्पटा स्त्री ॥ ९५ ॥

हंहो शरीर कुर्याः, किमनुकलं त्वं वयोबलविभाद्यैः?।मदनरिपोर्हृत्कीदृ–ग्जैनः कथमुपदिशति धर्मम्? ९६

अव०—"जिनान्यजध्वंसदा" व्यस्तसमस्तः। जिनानि हानिं यानि वयोबलादिभिः। अजः कामस्तस्य ध्वंसं ददाति या साऽजध्वंसदा। जिनान् यजध्वं पूजयध्वं सदा नित्यम् ॥ ९६ ॥

विधत्से किं शत्रून् युधि नरपते वक्ति कमला?, वराश्वीयं कीदृक्? क च सति नृपाः स्युः सुमनसः?।
विहङ्गः स्यात्कीदृक् ?क रजति रमा पृच्छति हर–प्रतीहारी? भीरो किमिह कुरुषे ब्रूत मदनम् ?९७

अव०—"विजये" गतागतचतुर्गतः। विजये विपूर्वो जि जये वर्तमाना ए, 'विपराभ्यां जेः' (पा०१-३-१९)



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( श्रीसि० परावेर्जेः ३-३-२८ ) इत्यात्मनेपदं । याः श्रीः तस्याः संबोधनं हे ये । जवो वेगो विद्यते यस्य तज्जवि । विशेषेण जयः परेषां हननं तस्मिन् विजये सति । वेः पक्षिणो जातो विजः । अः विष्णुस्तस्मिन् ए । हे विजये शङ्कर-प्रतीहारि । विजे भयं करोमि, ओविजी भयचलनयोः वर्तमाना ए । इः कामस्तस्य संबोधनं हे ए ॥ ९७ ॥

कीदृग्भाति नभो ? न के च सरुजां भक्ष्या ? नृपः पाति कं ?,
वादी पाशुपतो विवाद उदयद्दुःखः शिवं वक्ति किम् ? ।
निर्दम्भेति यदर्थतः प्रणिगदेद्रूपं विपूर्वाच्च तत्,
मीनातेः कमपेक्ष्य जायत इति क्त्वाप्रत्ययः पृच्छति ? ॥ ९८ ॥

अव०—"भवद्यवादेशं" व्यस्तं द्विः समस्तं । भं नक्षत्रं विद्यते यत्र तत् भवत् । यवाः । देशं । हे भव शङ्कर द्य खण्डय वादे पक्षप्रतिपक्षपरिग्रहरूपेऽशं दुःखं । भवतस्तव क्त्वाप्रत्ययस्य यबादेशो भवद्यबादेशः तं, इदं क्त्वाप्रत्ययं प्रत्युत्तरदातुर्वचनं । अयमत्र भावः—यादृशं निर्दम्भशब्देनार्थतो रूपमभिधीयते, तादृशं विपूर्वस्य मीनातेः क्त्वाप्रत्य-यस्य यबादेशे सति भवति । तथाहि—निर्दम्भशब्देन निर्गतमाय उच्यते, अनेनापि विमाय इति स एवार्थः ॥ ९८ ॥

स्मृत्वा पक्षिविशेषेण, जग्धं कमपि पक्षिणम् । वृष्णिवंशोद्भवो लक्ष्मी—मप्राक्षीत् किं समोत्तरम् ? ॥९९॥

१ बिभेमि इति टीकान्तरपाठः साधुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"यादवकङ्कः" व्यस्तसमस्तः। हे इ लक्ष्मि आद भक्षितवान् बकं पक्षिणं कः इति प्रश्नः। प्राह—हे यादव वृष्णिवंशोद्भव कङ्कः पक्षिविशेषः ॥ ९९ ॥

प्रपञ्चवञ्चनचणं, ध्यात्वा कमपि देहिनम्। विश्वम्भरा यदप्राक्षी–त्ततः प्राप तदुत्तरम् ॥ १०० ॥

अव०—"कोनालीकः" समवर्णजातिः। को ना पुरुषोऽलीकः ?। हे को पृथ्वि नालीको मूर्खः ॥ १०० ॥

जात्यतुरगाहितमतिर्लक्ष्मीपतिमप्सरो विशेषपतिः। यैर्वर्णैर्यदपृच्छत्तैरेव तदुत्तरं प्रापत् ॥ १०१ ॥

अव०—"मेनकाजानेययुता" पूर्वोक्ता जातिः। माया इनो मेनः तत्संबोधनं हे मेन लक्ष्मीपते का आजानेययुता कुलीनाश्वयुता ?। उत्तरं—मेनका जाया यस्य स मेनकाजानिस्तस्य संबोधनं हे मेनकाजाने अप्सरोविशेषपते ययुता ययोर्भावो ययुता अश्वता, जायाया जानिरिति विशेषलक्षणात् ॥ १०१ ॥

केन केषां प्रमोदः स्या–दिति पृच्छन्ति केकिनः। संगीतके च कीदृक्षाः, प्राह शंभुर्न भान्ति के ॥१०२॥

अव०—"नीरवाहरवेणवः" द्विर्गतः। नीरं जलं वहतीति नीरवाहो मेघो जीमूतस्तस्य रवः शब्दस्तेन वो युष्माकं। नीरवा निर्गतरवा अशब्दा वेणवो वंशा हे हर शङ्कर ॥ १०२ ॥

---

१ द्यूतकृत् इति टीकान्तरम्। २ घोटिकासमूहः इति टीकान्तरम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कश्चिद्दैत्यो वदति दनुजान् घ्नन् हरे! किं किमाधाः?, शक्रात्प्राहुः पृथगुदधिजाकान्तवैवस्वतान्ताः।
क्षिप्तः कश्चित् किल ललनया मन्मथोन्माथदुःस्थः,सख्या चख्ये कथमथ मनःखेदविच्छेदहेतोः ॥१०३॥

अव०—"कंसमानमायमकालावसान" गतागतजातिः। हे कंस, मानं पूजां, आयं लेभे इण् गतावित्यस्य ह्यस्तन्या अमि वृद्धौ सत्यां रूपं। हे अ विष्णो, हे काल, हे अवसान। साऽबला स्त्री कामयमानं अभिलषन्तं आस चिक्षेप कं न? अपि तु सर्वमपि क्षिप्तवती ॥ १०३ ॥

जननीरहितनरोद्भवलक्ष्मीः सितकुसुमभेदगतबुद्धिः। सध्रीचीं यदपृच्छत्तदुत्तरं प्राप तत एव ॥ १०४ ॥

अव०—"प्रसूनपुञ्जेनवमालिका" समवर्णप्रश्नोत्तरजातिः। प्रसूनपुञ्जे कुसुमनिकरे, अनवमा प्रधाना, हे आलि सखि, का? इति प्रश्ने उत्तरं—प्रसूर्माता तया ऊनः प्रसूनः जननीरहित इत्यर्थः, स चासौ पुमांश्च प्रसूनपुमान्, तस्माज्जाता प्रसूनपुञ्जा, सा चासौ ईश्च लक्ष्मीश्च तस्याः संबोधनं हे प्रसूनपुञ्जे जननीरहितपुरुषोद्भवलक्ष्मि नवमालिका नवा चासौ मालिका च नवमालिका ॥ १०४ ॥

देवीं कमलासीना—मन्तकचिरनगररक्षकः स्मृत्वा। यदपृच्छत्तत्रोत्तर—मवाप कालीयमानवपुरत्र ॥१०५॥

अव०—'श्लोकमध्यस्थितसमवर्णजातिः'। का लीयमानवपुः श्रीयमाणशरीरा अत्र जगति? इति प्रश्ने उत्तरं—काली देवता, यमस्य अनवं पुरातनं यत्पुरं नगरं तत्रायते यः स तथा तस्य संबोधनं हे यमानवपुरत्र ॥ १०५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सैन्याधिभूरभिषिषेणयिषुस्त्वदीयः, किं किं करोति विजयी नृपते! हठेन ?।
कीदृक् च मन्मथवतः प्रतिभाति कान्ता, पत्नीहितो वदति चेतसि कस्य पुंसः ?॥ १०६ ॥

अव०—“मदनमञ्जरीगृह्यते” द्विर्गतः। मम न नमतीति मदनमः यो मत्प्रणामं न करोति तं, जरीगृह्यते अत्यर्थं गृह्णाति। गृहाः कलत्राणि तासां (तेषां) हितो गृह्यः तस्य संबोधनं हे गृह्य पत्नीहित ते तव मदनस्य मन्मथस्य मञ्जरीव मदनमञ्जरी तद्वदाभासत इत्यर्थः॥ १०६ ॥

कीदृक्षा किं कुरुते, रतिसमये कुत्र गोत्रभिदि भामा ?। कस्मै च न रोचन्ते, रामा यौवनमदोद्दामाः ? १०७

अव०—“भवदरतीरमतये” पूर्वोक्ता जातिः भवन्ती अरतिर्यस्याः सा भवदरती सती, रमते, ए विष्णौ। भवा-दरो भवदरः तस्य तीरं मोक्षस्तत्र मतिर्यस्य स तथा तस्मै मोक्षार्थिने इत्यर्थः॥ १०७ ॥

सिन्धुः काचिद्वदति विदधे किं त्वया कर्म जन्तो?, यज्वा कस्मिन् सजति?हरिणाः क्वोल्लसत्युद्विजन्ति ?।
ब्रूते वज्रं पदमुपमितौ किं रविः पृच्छतीदं?, देहिन्! बाधाभरविधुरितः कुत्र त्वं किं करोषि ?॥१०८॥

अव०—“रेमेसदपवाभदेवे” मञ्जरीसनाथजातिः। हे रेवे नर्मदे। मेवे बद्धवान्। सवे यज्ञे। दवे दावानले। हे पवे। वाशब्दो विकल्पार्थोपमयोरितिवचनात्। हे अवे आदित्य, ‘अवयः शैलमेषार्का’ इतिवचनात्। भवे संसारे। देवे शुचं करोमि, ‘देवृङ्’ देवने इतिवचनात्॥ १०८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्तो कम्मि परम्मुहा ? घरमुहे सोहा कहिं कीरए ?, रूढे कम्मि रसंति दुट्ठकरहा ? कम्मिं बहुत्तं ठियं ? ।
दिट्ठे कत्थ य दूरओ नियमणे कत्थुल्लसंते दुअं, के मुंचंति धणुद्धर त्ति भणिरं मज्जायमामंतसु ॥ १०९ ॥

अव०—"रेमेसदपवाभदेवे" विपरीतमञ्जरीसनाथजातिः । वेरें वैरे । देरे द्वारे । भरे भारे । वारे सङ्घाते । परे वैरिणि दृष्टे सति दरे भये उल्लसति । शरे शरान्मुञ्चति । हे मेरे मर्यादे ॥ १०९ ॥

मिथ्याज्ञानग्रहग्रस्तैः, किं चक्रे क किलाङ्गिभिः ?। काभीष्टे का भवेत्कीदृ—गिति जैन ! वद क्षितेः ॥११०॥
त्रिभिः कुलकम् ॥

अव०—"रेमेसदपवाभदेवे" गतागतः । रेमे रमितं । पुनातीति पवा पवित्रा, न पवाऽपवाऽपवित्रा, सा चासाऽवाभा च अपवाभा, सती विद्यमाना अपवाभा यस्य स तथा, स चासौ देवश्च स तथा । वेदेऽभीष्टे भवापत्संसारापत् असमाऽनन्यतुल्या, हे इरे भूमे, 'इरा भूवाक्सुराः स्यु'रितिवचनात् ॥ ११० ॥

भाद्रपदवारिबद्धं, सितशकुनिविराजितं वियद्वीक्ष्य । कं प्रश्नं सदृशोत्तर—मकष्टमाचष्ट विस्पष्टम् ॥१११॥

अव०—"नभस्यकनद्धबलाका" । नभसि आकाशे अकनत् शुशुभे धवला का ? । नभस्यं भाद्रसंबन्धि तच्च तत् कं च पानीयं च, तेन नद्धो बद्धः तस्य संबोधनं हे नभस्यकनद्ध । बलाका ॥ १११ ॥

भूरभिदधाति शरदिन्दुदीधितिः केह भाति पुष्पभिदा ?। प्रथमप्रावृषि वर्षति जलदे कः कुत्र संभवति ? ११२



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"हेवनिनवमालिका" गतागतः। हे अवनि पृथ्वि, नवा चासौ मालिका च सा तथा। कालिमा कृष्णता, कस्मिन्? वननिवहे ॥ ११२ ॥

कीदृक्षः सन्निहपरभवे कीदृशः स्याद्धितैषी ?, कीदृक्का स्याद्दद गदवतामत्र दोषत्रयच्छित् ?।
का कीदृक्षा पुरि न भवतीत्याहतुर्वारिभृङ्गौ?, कीदृश्यो वा कुवलयदृशः कामिनः कीदृश स्युः ?॥११३॥

अव०—"सदयः, मधुरता, विपण्यावली, गौरवपुषः"। सदयः सह दयया वर्तत इति सदयः। इहभवे परभवे च सन् शोभनोऽयो लाभो यस्यासौ तथा। मधुरता माधुर्यं। मधुनि रता मधुसक्ता। मधुरसंबन्धि माधुर्यं दोषत्रयापहारि भवतीत्यर्थः। विपण्यावली आपश्च अलिश्च अवली तयोः संबोधनं हे अवली जलमधुकरौ संबोधने द्विवचने तद्रूपं। विपण्या विक्रेयद्रव्यरहिता विपण्यावली हट्टपङ्क्तिः विक्रेयद्रव्यरहिता न भवतीत्यर्थः। गौरवपुषः गौरं वपुर्यासां ता गौरवपुषः। गौरवं पुष्णन्तीति गौरवपुषः ॥ ११३ ॥

मुदा श्रयति कं ब्रूते, वर्णः कोऽपि सदैव का ?। ध्वान्तेऽन्ययाऽन्वितं वीक्ष्य, प्राहोमा किं हरं रुषा ?॥११४॥

अव०—"अंधकारे" चतुर्गतः। अं विष्णुं। हे धकार। ईर्लक्ष्मीः। अन्धकारे तमसि। अन्धको नाम दानवस्तस्यारिर्महेश्वरस्तस्य संबोधनं हे अन्धकारे हे महेश्वर। लोचनरहित। का रे ॥ ११४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमी कत्थ ठिया भणेइ गणिया? रन्नो पहुत्तं कहिं?, केली कत्थ करेसि किं हरिणहे दिट्ठे? कहिं तक्खणं?।
आमंतेसु करेणुअं पभणए नक्खत्तलच्छी कहिं?,लोआ बिंति कयंत्तणं? भण कहिं मुद्धे धरेमो मणं ॥११५॥

अव०—"सेवेदेहतपावभवावासे" मञ्जरीसनाथजातिः। सेसे शेषे नागराजे। हे वेशे (वेश्ये)। देशे जनपदे। हसे हास्ये। तसे त्रसे, तसी त्रसी उद्वेगे उद्विजे। पाशे बन्धने। हे वशे करेणुके। "वेसा(शा)श्चतस्रो वन्ध्या गौः मतार्यः (र्या च) करेणुका" इति। भं नक्षत्रं सा लक्ष्मीः तयोः संबोधनं हे भसे लक्ष्मीनक्षत्रे। वासे व्यासे, व्यासः ताली दत्वा कवित्वं करोतीत्यर्थः। वासे मते जिनादौ ॥ ११५ ॥

किं कुरुषे कौ जन्तो ?, विष्णुः प्राह क कर्मविवशस्त्वम् ?।
का क्रियमाणा कीदृक् ?, कुत्र भवेद्धक्ति करवालः ? ॥ ११६ ॥ युगलकम् ॥

अव०—"सेवेदेहतपावभवावासे" गतागतः। अहं सेवे देहतपौ अनुभवामि, देहश्च तपश्च, तप धूप संतापे तपतीति तपः इ(अ)चू। हे अ विष्णो हरे, भवावासे। सेवा, अवा रक्षिका अवतीति अवा, भवे पातं हन्ति भवपातहः, स चासौ देवश्च स तथा तस्मिन्। हे असे खड्ग ॥ ११६ ॥



---

१ कइत्तणं। २ अयं पाठोऽशुद्धः प्रतिभाति अथ कथंचित्संगमनीयस्तदा " वशाः नाम वशाशब्दवाच्याः चतस्रः ता एवाह वन्ध्या, गौः, मातार्या करेणुका, इति, मतार्या च आदेशकारिणी स्त्री।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

**कपटपटुदेवतार्चां, बुद्धिप्रभुतोद्भवो नरः स्मृत्वा। समवर्णवितीर्णोत्तर–मकष्टमाचष्ट कं प्रश्नम्?॥११७॥**

अव०—"कंसमायंध्यायतिजनः"। कं देवविशेषं, समायं सह मायया वर्तत इति समायः मायायुक्तस्तं, ध्यायति पूजयति, जनो लोकः? इति प्रश्नः। कंसं मीनाति हिनस्ति कंसमायः, कर्मण्यण्, मीनातीत्यादिनाऽकारप्रत्ययः, माय इति सिद्धं, कंसमायं विष्णुं। धीर्बुद्धिः आयतिर्दीर्घता प्रभुतेत्यर्थः। ततो दीर्घस्य भाव इति कृत्वा ध्यायती, ताभ्यां जातः ध्यायतिजः, स चासौ ना च पुरुषश्च तस्य संबोधनं हे ध्यायति जनः॥ ११७॥

**भृङ्गः प्राह नृपः क्व रज्यति बत? स्थैर्यं न कस्मिन् जने?, युद्धं वक्ति दुरोदरव्यसनिता कुत्र? क्व भूम्ना गुणाः?। कस्मिन् वातविधूनिते तरलता ब्रूते सखी कापि मे?, कोद्गच्छत्यभि वल्लभं विलसतोऽसङ्कोचने लोचने?११८**

अव०—"अवलोकनकुतूहले" अष्टदलं विपरीतं कमलं। हे अले भ्रमर। बले सैन्ये। लोले चञ्चले। हे कले युद्ध। नले राजनि। कुले प्रधानकुले। तूले। हले सखि। अवलोकनकौतुके उद्गच्छति सति॥ ११८॥

**कीदृक्षमन्तरिक्षं स्या–न्नवग्रहविराजितम्?। हनूमता दह्यमानं, लङ्कायाः कीदृशं वनम्?॥ ११९॥**

अव०—"गुरुशिखिविधुरविज्ञशि (सि) तमंदारागुरुचितं"। गुरुर्बृहस्पतिः। शिखी केतुः। विधुः सोमः। रविः आदित्यः। ज्ञो बुधः। शि (सि) तः शुक्रः। मन्दः शनैश्चरः। आरो मङ्गलः। अगू राहुः। तैः रुचितं दीप्तं।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुर्विस्तीर्णः शिखी वह्निस्तस्य विधुरो व्यसनं, तत्र विज्ञाः, ते च ते सिता मन्दाराश्चागुरवश्च, तैश्चितं संभू (भृ) तं गुरुशिखिविधुरविज्ञसितमन्दारागुरुचितं॥ ११९ ॥

श्रुतिसुखगीतगतमनाः, श्रीसुतबन्धनवितर्कणैकरुचिः। प्रश्नं चकार यं किल,तदुत्तरं प्राप तत एव॥१२०॥

अव०—"काकलीभूयमनोहरते" समवर्णप्रश्नोत्तरजातिः। का कलीभूय कोमलीभूय मनो हरते ? काकली गीतं, ईर्लक्ष्मीस्तस्या भवतीति ईभूः तस्य यमनं बन्धनं, तस्मिन् ऊहो वितर्कस्तत्र रतिर्यस्य स तथा तस्य संबोधनं हे ईभूयमनोहरते ॥ १२० ॥

स्मरगुहराधेयान् किल, दृष्ट्वाऽग्रेऽङ्गारशकटिकाऽपृच्छत्। किं शत्रुश्रुतिमूलं, प्रश्नाक्षरदत्तनिर्वचनम् ॥१२१॥

अव०—"इहारिकर्णजाहसन्तिके"। इहात्र। हे अरिकर्णजाह शत्रुकर्णमूल सन्ति विद्यन्ते के ? उत्तरं—इः कामः[1], हरस्यापत्यं हारिः कार्तिकेयः, कर्णजः कर्णसुतः, ते सन्ति, अग्रे हे हसन्तिके अङ्गारशकटिके ॥ १२१ ॥

जन्तुः कश्चन वक्तिका क रमते?प्रोचुः कचान् कीदृशान्,ब्रह्मादित्रयमत्र कः कृशयति?केडागमःस्याज्जनेः?।
किं वाऽनुक्तसमुच्चये पदमथो धातुश्च कोभर्त्सने?,किं सूत्रं सुधियोऽध्यगीषतबुधा विश्रान्तविद्याधराः?१२२

अव०—"झष्येकाचोवशः स्ध्वोश्च भष्"। हे झषि शफरि। ईर्लक्ष्मीः, ए विष्णौ। कं मस्तकमञ्चन्ति पूजयन्तीति

[1] मदनः।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काचः शसन्तस्य रूपमिदं। उर्ब्रह्मा, उः शंकरः, अः विष्णुः, उश्च उश्च अश्च वाः तान् श्यति तनूकरोति वशः। सकारध्वप्रत्यययोरिङ् जनेः स्ध्वोश्चेत्यनेन। चकारः। भष् भर्त्सने इति वचनात्। झष्येकेत्यादि विश्रान्तविद्याधरा व्याकरणसूत्रं, सूत्रोत्तरजातिः ॥ १२२ ॥

याच्ञार्थविततपाणिं, द्रमकं स्मृत्वा सदर्थलोभेन। यैर्वर्णैर्यदपृच्छत्तैरेव तदुत्तरं लेभे ॥ १२३ ॥

अव०—"तत्वाययाचकरङ्कः"। तत्वा विस्तार्य करं हस्तं ययाच याचितवान् कः?। उत्तरं—तत्वाय लाभाय लाभनिमित्तं याचकश्चासौ रङ्कश्च स तथा ॥ १२३ ॥

मानं कुत्र? क्व भाण्डे नयति? लघु(सु)धामाप्तिराहानुकम्पा?,
शैत्यं कुत्र? क्व लोको न सजति? तुरगः कार्य्यते? क्व व्यवस्था?।
श्रीर्ब्रूते मुत् क्व पुंसां? क्व च कमलतुला? मूलतः काशुचित्वं,
कस्मै सर्वोऽपि लोकः स्पृहयति पथिकैः सत्पथे किं प्रचक्रे? ॥ १२४ ॥

अव०—"मेनेमदतोक्षरनयशकारातेये" मञ्जरीसनाथजातिः। मेये द्रव्ये। नेये नेतव्ये। मये उष्ट्रे। हे दये अनुकम्पे। तोये पानीये। क्षये विनाशे। रये वेगे। नये नीतौ। या लक्ष्मीः तस्याः संबोधनं हे ये ए विष्णौ। शये पाणौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कमलवद्धस्त इति दर्शनात् । काये शरीरे । राये द्रव्याय । तेये गतं । अय वय तय मयेत्यादिना गतौ ॥ १२४ ॥

किं चक्रे रेणुभिः खे ? क सति निगदति स्त्री रतिः क्वानुरक्ता ?,
क्वाक्रोधः ? क्रूरताऽत्र क च वदति ? जिनः कोऽपि लक्ष्मीश्च भूश्च ।
विष्णुस्थाण्वोः प्रिये के ? परिरमति मतिः कुत्र नित्यं मुनीनां?,
किं चक्रे ज्ञानदृष्ट्या ? त्रिजगदपि मयेत्याह कश्चिज्जिनेन्द्रः ॥ १२५ ॥

अव०—"मेनेमदतोक्षरनयशकारातेये" विपर्यस्तमञ्जरीसनाथजातिः । येमे परोक्षायां रूपं उपरतं । तेमे आर्द्रभावे सति । हे रामे स्त्रि । कामे मन्मथे । शमे उपशमे । यमे कीनाशे । हे नमे जिन । हे रमे लक्ष्मि । हे क्षमे पृथ्वि । ता लक्ष्मीः, उमा गौरी, ता च उमा च तोमे । दमे शमे । ममे आकलितं । हे नेमे जिनेन्द्र ॥ १२५ ॥

किमकृत कुतोऽचलक्रमविक्रमनृप आह सुभगतामानी कश्चिदलं स्वं ।
कस्मै स्त्रीणां किं चक्रे का कस्मात्कस्य वद मत्कुण मम त्वम् ? ॥ १२६ ॥

अव०—"मेनेमदतोक्षरनयशकारातेये" गतागतः, त्रिभिर्विशेषकं । मेने मनितं । मदतोऽहङ्कारात् । अक्षरोऽचलो नयो नीतिर्यस्यासावक्षरनयः, शको राजा तस्यारातिर्वैरी विक्रमः शकारातिः, ततोऽक्षरनयश्चासौ शकारातिश्च स तथा



---

१ अयि वयि तयि इतिधातोः परोक्षा ए इत्यादिरूपं इति टीकान्तरम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य संबोधनं हे अक्षरनयशकाराते। अये कामाय, इः कामः चतुर्थ्येकवचनम्। डोडेरनेनैकारः अय्। अहङ्कारात् स्वं द्रव्यं स्त्रीणां कामार्थं हे राजन् अलं अत्यर्थं तेन सुभगतामानिना कृतं, अक्षरनयेत्यादिना अचलक्रमत्वं सूचितमित्यभिप्रायः। येते यत्नं कृतवती, यती प्रयत्ने परोक्षायां। रांका पूर्णमासी तस्या रात्रिः शयनरक्षतो निद्रारक्षणात् दमने मे मम॥ १२६॥

पाता वः कृतवानहं किमु? मृगत्रासाय कः स्याद्वने?,
कोऽध्यास्ते पितृवेश्म? कः प्रमदवान्? कः प्रीतये योषिताम्?।
हृद्यः कः किल कोकिलासु? करणेषूक्तः स्थिरार्थश्च को?,
दृष्टे क्व प्रतिभाति को लिपिवशाद्वर्णः? (र्णोऽ) पुराणश्च कः?॥ १२७॥

अव—"आदशकंधरवधेनवः" मञ्जरीसनाथजातिः। आवः रक्षितवान् पाता सन् त्वं अस्मान् रक्षितवानित्यर्थः। अव रक्ष पालने ह्यस्तन्यां सिवि रूपं। दवो दावानलः। शवः मृतकं। कं सुखं वाति गच्छति कंवः। धवः भर्ता। रवः शब्दः। बवः यः कृष्णचतुर्दश्यां भवति सिद्धान्तप्रसिद्धः, तत्र हि बवे कार्यमारब्धं स्थिरं भवतीत्यर्थः। धकारे दृष्टे वकारः। नवः अपुराणः॥ १२७॥

---

१ राका रजस्वला कन्या कर्तृ, कस्मात् शयनरक्षत इत्यादि टीकान्तरमतम्।

प्र० ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लङ्केश्वरवैरिवैष्णवाः केऽप्याहुः प्रीतिरकारि केन केषाम् ?।
किमकृत कं विक्रमासिकालः ? क्ष्माधरवारुणबीजगाव आख्यन् ॥ १२८ ॥

अव०—"आदशकंधरवधेनवः" युगलकं । आ समंतादृशकन्धरस्य रावणस्य वधः स तथा तेन वो युष्माकं हे लङ्केश्वरवैरिवैष्णवाः तद्वधेन भवतां समन्तात्प्रीतिरुत्पादितेत्यर्थः । आद भक्षितवान्, शकं राजानं । हे धर पर्वत, बं वारुणबीजं मान्त्रिकप्रसिद्धं, धेनवः गावः ॥ १२८ ॥

प्राह रविर्मद्विरहे, कैस्तेजःश्रीः क्रमेण किं चक्रे ?। कीदृशि च नदीतीर्थे, नावतितीर्षन्ति हितकामाः ? १२९

अव०—"अहिमकरभैरवापे" । हे अहिमकर आदित्य भैर्नक्षत्रैः अवापे लब्धा । अहिमकरैर्भैरवा भीषणा आपः पानीयानि यत्र तीर्थे तत्तथा तस्मिन् ॥ १२९ ॥

स्थिरसुरभितया ग्रीष्मे, ये रागिष्ठा विचिन्त्य तान्प्रश्नम् । यं चक्रे करिपुरुष—स्तदुत्तरं प्राप तत्रैव ॥ १३० ॥

अव०—"केसरागजनरुचिताः" । सह रागेण वर्तन्त इति सरागाः, ते च ते जनाश्च तेषां रुचिताः के ? इति प्रश्नार्थः । उत्तरं—केसरा बकुलाः गजस्य ना पुरुषः गजना तस्य संबोधनं हे गजनः हे हस्तिपक, उचिताः प्रशस्याः ॥ १३० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणतजनितरक्षं कीदृगर्हत्पदाब्जं ?, वदति विगलितश्रीः कीदृशं कामिवृन्दम् ? ।
प्रणिगदति निषेधार्थं पदं तन्त्रयुक्त्या, कृतिभिरभिनियुक्तं किं किलाहं करोमि ? ॥ १३१ ॥

अव०—"नत्वमसि" । ( द्विः समस्तः ) नमतीति नत् क्विप् तगागमः पञ्चमलोपश्च नत् तं अवति रक्षति नतूः संप्रसारणं, नपुंसकत्वे नतु । न विद्यते मा लक्ष्मीर्यस्यासौ अमस्तस्य संबोधनं हे अम गतलक्ष्मीक । सि सह इना कामेन वर्तत इति सहस्य सादेशे सति से इति भवति, ततः स्वरो ह्रस्व इति ह्रस्वः । कोऽर्थः ? कामेन सह वर्तत इत्यर्थः । हे नकार त्वमसि निषेधार्थः ॥ १३१ ॥

दम्पत्योः का कीदृक्के कं भेजुरिति सुनृपते! ब्रूहि?।मुक्ताः कयाद्रियन्ते,वदत्यपाच्यश्च मदनध्रुक् कीदृक्?१३२

अव०—मन्थानजातिः, "मायानमदनदा, दानदमनयामा, हारदामकाम्यया, याम्यकामदारहा" । माया निकृतिः न मदनदा न कामदा । दानदमनया मा मां नृपतिं दानं च दमश्च नयश्च ते दानदमनयाः कर्तारो मां कर्मतापन्नं श्रयन्ति, मय्याश्रिता भवन्तीत्यर्थः । हारदामकाम्यया हारयष्टिवाञ्छया मौक्तिकहाराभिलाषेण मुक्ताफलानि आद्रियन्त इत्यर्थः । यमस्येयं यामी तस्यां भव आगतो वा याम्यस्तस्य संबोधनं हे याम्य दाक्षिणात्य, कामदारं[1] मन्मथभार्यां हन्ति कामदारहा मन्मथकलत्रविनाशकः ॥ १३२ ॥

---

१ कामदारान् इति स्यात् कलत्रवाचकदारशब्दस्य नित्यबहुवचनान्तत्वात् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते (के) कीदृशाः क्व कृतिनो ? व्यञ्जनमाह रिपवोऽनमन् कस्मै ? ।
कां पातीन्द्रः पट्टो ब्रवीति ? कीदृक् क्व भूः प्रायः ? ॥ १३३ ॥

अव०—मन्थानजातिः, "ये रता जिनमते, तेमनजितारये, लेखराजिमासन, नसमाजिराखले" । ये रता अभियुताः जिनस्य मतं जिनमतं तस्मिन् । हे तेमन व्यञ्जन जिता अरयो येन स तथा तस्मै । लेखराजिं लेखश्रेणिं[1] पातीत्यर्थः, हे आसन पट्ट । न समाजिरा समप्राङ्गणा खले ॥ १३३ ॥

वर्षाः शिखण्डिकलनादवतीर्विचिन्त्य, शैलाश्ववक्त्रदहनाक्षरवावदूकान् ।
लक्ष्मीश्च नष्टमदनश्च समानवर्ण–दत्तोत्तरं कथय किं पृथगुक्तवन्तौ ? ॥ १३४ ॥

अव०—"कदागमयुरगादिनः केकास्तेनिरे" । कदा कस्मिन् काले । अगः पर्वतः । मयुरश्ववक्त्रं[2] । रो दहनाक्षरो मान्त्रिकप्रसिद्धः । गदतीति गादी वावदूकः । अगश्च मयुश्च रश्च गादी च अगमयुरगादिनः तेषां संबोधनं हे अगमयुरगादिनः । के कर्तारः, काः कर्मतापन्नाः, तेनिरे विस्तारितवन्तः इति प्रश्नार्थः । उत्तरं–कं पानीयं तद्ददातीति कदो मेघः, तस्यागमः स तथा तस्मिन् । उरगान् सर्पानदन्तीति उरगादिनो मयूराः कर्तारः । केका मयूरध्वनयः (ताः) कर्मतापन्नाः । ता लक्ष्मीः तस्याः संबोधनं हे ते लक्ष्मि । इः कामः, निर्गत इः कामो यस्यासौ निरिः कामर-

१ देवश्रेणिम् । २ वक्त्रः इति स्यात् मयुशब्दपर्यायस्य अश्ववक्त्रशब्दस्य किंनरवाचकत्वेन नित्यपुँल्लिङ्गत्वात् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितस्तस्य संबोधनं हे निरे निष्काम। कदागमे घनागमे सति उरगादिनो मयूराः केका मयूरध्वनीन् विस्तारयन्ति स्मेत्यर्थः ॥ १३४ ॥

संबोधयार्धमहिमांशुकरैः स्वभावं, कुर्वे कि(क)मित्यभिदधाति किलार्द्रभावः ?।
क्षान्ति वद प्रहरमाह्वय पृच्छ पुच्छं, ब्रूयास्तनूरुहमुदाहर मातुलं च ॥ १३५ ॥

अव०—"नेवस्तेशयाल्लूलोमाम" मञ्जरीसनाथजातिः। हे नेम अर्ध, वम त्यज, हे स्तेम आर्द्रभाव, तिम तीम ष्टिम ष्टीम आर्द्रभावे। आदित्यकरेषु सत्सु आर्द्रभावो न भवतीत्यर्थः। हे शम उपशम। हे याम प्रहर। हे लूम पुच्छ। हे लोम रोमराजे। हे माम मातुल ॥ १३५ ॥

किं कुर्या हरिभक्तिमाह कमला कुत्र च्युते चाटुभिः ?,
कीदृक्षे किल शुक्रशुक्रवचसी कश्चित्खगं प्राहतुः ?।
ज्ञानं कीदृशि मोहभूरुहि भवेदिभ्यैः क्व चारुह्यते ?,
वक्त्यार्किः क्व चुरा चकास्ति विमले कस्मिन्सरोजावली ? ॥ १३६ ॥

अव०—"नेवस्तेशयाल्लूलोमाम" विपर्यस्तमञ्जरीसनाथजातिः। मने मनिता। मानेऽहङ्कारे च्युते सति। हे इ कमले हरेः संबन्धिभिर्बहुभिः चाटुकारैः अहङ्कारे माने च्युते व्यतीते सति हरेर्विष्णोः संबन्धिनीभिर्भक्तिभिः त्वया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मने मनिता इत्यर्थः । लेन लकारेण ऊने लोने खगे इति शुक शुक इत्यर्थः । लूने छिन्ने । याने वाहने । हे शने शनैश्चर । स्तेने चौरे । वने पानीये ॥ १३६ ॥

किं कुरुथः के कीदृशकौ, वामलसौ पृच्छति तनूरुहरोगः ।
छेत्तुमवाञ्छन् वरमारामं, केनाप्युक्तः कोऽपि किमाह ॥ १३७ ॥

अव०—"नेवस्तेशयालूलोमाम" गतागतः । त्रिभिरेकमुत्तरं । न इवः न गच्छावः, इण् गतौ वर्तमानावसिरूपं । ते लक्ष्म्यौ कर्त्र्यौ । शयालू आलस्येन शयालू शयनशीलौ कर्मतापन्नौ, आलस्येन शयनशीलौ भव(न्त्यौ)न्तौ कर्मतापन्नौ लक्ष्म्यौ कर्त्र्यौ नाश्रयत इत्यर्थः । लोम्नां आमः रोगः लोमामः तस्य संबोधनं हे लोमाम । मम मे अलोलूया अलवितुमिच्छा, शस्ते, वने ॥ १३७ ॥

का कीदृक्षा जगति भविनां वक्ति मृत्यूग्ररोगः ?, शोचत्यन्तः किल विधिवशात्कीदृगित्युत्तमा स्त्री ? ।
गम्भीराम्भःसविधजनता कीदृशी स्याद्भयार्ता ?, ब्रूते कोऽपि स्मरपरिगतोऽरक्षि का भूरिभूपैः ? ॥१३८॥

अव०—मन्थानजातिः, "तागत्वरीमरक, करमरीत्वगता, सारतरीपरमा, मारपरीतरसा" । ता लक्ष्मीः गत्वरी हे मरक।कर१-

१ दासभावम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मरीत्वं गता सती शोचति । सारा चासौ तरी च सारतरी तस्यां परमा प्रधाना । हे मारपरीत मन्मथायत्त, रसा भूमिः ॥ १३८ ॥

सान्त्वं निषेधयितुमाह किमुग्रदण्डः?, स्वामश्रियं वदति किं रिपुसाच्चिकीर्षन् ? ।
नम्रः स्थिरो गुरुरिहेति वदन् किमाह ?, ये घ्नन्ति शत्रुकमलां किल ते किमूचुः ? ॥ १३९ ॥

अव०—"मन्थानजातिः, "साम धारि मा त्वया, यात्वमाऽरिधाम सा, नेह गरिमोद्यातां, तां घ्नामोऽरिगहने" । साम नीतिः धारि मा त्वया सामनीतिस्त्वया न धरणीयेत्यर्थः । धृञ् धारणे अद्यतनी भावे तंनि तमामेत्यादिनाऽट्प्रतिषेधः । यातु व्रजतु, अमाऽलक्ष्मीः, अरिधाम शत्रुगृहं, सा प्रसिद्धा । न इह गरिमा गुरुत्वं उद्यातां धावतां चपलानामित्यर्थः । तां कमलां घ्नामः खण्डयामः अरिगहने शत्रुगहने सिद्धाम् ॥ १३९ ॥

का स्त्री ताम्यति कीदृशा स्वपतिना ? विद्या सदा किंविधा ?,
सिध्येद्भक्तिमतोऽथ लोकविदिता का कीदृगम्बा च का । ?
किम्भूतेन भवेद्धनेन धनवान् सांख्येन[2] पुंसेष्यते ?,
कीदृक्षा प्रकृतिर्वसन्तमरुतोत्कण्ठा भवेत्[3] कीदृशा ? ॥ १४० ॥

---

१ विश्रान्तविद्याधरीयं ( कातन्त्रीयम् ) । २ सांख्यैश्च इति वा पाठः । ३ दधे इति वा पाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अव०—"मयाध्यासामासयुवाता" मञ्जरीसनाथजातिः । मताऽभिमता, याता बहिर्गच्छता । यदा भर्ता बहिर्गच्छति तदाऽभिमता स्त्री ताम्यतीत्यर्थः । ध्याता सती । सा लक्ष्मीः, ता श्रीः अथवा अता चञ्चला इति विदितेत्यर्थः । माता जननी । सता विद्यमानेन । युता सहिता आत्मना सहिता प्रकृतिः सांख्यैः इष्यते । वाता कम्पिना[1] ॥ १४० ॥

केष्टा विष्णोर्निगदति गदः प्राह सव्येतरोऽथ, श्रीरुद्राण्योः कथयत समाहारसंबोधनं किम् ? ।
प्राहर्जुः किं जिगमिषुमिनं वक्ति कान्ताऽनुरक्ता, सान्त्वं धूम्रं प्रहरमपि संबोधयानुक्रमेण ॥ १४१ ॥

अव०—"मयाध्यासामासयुवाता" विपरीतमञ्जरिजातिः । ता लक्ष्मीः । हे अम रोग । हे वाम सव्येतर । ईश्च उमा च युमं तत्संबोधनं हे युम । हे सम ऋजो । मा अम मा गच्छ । हे साम समते । हे ध्याम धूम्र । हे याम प्रहर ॥ १४१ ॥

भण केन किं प्रचक्रे, नयेन भुवि कीदृशेन का नृपते ? ।
काः पृच्छति तरलतरः, के यूयं किं कुरुत सततम् ? ॥ १४२ ॥

अव०—"मयाध्यासामासयुवाता" गतागतः त्रिष्वेकमुत्तरं । मया, अवतीति क्विपि तृतीयैकवचने उवा रक्षकेण, ता राज्यादिलक्ष्मीः, अध्यासामासे । हे वायुसम हे तरलतर, ता लक्ष्मीः, असा निर्धनाः सन्तः, ध्यायाम (:) ॥ १४२ ॥



१ कम्पमानेन ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोके केन किलाऽऽपि कान्तकविता ? कीदृग्महावंशजा,
श्रेणिः ? श्रीसुरयाज्ञिकेन्द्रियजया बोध्याः समाहारतः ।
हे दुष्प्रव्रजितप्रदानक कुतः का पात्रदात्रोर्भवेत् ?,
कीर्तिर्यस्य किलोत्तरं तमखिलं प्रश्नं सुरार्यै वद ॥ १४३ ॥

अव०—“मन्थानान्तरजातिः, “कालिदासकविना, नाविकसदालिका, तामरसविदम, मदविसरमता” । कान्तकविता मनोज्ञकाव्यकरणप्रावीण्यं केनापि प्राप्तं ? कालिदासकविना कालिदासाभिधपण्डितेन । महावंशजा श्रेणिः कुलीनजनश्रेणिः सतां पङ्क्तिः कीदृशी ? नौतीति परगुणान् स्तौतीति नाविका स्ताविका सदालिः सच्छ्रेणिर्यस्यां सा नाविकसदालिका, भावे कः । अथवा न नैव अविकसन्ती अवृद्धिमती आलिः परम्परा यस्याः सा नाविकसदालिका, किं तर्हि ? विकसदालिका भवति । श्रीश्च सुरश्च याज्ञिकश्च इन्द्रियजयश्च श्रीसुरयाज्ञिकेन्द्रियजयाः समाहारतो बोध्याः संबोधनीयाः । उत्तरं—तामरसविदम ता च अमरश्च सवी च याज्ञिकः दमश्च समाहारद्वन्द्वे तामरसविदमं तत्संबोधने हे तामरसविदम । दुष्प्रव्रजिते प्रदानकं कुत्सितदानं दुष्प्रव्रजितप्रदानकं तत्संबोधनं हे दुष्प्रव्रजितप्रदानक, पात्रदात्रोः ग्राहकदायकयोः कुतः का भवेत् ? उत्तरं—मदविसरमता मत्तो मत्सकाशात् अविरेडकः, सरमः श्वा, अविश्च सरमश्च अविसरमौ तयोर्भावः अविसरमता, कुपात्रदानात् ग्राहकस्य एडकता दातुश्च श्वता स्यात् इत्यर्थः । यस्य प्रश्नस्य कीर्ति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रित्युत्तरं भवति तमखिलं प्रश्नं सुरायै मदिरायै वद । हे सरक सुरे विदां पण्डितानां अविदलिता अखण्डिता का ? कीर्तिः, नामशब्दः प्राकाश्ये ॥ १४३ ॥

तमालव्यालमलिने, कः क्व प्रावृषि सम्भवी ?। आख्याति मूढः क्वारूढै–र्निस्तीर्णस्तूर्णमर्णवः ? ॥१४४॥

अव०—"तेपोनवजलवाहे" गतागतः । प्रावृषि वर्षाकाले क्व कस्मिन् कः सम्भवी भवेत् । किंभूते क्व ? तमालास्तापिच्छा व्यालाः सर्पा गजा वा तद्वन्मलिने श्यामे तमालव्यालमलिने । उत्तरं—तेपः क्षरणं नवजलवाहे नूतनजीमूते तेपो जलस्य क्षरणं भवतीत्यर्थः, अथवा तेपो दर्दुरः। मूढ आख्याति क्वारूढैर्जनैरर्णवोऽब्धिस्तूर्णं शीघ्रं निस्तीर्णः ?। हे बाल मूढ जवोऽस्यास्तीति जवनः, लोमपादादिभ्यो मत्वर्थीयोऽनः, जवनश्चासौ पोतश्च जवनपोतस्तस्मिन् जवनपोते वेगवद्वाहनारूढैः समुद्रः पाथोधिः शीघ्रं तत्कालं तीर्यत इत्यर्थः ॥ १४४ ॥

ध्वान्तं ब्रूतेऽर्हतां का ? तृणमणिषु खगः कश्चिदाख्याति केन ?,
प्रीतिर्मेऽथाह कर्म प्रसभकृतमहो दुर्बलः केन पुष्येत् ? ।
कामधुग्वक्ति कात्र प्रजनयति शुनो युद्धहृत्पूर्वलक्ष्मीः ?,
सत्तासन्दिग्धबुद्धिः कथमथ कृतिभिः शश्वदाश्वासनीयः ॥ १४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—"तामस समता, सारस सरसा, साहस सहसा, मारस सरमा, समरहर, तासासामास" [1]पद्मजातिः। हे तामस अन्धकार, समता। हे सारस, सरसा सरोवरेण। हे साहस अपर्यालोचितकर्म, सहसा बलेन। मारं कामं स्यति तनूकरोतीति मारसः तत्संबोधनं हे मारस। सरमा शुनी। समरं सङ्ग्रामं हरतीति तत्संबोधनं हे समरहर। ता लक्ष्मीः। सा सा सैव। मा आस मा चिक्षेप ॥ १४५ ॥

किमभिदधौ करभोरुं, सततगतिं किल पतिः स्थिरीकर्तुम् ?।
जननी पृच्छति विकचे, कस्मिन् सन्तुष्यते भ्रमरः ? ॥ १४६ ॥

अव०—"मातरम्भोरुहे" द्विर्गतः। मा अत मा गच्छ, रम्भावत् ऊरू यस्याः सा तथा तस्याः संबोधनं रम्भोरु, हे। हे मातर्जननि अम्भोरुहे पद्मे ॥ १४६ ॥

प्राधान्यं धान्यभेदे क ? कथयति वयः कीदृशी वायुपत्नी ?,
नक्षत्रं वक्ति कुर्वे किमहमिनमिति प्राह [2]शस्त्रोपजीवी ?।
ब्रूहि ब्रह्मस्वरं च क्षितकमभिगद प्रोल्लसल्लीलमञ्जु-
ल्लापामामन्त्रय स्त्रीं, क्व सजति न जनः प्राह कोऽप्यम्बुपक्षी ॥ १४७ ॥

१ टीकान्तरे मन्थानान्तरजातिः। २ तत्स्तोत्रजीवी इति वा पाठः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—पद्मजातिः, "कलमे, मेलक, करता, तारक, कवसे, सेवक, कराव, वराक, कलरवरामे, तासेवक"। कलमे शालौ। हे मेलक वयः। के वायौ रता करता। हे तारक नक्षत्र। कवसे स्तौषि। हे सेवक। कस्य ब्रह्मणो रावः शब्दः करावस्तस्य संबोधनं हे कराव। हे वराक क्षितक। कलो रवो यस्याः सा तथा, सा चासौ रामा च सा तथा, तस्याः संबोधनं हे कलरवरामे। तां लक्ष्मीं स्यतीति तासः तस्मिन्। हे बक॥ १४७॥

**कीदृक्षं लक्ष्मीपतिहृदयं? कीदृग्युगं रतिप्रीत्योः?। कः स्तूयतेऽत्र शैवैर्गुणवृद्धी वाऽज्झलौ कस्य ?॥१४८॥**

अव०—"स्युः"। सह या लक्ष्म्या वर्तते इति सि, सह ई इति स्थिते सहस्य सभावः, अवर्ण इवर्णे ए, स्वरो ह्रस्वो नपुंसके, सि। सह इना कामेन वर्तते इति सि, अत्रापि ह्रस्वत्वं। रतिप्रीती कामभार्ये। ततश्च कामेन सह वर्तते रतिप्रीतियुगं इति भावः। उः शङ्करः। अर्आर्लक्षणगुणवृद्धी अचूहलौ स्वरव्यञ्जनरूपे कस्य धातोः स्यातां? उः ऋकारस्य, (ऋद्धी)ऋतो दुर्, उरादेशे दित्यन्त्यह्रस्वादेः ऋलोपे उः इतिरूपसिद्धिः॥ १४८॥

**कुत्र प्रेम ममेति पृच्छति हरिः ?श्रीराह कुर्यां प्रियं, किं प्रेम्णाहमहो गुणाः कुरुत किं यूयं गुणिन्याश्रये ?। किं कुर्वेऽर्च्यमहं ?प्रगायति किमुद्गाताह सीरायुधः?, किं प्रेयः प्रणयास्पदं स्मरभवः पर्यन्वयुङ्क्तामयम् ?१४९।**



अव०—"यायमानसारादहेम" मञ्जरीसनाथजातिः। ईर्लक्ष्मीः तस्यां यां हे अ विष्णो, ई इति (शब्दस्य) सप्तम्येकवचनान्तरूपं। हे इ लक्ष्मि अम गच्छ, ई इति स्थिते संबोधने, ह्रस्वत्वे च सति रूपं। माम सम्पूर्णं तिष्ठाम,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मा माने पञ्चमी आम । नम प्रणम । साम सामवेदं । हे राम । दं कलत्रं । एः कामस्यापत्यं अः, अपत्येऽणि इवर्णे-त्यादिना इलोपे प्रत्ययमात्रावस्थानं, तत्संबोधनं हे अ कामसुत । हे अम रोग ॥ १४९ ॥

विकरुण ! भण केन किमाधेया ?, का रज्यते च केन जनोऽयम् ? ।
कार्या च का वाणिज्या ?, का धर्मे नेष्यते ? कयाऽरञ्जि हरिः ? ॥ १५० ॥

अव०—"यायमानसारादहेम" विपरीतमञ्जरीसनाथजातिः। मया हेया दया मया दया त्याज्येत्यर्थः । राया द्रव्येण । सह आयेन लाभेन वर्तते या सा साया । नया वाणिज्या । माया निकृतिः । यया लक्ष्म्या ॥ १५० ॥

काः कीदृशीः कुरुध्वे किं ?, तोषाग्निनिर्षयो यूयम्।किमहं करवै मदनभयविधुरितः कान् कया कथय ?।१५१।

अव०—"यायमानसारादहेम" गतागतः । त्रिष्वेकमुत्तरं । या लक्ष्मीः, अमानसारा अपूजाप्रधानाः । दहेम दह भस्मीकरणे सप्तमी याम । मह पूजय । एः कामात् दरो भयं तं अस्यन्ति क्षिपन्ति ये ते इदरासास्तान् । अमायया छद्माभावेन ॥ १५१ ॥

कृषीवलः पृच्छति कीदृगार्हतः ?, क केन विद्वानुपयाति हास्यताम् ? ।
सुरालयक्रीडनचञ्चुरुच्चकै-श्च्युतिक्षणे शोचति निर्जरः कथम् ? ॥ १५२ ॥

अव०—मन्थानजातिः "हालिक, कलिहा, नालिके, केलिना, नाककेलि हा" । हे हालिक कृषीवल । कलिं युद्धं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हन्ति कलिहा। केलिना हास्येन। नालिके मूर्खे। नाकस्य देवलोकस्य केलिः नोकेकेलिः, हा इति खेदे। ता स्मृत्वे-त्यमुना प्रकारेण शोचतीत्यर्थः॥ १५२॥

कं कीदृक्षं स्पृहयति जनः शीतवाताभिभूतः?, कश्चिद्वृक्षो वदति पलभुग्मांससत्के क्व रज्येत्?।
हेतुर्ब्रूते परिवहति का स्थूलमुक्ताफलाभां?, यव्यक्षेत्रक्षितिरिह भवेत्कीदृगित्याह काकः?॥१५३॥

अव०—"कंबलं, केसर, कारक, सयवा," गतागतचतुष्टयं। कंबलं लंबकं स्वार्थे कः विस्तीर्णमित्यर्थः। हे केसर बकुल। रसके मांससंबन्धिनि रसे, वह्निसंयोगे यः क्षरति तस्मिन्। हे कारक हेतो। करका मेघोपलाः। सह यवैर्वर्तत इति सयवा। हे वायस काक॥ १५३॥

श्रीचित्ते प्रियविप्रयोगदहनोऽहं कीदृशे किं दधे? प्रेम्णा किं करवाण्यहं हरिपदोः पप्रच्छ लक्ष्मीरिति?।
कस्मै चिक्लिशुरङ्गदादिकपयः? क्वानोकहे नम्रता?, कस्मै किं विदधीत भक्तविषयत्यागादिकर्माऽर्हतः? १५४

अव०—"से तप, पतसे, सेतवे, वेतसे" मन्थानान्तरजातिः। अहं प्रियविप्रयोगदहनः रमणवियोगधनञ्जयः श्रीचित्ते रमाहृदये कीदृशे किं दधे किं कुर्वे? सेतप सह एन विष्णुना वर्तते सं तस्मिन् से, सहस्य सभावे नपुंसके सप्तम्येकवचने रूपं, तप सन्तापं कुरु। अहं प्रेम्णा स्नेहेन हरिपदोः कृष्णपादयोः किं करवाणि? इति लक्ष्मीः पप्रच्छ अप्राक्षीत्। हे से लक्ष्मि पत प्रणामं कुरु। अङ्गदादिकपयः वनौकसः कस्मै किमर्थं चिक्लिशुः क्लेशं चक्रुः? सेतवे ॥ ३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेतुबन्धाय । क कस्मिन् अनोकहे वृक्षे नम्रता नम्रत्वं ? वेतसे जलवंशे । भक्तविषयत्यागादिकर्मा भक्तियुक्तत्यागादिकर्मा पुमान् अर्हतः तीर्थकरस्य संबन्धिने कस्मै किं विदधीत कुर्वीत ? तपसे तपःकर्मणे सेवेत तपःसेवां कुर्वीतेत्यर्थः ॥ १५४ ॥

हिमवत्पत्नी परिपृच्छति कः, कीदृक् कीदृशि कस्याः कस्मिन् ? ।
केन न लभ्या नृसुरशिवश्री–रित्याख्यत्किल कोऽपि जिनेन्द्रः ? ॥ १५५ ॥

अव०—"मेनेपिनाकीवक्तावाननेतेविनये" गतागतः । हे मेने हिमाचलभार्ये । पिनाकी हरः शङ्करः । वक्ता वचनशीलः । वन षण संभक्तौ ( वन्नन्तः, ) ततो वानयतीति वाननः संभक्तिकारकः तस्मिन् वानने विभागवति । विनये । ते तव । येन पुंसा । वितेने विस्तारिता । नैव । वाक् वचनं । तावकीनाऽपि तव संबन्धिन्यपि । हे नेमे नेमिजिनेश्वर ॥ १५५ ॥

तणजलतरुपुन्नं वाहसुन्नं पि रन्नं, भण हरिणकुलाणं केरिसं केरिसं नो ? ।
प्रलयपवनवेगप्रेरणात् कीदृशोऽब्धौ, सततदधिवासं व्यूढमैक्षं तकं वा ? ॥ १५६ ॥

अव०—"बहुलहरितरच्छाकुलचलच्छंखेमकरं" । बहुलाः प्रभूता हरयः सिंहाः, ते च तरश्छाश्च रिञ्छाः तथा, तेषां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुलानि, तेषां चलन्ति अक्षीणि यत्रारण्ये तत्तथा। क्षेमकरं शुभकरं बह्वयः प्रचुराश्च ता लहर्यश्च, तासु तरन्तः शाकुला जीवविशेषाः, चलन्तश्च शङ्खा यत्राब्धौ स तथा तस्मिन्। मकरम् ॥ १५६ ॥

कोधर्मः स्मृतिवादिनां?दधति के द्विःसप्तसंख्यामिह?,प्रार्थ्यन्ते च जनेन के भवभवाः?पुंसां श्रियःकीदृशः?
के वाऽभ्रङ्कषकोटयः शिखरिणां रेजुस्तथा कांश्चन, श्रीरस्मानजनिष्ट नाङ्गजमिति प्रोक्तान् वदेत्किं स्मरः? ॥

अव०—"मामसूतसानवः" मञ्जरीसनाथजातिभेदः। मनोः ऋषेः अयं मानवः, अणि रूपं। मनवः मनुशब्देन चतुर्दशाभिधीयन्ते। सूनवः पुत्राः। तनवः तुच्छाः। सानवः प्रस्थाः। मां स्मरं असूत जनितवती सा लक्ष्मीः, न नैव वो युष्मान्। यदा केचनैवं वक्तारो भवन्ति यदुत "श्रीर्लक्ष्मीरस्मानेव जनितवती नाङ्गजं कामदेवं" तदाङ्गजः कामदेवस्तान्प्रतीति प्रतिपादयेत् इत्यर्थः ॥ १५७ ॥

पाके धातुरवाचि कः? क भवतो भीरो! मनः प्रीतये?, सालङ्कारविदग्धया वद कया रज्यन्ति विद्वज्जनाः?।
पाणौ किं मुरजिद्बिभर्ति?भुवि तं ध्यायन्ति वा के सदा?, के वा सद्गुरवोऽत्र चारुचरणश्रीसुश्रुता विश्रुताः?

अव०—"श्रीमदभयदेवाचार्याः"। श्री पाके इतिवचनात् श्रीधातुः। ममाभयं ददातीति मदभयदस्तस्मिन् यो मदभयं ददातीति तत्र मम मनः प्रीतियुक्तं भवतीत्यभिप्रायः। वाचा वचनेन। अरा विद्यन्ते यत्र तदरि चक्रं। ए विष्णौ भक्तिर्येषां ते आः वैष्णवाः, तत्र भक्तिरित्यण ॥ १५८ ॥ ॥ ३२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कः स्यादम्भसि वारिवायसवति ? क्व द्वीपिनं हन्त्ययं ?,
लोकः (कं) ? प्राह हयः प्रयोगनिपुणैः कः शब्दधातुः स्मृतः ? ।
ब्रूते पालयिताऽत्र? दुर्धरतरः कः क्षुभ्यतोऽम्भोनिधे-- ?
ब्रूहि श्रीजिनवल्लभस्तुतिपदं कीदृग्विधाः के सताम् ? ॥ १५९ ॥

अव०—"मद्गुरवोजिनेश्वरसूरयः" । मद्गुर्जलवायसः तस्य रवः शब्दः । अजिने चर्मणि, निमित्तात्कर्मसंयोगे सप्तमीत्यनेन अजिने इत्यत्र सप्तमी । हे अश्व । रस् लस् शब्दे इतिवचनात् । हे ऊ रक्षक, अवतीति क्विप्, अव्यचीत्यादिना ऊटि रूपं । रयो वेगः । मम जिनवल्लभस्य गुरवो मद्गुरवः । एवंविधाः सन्तः के ? जिनेश्वरसूरयः सतां शिष्टानां स्तुतिपदमित्यर्थः ॥ १५९ ॥

प्रत्येकं हरिधान्यभेदशशिनः पृच्छन्ति किं लुब्धक ?, त्वं प्राप्तं कुरुषे मृगव्रजमथो खादद्गृहीताऽवदत् ।
कीदृग्भाति सरोऽर्हतश्च सदनं?किं चाल्पधीर्नाम्नुवन् ,पृष्टः प्राह?तथाच केन मुनिना प्रश्नावलीयं कृता?१६०

अव०—"जिनवल्लभेन" गतागतद्विर्गतः । हे जिन विष्णो । हे वल्ल भो धान्यभेद । भं नक्षत्रं तस्य इनः तस्य संबोधनं हे भेन इन्दो । नभे हन्मि, णभ हिंसायां तस्य वर्तमाना एरूपं । त्रयाणामपि संबोधनं । अत् खादत् लाति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृह्णाति अल्लः, अद प्सा भक्षणे, अत्तीति अत् क्विप्, अतं लातीति अल्लः, रा लाऽऽदाने आतोऽनुपसर्गात्कः इति डः(कः) पररूपे संबोधने हे अल्ल। वनजि वनं पानीयं तत्र जातं वनजं कमलं तद्विद्यते यत्र तत्तथा। तथा जिनो विद्यते यत्र अर्हत्सदने तत् जिनवत्। लभे प्राप्नोमि, न नैव। जिनवल्लभेन नाम्ना ॥ १६० ॥

किमपि यदिहाश्लिष्टं क्लिष्टं तथा विरसं क्वचित्, प्रकटितप(म)थाऽनिष्टं शिष्टं मया मतिदोषतः।
तदमलधिया बोध्यं शोध्यं सुबुद्धिधनैर्मनः, प्रणयविशदं कृत्वा धृत्वा प्रसादलवं मयि ॥ १६१ ॥

अव०—अश्लिष्टं अर्थेन अनालिङ्गितं। क्लिष्टं अगम्यार्थं। अनिष्टं असंमतं। शिष्टं निर्दिष्टं। विमलमत्या पूर्वं बोध्यं पश्चात् शोध्यम् ॥ १६१ ॥

॥ इति श्रीखरतरगच्छीयश्रीजिनवल्लभसूरिविरचितमेकषष्ट्यधिककाव्यशतनिबद्धं प्रश्नशतं सावचूरिकम् ॥



Published by Venichand Surchand, Secretary Jain Sanskrit Pathashala, Mhesana.
Printed by R. Y. Shedge at the "Nirnaya-sagar Press," 23, Kolbhat Lane, Bombay.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

॥ श्री जयतिलकसूरिकृता ॥

# विहरमाणशाश्वतजिनचतुर्विंशतिका ।

( सटीका )

ध्यात्वार्हतं महत्तेजः, सुखव्याख्यानहेतवे । चतुर्हारावलीचित्र–स्तवटीकां करोम्यहम् ॥

इह तावद्वर्तमानातीतानागतविहरमाणशाश्वतजिनानां चतस्रश्चतुर्विंशतिका वर्तन्ते । पादस्याद्यन्तयोर्हारानुकारविन्यस्तैर्जिननामवर्णैश्चत्वारः स्तवाः । तत्रासन्नोपकारित्वात्प्रथमं तावद्वर्तमानजिनस्तवं व्याचिख्यासुः पूर्वपश्चिमजिननामाक्षरहारनिबद्धं जिनद्वयस्तवरूपं प्रथमं वृत्तमाह—स्थापना चेयं—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





| | | |
|---|---|---|
| श्री | नाभिसूनो जिनसार्वभौ | म, |
| वृ | षध्वज त्वन्नतये ममे | हा । |
| ष | ड्जीवरक्षापर देहि दे | वी- |
| भ | र्त्रर्चितं स्वं पदमाशु वी | र ॥ १ ॥ |

व्याख्या—हे श्रीनाभिसूनो, हे जिनसार्वभौम सामान्यकेवलिचक्रवर्तिन्, वृषध्वज वृषभाङ्क । त्वन्नतये भवन्नमस्काराय मम मे ईहा वाञ्छा वर्तत इति संबन्धः । श्रीनाभिसूनुस्तावदन्योऽपि कोऽपि भविष्यतीति आशंसानिरासार्थं ( जिनसार्वभौमेति पदं ) । जिनसार्वभौमाः सर्वेऽप्यर्हन्तः, अतः प्रथमजिननिर्धारणाय वृषध्वजेति पदं । इति पूर्वार्धेनाद्यं जिनं स्तुत्वा परार्धेन पश्चिमजिनस्तवमाह—हे षड्जीवरक्षापर पृथिव्यप्तेजोवायुवनस्पतित्रसलक्षणाः षड्जीवास्तेषां रक्षा पालनं तत्परः षड्जीवरक्षापरः तस्य संबोधनं । हे वीर वर्धमान । त्वं आशु शीघ्रं स्वं निजं पदं मोक्षलक्षणं स्थानं देहि वितर । किंविशिष्टं पदं ? देवीभर्त्रर्चितं देव्यो देवाङ्गनास्तासां भर्तारो देवास्तैरर्चितं पूजितं तैरप्याराधितं सर्वोत्कृष्टत्वादित्यर्थः ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वितीयत्रयोविंशतितमजिनस्तवमाह—स्थापना—

| | | |
|---|---|---|
| श्री | नन्दनाद्या व्यथयन्ति पा | पा, |
| अ | वाप्त देवाजित मां सुपा | र्श्व । |
| जि | नाङ्गिनां रोगततिर्विली | ना, |
| त | वाभिधानादपि पार्श्वना | थ ॥ २ ॥ |

व्याख्या—हे आप्त हितकारिन् देव अजित श्रीनन्दनाद्याः कामक्रोधलोभमानहर्षाः पापाः पापिष्ठा मां व्यथयन्ति पीडयन्ति । त्वं अव रक्ष । हे सुपार्श्व सुष्ठु शोभनं पार्श्वं समीपं यस्य तस्यामन्त्रणं सुपार्श्व शोभनसमीप । अथ द्वितीयार्धव्याख्या—हे पार्श्वनाथ ! जिन अङ्गिनां शरीरिणां रोगततिर्व्याधिपरंपरा तव भवतोऽभिधानान्नामतोऽपि विलीना विलयं जगामेत्यर्थः ॥ २ ॥ अथ तृतीयद्वाविंशतितमजिनस्तवमाह—स्थापना—

| | | |
|---|---|---|
| सं | सारपारोऽजनि मेऽद्य जा | ने, |
| भ | वत्पदौ संभव यद्यजा | मि । |
| व | श्याः स्वयं ते मदमोहमा | ना, |
| अ | नङ्गभङ्गे सति नेमिना | थ ॥ ३ ॥ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—सम्भव तृतीयजिनपते अहमिति जानेऽवगच्छामि । अद्य मे मम संसारपारोऽजनि भवसमाप्तिर्बभूव । यद्यस्मात्कारणात् भवत्पदौ त्वच्चरणौ यजामि पूजयामि। अथापरार्धव्याख्या—हे नेमिनाथ ? द्वाविंशतितमजिन अनङ्गभङ्गे कामजये सति मदमोहमानाः स्वयमात्मना वश्या वशत्वं ययुरित्यर्थः ॥ ३ ॥

अथ चतुर्थैकविंशतितमजिनस्तवमाह—स्थापना—

| | | |
|---|---|---|
| भि | देलिमैना अभिनन्दने | न, |
| नं | द त्वमंह्री तव पूजया | मि । |
| द | या दरिद्रेऽपि नृपे समा | ना, |
| न | मे कथं ते मयि सा न ना | थ ॥ ४ ॥ |

व्याख्या—हे अभिनन्दनेन हे अभिनन्दनस्वामिन् त्वं नन्द समृद्धिं भज । किंविशिष्टस्त्वं ? भिदेलिमैना भिदेलिमानि भेदेन निर्वृत्तानि एनांसि पापानि यस्य स तथा । विसर्गलोपे सन्धिनिषेधः । तथाऽहं तव भवतः अंह्री पादौ पूजयामि अर्चयामीति । अथोत्तरार्धव्याख्या—हे नमे ! एकविंशतितमजिनेन्द्र नाथ स्वामिन् ते तव दया कृपा नृपे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्ञि दरिद्रेऽपि समाना तुल्या वर्तते । तर्हि सा दया मयि विषये कथं न? यदि सा दया मयि विषये भवति, तदाऽहं तया संसारवासान्मुक्तो भवामीत्यर्थः ॥ ४ ॥

अथ पञ्चमविंशतितमजिनस्तवमाह—स्थापना—

| | | |
|---|---|---|
| श्री | खन्डवत्तापहरा शिव | श्री- |
| सु | खाय गीस्ते सुमते प्रजा | सु । |
| म | हस्तु ते सुव्रतदेव ती | व्र- |
| ति | रस्क्रियाकृत्तमसोऽपि ता | त ॥ ५ ॥ |

व्याख्या—हे सुमते पञ्चमजिनपते ते तव गीर्वाणी प्रजासु लोकेषु शिवश्रीसुखाय मोक्षलक्ष्मीशर्मणे वर्तते । किंविशिष्टा गीः ? तापहरा बाह्याभ्यन्तरसन्तापापहारिणी । किंवत् ? श्रीखण्डवत् चन्दनवत् । अथोत्तरार्धव्याख्या—तुः पुनरर्थे । हे सुव्रतदेव हे मुनिसुव्रतस्वामिन् ते तव महस्तेजोऽपि तमसः पाप्मनः तीव्रतिरस्क्रियाकृत् अत्यर्थतिरस्कारकारि, किं पुनस्तव दर्शनमिति ज्ञेयं । हे तात हे जगत्पितः इत्यामन्त्रणं सुव्रतस्येत्यर्थः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ षष्ठैकोनविंशयोर्जिनेन्द्रयोः स्तुतिरूपं वृत्तमाह—

| | | |
|---|---|---|
| प | द्मप्रभाक्षिद्वयमंहसा | म- |
| द्म | रं मुदे ते स्थिरपक्ष्मव | ल्लि । |
| प्र | भो प्रभा ते भुवि दीप्यमा | ना- |
| भ | जद्यमीत्वं जिन मल्लिना | थ ॥ ६ ॥ |

व्याख्या—हे पद्मप्रभ षष्ठजिनपते ते तव अक्षिद्वयं लोचनयुगलं मुदेऽस्तु प्रमोदाय भवतु । कथंभूतं ? अंहसां पापानां अद्मरं भक्षणशीलं । पुनः कथंभूतं ? स्थिरपक्ष्मवल्लि स्थिरा निश्चला पक्ष्मवल्ली पक्ष्मलता यस्य तत्तथा । ध्यानस्तिमितत्वान्निश्चलपक्ष्मलताकमित्यर्थः । अथोत्तरार्धव्याख्या—हे प्रभो स्वामिन् मल्लिनाथ जिन ते तव प्रभा कान्तिर्भुवि पृथिव्यां दीप्यमाना इतस्ततो दीव्यन्ती यमीत्वं यमुनात्वमभजदशिश्रियत् । नीलवर्णत्वाद्यमुनाप्रवाहानुकारं चकारेत्यर्थः ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सप्तमाष्टादशजिनयुगलस्तवमाह—

| | | |
|---|---|---|
| श्री | मान् सुपार्श्वोऽपि हि निस्तमा | अ- |
| सु | मत्सुखं देशनया चका | र । |
| पा | रंगतः पातकवल्लरी | प- |
| र्श्व | ग्रं जनं चारपतिः पुना | ति ॥ ७ ॥ |

व्याख्या—श्रीमान् तीर्थकरलक्ष्मीवान् सुपार्श्वः सप्तमो जिनः निस्तमा अपि निर्मोहोऽपि हि निश्चयेन देशनया धर्मोपदेशदानेन असुमत्सुखं सर्वप्राणिसौख्यं चकार कृतवानित्यर्थः । अथोत्तरार्धव्याख्या—चः समुच्चये । अरपतिररनाथो जनं लोकं पुनाति पवित्रयति । कथंभूतोऽरपतिः ? पारंगतः संसारसमुद्रपारं प्राप्तः । अपरं कथंभूतः ? पातकवल्लरीपर्श्वग्रं पातकान्येव वल्लर्यः, पर्शोरग्रं पर्श्वग्रं, पातकवल्लरीणां पर्श्वग्रं पापलताकुठाराग्रं, इदमाविष्टलिङ्गमित्यर्थः ॥ ७ ॥

---

१ पुनःशब्दार्थे ग्रन्थकारेण सर्वत्राऽपरशब्द एव व्यवहृतः इति न परावर्त्यते ।

अ० ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाष्टमजिनसप्तदशजिनस्तवमाह—

| | | |
|---|---|---|
| चं | द्रप्रभाणोर्हर मेऽघशं | कुं, |
| द्र | ष्टाऽस्मि हृत्ते समकुम्भिकुं | थु। |
| प्र | बालतां मुञ्चति नाप्ययं | ना, |
| भ | क्तः सुवर्णे त्वयि कुन्थुना | थ! ॥ ८ ॥ |

व्याख्या—हे चन्द्रप्रभ ! अष्टमजिनपते ! त्वं मे मम अणोर्दुर्बलस्य अघशङ्कुं पापशङ्कुं (शल्यं) हर उद्धर। यतोऽस्म्यहं ते तव हृच्चेतः समकुम्भिकुन्थु द्रष्टाऽवलोकयिता कुम्भी च कुन्थुश्च कुम्भिकुन्थू, समौ निर्विशेषं स्थितौ कुम्भिकुन्थू यत्र तत्तथा। किमुक्तं भवति ? भगवन् तव कुम्भिनि कुञ्जरे कुन्थौ च सूक्ष्मजीवविशेषे समाना मैत्री, अतो मम दुर्बलस्य व्यथाकारिपापशल्यापहारं कुर्विति। अथोत्तरार्धव्याख्या—हे कुन्थुनाथ ! सप्तदशजिनेश्वर ! अयं मल्लक्षणो ना पुमान् त्वयि भवति सुवर्णे शोभनवर्णे भक्तोऽपि भक्तियुक्तोऽपि प्रबालतां प्रकृष्टमूर्खतां न मुञ्चति न त्यजति । अन्यो यः सुवर्णे शोभनाक्षरे मन्त्रे भक्तो भवति स मूर्खो न स्यात्, अहं पुनरद्यापि ज्ञानवान्न भवामीति भावार्थः ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ नवमषोडशजिनस्तवमाह—

| | | |
|---|---|---|
| श्री | रङ्गजा ते सुविधे सदा | शां, |
| सु | धांशुगौरी विशदीकरो | ति । |
| वि | श्वैकवन्द्योऽसि मृगाङ्क ना | ना, |
| धि | नोषि कोकानपि शान्तिना | थ ! ॥ ९ ॥ |

व्याख्या—हे सुविधे ! नवमजिनेन्द्र ! ते तवाङ्गजा शरीरसंभवा श्रीः कान्तिः सदाशां साधुकामनां अविशदामपि विशदां करोति विशदीकरोति निर्मलीकरोतीत्यर्थः । किंविशिष्टा श्रीः ? सुधांशुगौरी चन्द्रधवला । अथोत्तरार्धव्याख्या—हे शान्तिनाथ ! षोडशजिनेन्द्र ! मृङ्गाक मृगलाञ्छन त्वं विश्वैकवन्द्योऽसि विश्वजनैकवन्दनीयोऽसि । न केवलं विश्वैकवन्द्यः ( किं पुनः ? ) नानाऽनेकप्रकारान् कोकान् विचक्षणानपि धिनोषि प्रीणासि । अन्यो यो मृगाङ्कः स विश्वैकवन्द्यः, परं कोकान् चक्रवाकान् न धिनोति । परं भवान् मृगाङ्कोऽपि विश्वैकवन्द्यः कोकप्रीतिकारकश्चापीत्यर्थः ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ दशमपञ्चदशजिनस्तवनगर्भं वृत्तमाह—

श्री | शीतल त्वां जितमोहयो | ध,
शी | लाढ्य याचे जिनराज श | र्म ।
त | व स्वरूपं हृदि संदधा | ना,
ल | यं लभन्ते त्वयि धर्मना | थ ॥ १० ॥

व्याख्या—हे श्रीशीतल ! दशमजिनपते ! जितमोहयोध निर्जितमोहमल्ल शीलाढ्य शीलधनेश्वर अहं त्वां भवन्तं जिनराजशर्म तीर्थकरसौख्यं याचे मार्गयामि । अथापरार्धव्याख्या—हे धर्मनाथ ! पञ्चदशजिनेन्द्र ! जीवास्तव स्वरूपं भवतो वीतरागत्वं हृदि हृदये संदधाना ध्यायन्तः त्वयि भवति लयं लभन्ते स्थानं प्राप्नुवन्ति इत्यर्थः ॥ १० ॥

अथैकादशचतुर्दशजिनस्तवमाह—

श्री | वत्सिनि श्रीर्हृदि तावके | श्री-
श्रे | यांस सक्ता नितरामहो | अ ।
यां | मे निजां देहि वदान्य दी | नं,
स | मीक्ष्य वीराग्रिम मामनं | त ॥ ११ ॥



For Private And Personal Use Only

व्याख्या—अहो इति संबोधने । श्रीश्रेयांस ! एकादशजिनपते !। अः विष्णुः, अ इव अः, लुप्तोपमत्वाद्विष्णूपमः, तस्य संबोधनं अहो अ अहो श्रेयांसविष्णो । ओदन्तनिपातत्वादसन्धिः । तावके भवदीये हृदि हृदये श्रीर्लक्ष्मीः नितरामतिशयेन सक्ताऽऽसक्ता वर्तते। किंविशिष्टे हृदि ? श्रीवत्सिनि श्रीवत्सयुक्ते । अथापरार्धव्याख्या—हे अनन्त ! चतुर्दशजिनपते ! वीराग्रिम युद्धदानधर्मवीरशिरोमणे वदान्य दानशूर प्रियवाक्य । इमानि त्रीण्यामन्त्रणपदानि । मां दीनं दुःस्थं समीक्ष्य विलोक्य मे मह्यं निजां स्वां यां लक्ष्मीं देहि वितरेत्यर्थः॥ ११ ॥

अथ द्वादशत्रयोदशजिनस्तवनमाह—

| | | |
|---|---|---|
| वा | ग्वासुपूज्यागमिकी श्रुति | श्री- |
| सु | खं कषन्ती भवताऽभ्यसा | वि । |
| पू | र्णा ममाशा विमलाद्य ना | म, |
| ज्य | या समं लीनशिरो नतोऽ | लं ॥ १२ ॥ |

व्याख्या—वासुपूज्य ! द्वादशजिनपते ! आगामिकी आगामिसंबन्धिनी वाग्वाणी भवता त्वया अभ्यसावि अभिसुषुवे । किं कुर्वती ? श्रुतिश्रीसुखं कषन्ती वेदलक्ष्मीसुखं विनाशयन्ती वेदमार्गोच्छेदिकेत्यर्थः । अथोत्तरार्धव्याख्या—नाम

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संबोधने हे विमल ! त्रयोदशजिनपते ! अद्य ममाशा पूर्णा मनोरथोऽपूरि । अहं ज्यया पृथिव्या समं लीनशिरो यथा भवति एवमलमत्यर्थं नतोऽस्मि क्षितितलनिहितोत्तमाङ्गः यथा भवति एवं प्रणतोऽस्मीत्यर्थः ॥ १२ ॥

अथ हारे सर्वोत्कृष्टो नायकमणिः स्यात्, अतस्तत्स्थाने चतुर्विंशतिपत्रप्रतिबद्धपद्मबन्धेन सर्वजिनस्तुतिमाह—

नवीनपीनस्वनमानगानकि-न्नराननानर्घ्यनवेन मानसे ।
नमानधा नम्रनरेनका नता, नवं नवं न स्वनता न जैनपाः ॥ १३ ॥

व्याख्या—जिनो देवता येषां ते जैना अर्हद्भक्ताः, तान् जैनान् पान्ति रक्षन्ति ये देवास्ते जैनपा जिना इत्यर्थः । मयेत्यध्याहार्यं । मया जैनपा जिना नवं नूतनं नवं स्तवं स्वनता ब्रुवता न न नताः, अपि तु नता नमस्कृता एव । द्वौ नञौ प्रकृतमर्थं गमयत इति । किं विशिष्टा जिनाः ? मानसे चित्ते नमानधा मानं दधतीति मानधा नमानधा मानरहिता इत्यर्थः । केन ? नवीनपीनस्वनमानगानकिन्नराननानर्घ्यनवेन, कोऽर्थः ? उच्यते—नवीनं नूतनं पीनं पीवरं स्वनानां स्वराणां मानं प्रमाणं यत्र तानि नवीनपीनस्वनमानानि एवंविधानि गानानि येषु किन्नराननेषु तानि नवीन० किन्नराननानि तेषामनर्घ्यो महार्घो योऽसौ नवः स्तवः तेन, मानं न कुर्वन्तीत्यर्थः । अपरं किंविशिष्टाः ? नम्रनरेनकाः



१ ( आगमभूतः स्यादेश्च नेति नणः )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नराणामिनाः स्वामिनो नरेनाः, नम्राणि नमनशीलानि नरेनानां कानि मस्तकानि येषां ते नम्रनरेनकाः नम्रनरेश्वरमौलय इत्यर्थः ॥ १३ ॥

अथ स्तवसमाप्तिचित्रनामार्थान्तरेण कविः स्वनामकथनाय सर्वदेवस्तुतिरूपं वृत्तमाह—

**इत्थं नायकपद्मरागरुचिरा सत्कण्ठभूषाकरी, येषां नाममयी सुवर्णमणिभिर्हारावली निर्मिता ।**
**चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिनाः, श्रीशत्रुञ्जयशेखरद्युतिभृतः सर्वेऽपि ते मङ्गलम् ॥ १४ ॥**

व्याख्या—इत्थममुना प्रकारेण येषां नाममयैः सुवर्णमणिभिः शोभनाक्षरमणिभिः हारावली हारयष्टिः निर्मिता निर्ममे । किंविशिष्टा? नायकपद्मरागरुचिरा नायकस्थाने तरलमणिपदे चतुर्विंशतिदलपद्मं तस्य रागेण रुचिरा प्रधाना। अपरं किंविशिष्टा ? सत्कण्ठभूषाकरी सतां कण्ठाः सत्कण्ठास्तेषां भूषां शोभां करोतीति सत्कण्ठभूषाकरी। अन्याऽपि या हारावली भवति सा नायकपद्मरागरुचिरा सत्कण्ठभूषाकरी भवति सुवर्णमणिभिर्निर्मीयते । अत एषाप्येवं । ते सर्वेऽपि जिना मङ्गलं देयासुः वितीर्यासुः । उच्चैरतिशयेन । किंविशिष्टा जिनाः ? चारित्रप्रभदीक्षितस्तुतपदाः चारित्रे चरणे प्रभा येषां ते चारित्रप्रभाश्चारित्रिणः, ते च ते दीक्षिताश्च चारित्रप्रभदीक्षिताः साधवः, तैः स्तुताः पदा येषां ते तथा। अपरं किंविशिष्टाः ? श्रीशत्रुञ्जयशेखरद्युतिभृतः श्रीशत्रुञ्जयो विमलाचलः, तस्य शेखरद्युतिं मुकुटकान्तिं बिभ्रति पुष्णन्तीति श्रीशत्रुञ्जयशेखरद्युतिभृतः श्रीशत्रुञ्जयमुकुटतुल्या इत्यर्थः । अथवा ते सर्वे जिना अमङ्गलं पापं उच्चैरति-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शयेन देयासुः छिन्द्यासुः। दोऽवखण्डने अस्य धातोः प्रयोगः। खण्डयन्त्वित्यर्थः । किंविशिष्टममङ्गलं ? श्रीशत्रुं लक्ष्मीवैरिणं। किंविशिष्टा जिनाः ? जयशेखरद्युतिभृतः जयशेखरकवेर्द्युतिं कान्तिं बिभ्रति पुष्णन्तीत्यर्थः । अपरं किंविशिष्टाः ? चारित्रप्रभदीक्षितस्तुतपदाः चारित्रप्रभनामगुरोर्दीक्षितः शिष्यः तेन स्तुतपदा नुतांह्रयः। इत्यर्थान्तरेण कविनामप्रकाश इति वृत्तार्थः ॥ १४ ॥

॥ इत्यागमिक–श्रीजयतिलकसूरिकृता हारावलीप्रथमचित्रस्तवटीका ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वितीयातीतचतुर्विंशतिकास्तवं व्याचिख्यासुः प्रथमं वृत्तमाह—

| | | |
|---|---|---|
| के | केवलज्ञानिजिनं शिव | श्री, |
| व | रं न याचन्त इहात्मभा | सं । |
| ल | सन्त्यलं सम्प्रतिदेवदी | प्र- |
| ज्ञा | नार्णवे कच्छपवज्जगं | ति ॥ १ ॥ |

व्याख्या—के जीवाः? इह संसारे केवलज्ञानिजिनं अतीतचतुर्विंशतिकायाः प्रथमतीर्थङ्करं आत्मभासं परमात्मकान्तिं न याचन्ते? काक्का, अपितु सर्वेऽपि याचन्ते मार्गयन्ति। किंविशिष्टं जिनं? शिवश्रीवरं मुक्तिलक्ष्मीकान्तं। अथापरार्धव्याख्या—सम्प्रतिदेवदीप्रज्ञानार्णवेऽतीतचतुर्विंशतिकापश्चिमजिनदीपनज्ञानसागरे। जगन्ति विश्वानि कच्छपवत् जलचरा इव लसन्तीत्यर्थः। सर्वत्रापातनिका पूर्ववत् ॥ १ ॥ अथ द्वितीयवृत्तस्थापना—

| | | |
|---|---|---|
| नी | ता न निर्वाणपदं जनाः | श्री- |
| निर् | वाणिना के न विनैव दा | स्यं । |
| वा | णी तव स्यन्दन सौख्यकं | द, |
| णी | धातुवत्प्राप्तिवदा न किं | न ॥ २ ॥ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—अत्र संसारे श्रीनिर्वाणिना द्वितीयजिनेन दास्यं विनैव दासत्वमन्तरेणैव के जना? निर्वाणपदं न न नीता मोक्षस्थानं नो नो प्रापिताः ? अपि तु नीता एवेत्यर्थः। अथापरार्धव्याख्या—हे स्यन्दन ! त्रयोविंशजिनपते! हे सौख्य-कन्द सर्वसुखमूल तव वाणी सरस्वती न न प्राप्तिवदा ? अपि तु प्राप्तिवदैव । किंवत् ? णीधातुवत् णीञ् प्रापणे णीधातुः प्राप्तिं ब्रूते, तथा तव वाणी सर्वस्यापि प्राप्तिं वदतीत्यर्थः ॥ २ ॥

अथ तृतीयवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | सागरस्त्वं कुरु मेऽविना | शि, |
| सा | रं सुखं सागरदेवदे | व !। |
| ग | रिष्ठतां को गदितुं शशा | क, |
| र | सज्ञया ते शिवकृज्जिता | र ॥ ३ ॥ |

व्याख्या—हे सागरदेवदेव ! त्वं मे मम अविनाशि अविनश्वरं सारं सर्वोत्कृष्टं सुखं शर्म कुरु । किंविशिष्टस्त्वं ? श्रीसागरो लक्ष्मीसमुद्र इत्यर्थः । अपरार्धार्थः—हे शिवकृत् ! शिवकर हे जितार ! निर्जितशात्रवसमूह ते तव गरिष्ठतां रसज्ञया जिह्वया गदितुं वक्तुं कः शशाक ? अपि तु न कोऽपीत्यर्थः ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ चतुर्थवृत्तस्थापना—

| | | |
|---|---|---|
| म | हायशस्तीर्थपते त्वया | शु, |
| हा | स्यादिषट्कं विजितं विशु | द्ध । |
| य | शो दिशस्ते निखिला जगा | म, |
| शा | र्वाङ्गरुक् शुद्धमतेऽस्तरी | ति ॥ ४ ॥ |

व्याख्या—हे महायशस्तीर्थपते ! हे विशुद्ध निर्मल त्वया भवता आशु शीघ्रं हास्यादिषट्कं हास्यरत्यरतिभयजुगुप्साशोकलक्षणं षट्कं विजितं विजिग्ये । अथोत्तरार्धव्याख्या—हे शुद्धमते ते तव यशो निखिला, समस्ता दिशो जगाम । किंविशिष्टं यशः ? शार्वाङ्गरुक् शर्व ईश्वरस्तस्येदं शार्वं शार्वं च तदङ्गं च शार्वाङ्गं शार्वाङ्गवत् रुक् कान्तिर्यस्य तत् शार्वाङ्गरुक् ईश्वराङ्गधवलं । अपरं किंविशिष्टं ? अस्तरीति अस्ता क्षिप्ता रीतिर्मर्यादा येन तदस्तरीति निर्मर्यादमित्यर्थः ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथ पञ्चमवृत्तमाह—स्थापना—

| | | |
|---|---|---|
| श्री | मन्नत! त्वां विमलाब्जरा | जि- |
| वि | राजितं को विमलं न मे | ने । |
| म | नोरथं कस्य भवान्न वि | श्व- |
| ल | क्ष्मीपते! देव जिनेश्वरा | र ॥ ५ ॥ |

व्याख्या—हे श्रीमन्नत! श्रीमद्भिर्नतो नमस्कृतः श्रीमन्नतस्तस्यामन्त्रणं हे विमल जिन त्वां भवन्तं विमलं निर्मलं को न मेने? अपि तु सर्वः कोऽपि ज्ञातवान्। किंविशिष्टं त्वां? अब्जराजिविराजितं कमलश्रेणिशोभितं। अथापरार्धव्याख्या-हे जिनेश्वर देव हे विश्वलक्ष्मीपते समस्तकमलास्वामिन् भवान् कस्य मनोरथं न आर? न जगाम? इत्यर्थः ॥ ५ ॥

अथ षष्ठवृत्तस्थापना—

| | | |
|---|---|---|
| स | र्वानुभूते! तव केवल | श्री- |
| र्वा | गीशवाचामपि चित्रता | कृत् । |
| नु | तिस्तवैषा पुनरुक्तिभू | ता |
| भू | योऽर्थिता यत्क्रियते कृता | र्थ ॥ ६ ॥ |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—हे सर्वानुभूते ! तव केवलश्रीः केवललक्ष्मीः, वागीशवाचामपि बृहस्पतिवाणीनामपि, चित्रताकृदाश्चर्यकारिणी। अथापरार्धव्याख्या—हे कृतार्थ ! यत्ते भूयोऽर्थिता अत्यर्थार्थवत्त्वं, क्रियते निर्मीयते, एषा तव नुतिः स्तुतिः, पुनरुक्तिभूता चर्वितचर्वणरूपेत्यर्थः ॥ ६ ॥

अथ सप्तमवृत्तमाह—

| | | |
|---|---|---|
| ति | लत्रिभागे न तुलामिया | य, |
| श्री | श्रीधरस्यापि भवान् हिमां | शो !। |
| ध | र्मद्रुमाराममिदं प्रबो | ध- |
| र | म्यं श्रयामीति यशोधरो | रः ॥ ७ ॥ |

व्याख्या—हे हिमांशो ! चन्द्र, भवान् , श्रीश्रीधरस्य जिनस्य, तिलत्रिभागेऽपि तुलां न इयाय साम्यं न प्राप। एतावता सौम्यतया हिमांशोरपि श्रीश्रीधर उत्कृष्ट इत्यर्थः। द्वितीयार्धव्याख्या—अहमिति कारणात्, यशोधरोरः यशोधरवक्षः, श्रयामि भजामि। इतीति किं ? यत इदं धर्मद्रुमारामं धर्मवृक्षोद्यानं। किंविशिष्टं ? प्रबोधरम्यं प्रबोधः प्रकृष्टो बोधो विकाशश्च तेन रम्यं मनोहरमित्यर्थः ॥ ७ ॥

प्र० ८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथाष्टमवृत्तमाह—

द | त्तक्रमौ विश्वतमोलता | अ-
त्त | श्चन्द्रसूर्याविव रुक्चये | न ।
दे | वो मुदे वोऽस्त्वनलो विशा | ल-
व | क्षा विपक्षागदवानल | श्रीः ॥ ८ ॥

व्याख्या—दत्तक्रमौ दत्तजिनपादौ, रुक्चयेन कान्तिसमूहेन, विश्वतमोलता जगत्पातकवल्लरीः, अत्तः भक्षयतः। काविव ? चन्द्रसूर्याविव। अथापरार्धव्याख्या—अनलो देवो, वो युष्माकं, मुदेऽस्तु ।। किंभूतः ? विशालवक्षा विस्तीर्णहृदयः। अपरं कथंभूतः ?विपक्षागदवानलश्रीः विपक्षा वैरिणस्त एवागा वृक्षास्तेषां दवानलश्रीः वनवह्निलक्ष्मीः भस्महेतुरित्यर्थः।

अथ नवममाह—

दा | मोदरे यः प्रणतिं तता | न
मो | हं विजित्याशु स मोक्षगा | मी ।
द | दाति भक्ताय नमीश्वरोऽ | श्व-
र | त्वादिलक्ष्मीः शिवमप्युदा | रः ॥ ९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—दामोदरे जिने, यः प्रणतिं ततान नमस्कारमकार्षीत्, स आशु शीघ्रं, मोहं विजित्य, मोक्षगामी मुक्तिं यास्यति । अपरार्धव्याख्या—नमीश्वरो जिनो भक्ताय जनाय अश्वरत्नादिलक्ष्मीर्ददाति । तथा न केवलमश्वरत्नादिलक्ष्मीर्ददाति, शिवमपि मोक्षमपि वितरतीत्यर्थः । किंविशिष्टः ? उदारः दानशौण्डः ॥ ९ ॥

दशमवृत्तमाह—

| | | |
|---|---|---|
| श्री | मान् सुतेजाः परमोन्मना | अ- |
| सु | खक्षयायास्तु नयैकशा | स्ता । |
| ते | रे त्वयाऽस्ताघ ! भवार्णवोऽ | घ- |
| जा | त्याकुलोऽस्ताघलसज्जड | श्रीः ॥ १० ॥ |

व्याख्या—श्रीमान् सुतेजा जिनः, असुखक्षयाय दुःखविनाशायास्तु । किंविशिष्टः ? परमं प्रकृष्टं उन्नतं मनो यस्य स तथा । अपरं किंविशिष्टः ? नयानामेकोऽद्वितीयः शास्ताऽनुशासकः स तथा । अथापरार्धव्याख्या—हे अस्ताघ जिन त्वया भवार्णवो भवसमुद्रस्तेरेऽतारि । किंविशिष्टः ? अघजात्याकुलः अघानां पापानां जातयोऽघजातयः । समु-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्रपक्षे तु अघात् पापाज्जातिर्जन्म येषां ते मकरकच्छपादयस्तैराकुलो व्याप्तः स तथा । अपरं किंविशिष्टः ? अस्ताघा महती लसन्ती जडानां मूर्खाणां श्रीर्लक्ष्मीर्यत्र स तथा । समुद्रपक्षे डलयोरैक्ये प्रकटार्थ एव ॥ १० ॥

अथैकादशं वृत्तमाह—

श्री | स्वामिवक्त्राब्जमलीन् विका | शि
स्वा | मोदपूरेण समाजुहा | व ।
मी | मांसते कः शिवगत्यपां | ग-
मु | च्चैर्लयं यः श्रुतिषु प्रया | ति ॥ ११ ॥

व्याख्या—श्रीस्वामिवक्त्राब्जं श्रीस्वामिजिनमुखकमलं, स्वामोदपूरेण निजपरिमलसम्भारेण, अलीन् भ्रमरान्, समाजुहावामन्त्रयामास । किंविशिष्टं वक्त्राब्जं ? विकाशि विकस्वरं । द्वितीयार्धव्याख्या—यत्तदोर्नित्यमेव संबन्धः । तं शिवगत्यपाङ्गं शिवगतिजिननेत्रपर्यन्तं, को मीमांसते को विचारयति ?। यः शिवगत्यपाङ्गः उच्चैरतिशयेन श्रुतिषु कर्णेषु लयं प्रयाति गच्छति । श्लेषे श्रुतिषु वेदेष्वित्यर्थः ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वादशवृत्तमाह—

| | | |
|---|---|---|
| नि | श्शक्तिरासीन्मुनिसुव्रत | श्री- |
| सु | तोऽपि ते सद्व्रतखण्डना | सु । |
| व्र | ध्नो यथा विश्वविसारि धा | म, |
| त | थाऽतिविश्वं सुमतिर्दधा | ति ॥ १२ ॥ |

व्याख्या—हे मुनिसुव्रत जिन ! श्रीसुतोऽपि कामोऽपि, ते तव, सद्व्रतखण्डनासु प्रधाननियमभङ्गेषु, निःशक्तिरासीत् अक्षमो बभूव । अथ द्वितीयार्धव्याख्या—ब्रध्नो रविर्यथा येन प्रकारेण विश्वविसारि जगद्व्यापि धाम तेजो दधाति धारयति, तथा तेन प्रकारेण सुमतिर्जिनः अतिविश्वं विश्वातिगं धाम दधातीत्यर्थः ॥ १२ ॥

अथ पदकस्थाने स्वस्तिकचित्रमाह—

नरानराणाममरासुरेन-नवीनलक्ष्मीं ददतो नतेन।नमाम्यतीताननघाननेन,नवेन नुत्वा न न मस्तकेन१३

व्याख्या—अतीतान् अनघान् जिनान्, अनेन नवेन स्तवेन, नुत्वा स्तुत्वा, मस्तकेन शिरसा, न न नमामि । द्वौ नञौ प्रकृतमर्थं गमयतः । अपि तु नमाम्येव । किंविशिष्टान् ? नतेन नमनेन नरानराणां नरा मनुष्या अनरा देवाः,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नराश्चानराश्च नरानरास्तेषां । अमरासुरेननवीनलक्ष्मीं अमरा देवा असुरा ( श्च ) भवनपतयः तेषा ( इना इन्द्राः तेषां ) नवीना प्रत्यग्रा लक्ष्मीः कमला तां ददतो वितरत इत्यर्थः ॥ १३ ॥

अथ चतुर्दशं वृत्तमाह—

इत्थं स्वस्तिकनायकेन रुचिरा सत्कण्ठभूषाकरी, येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना-स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥१४॥

व्याख्या—पादत्रयार्थः पूर्ववत् । चतुर्थपादो व्याख्यायते—ते जिनाः, अस्य मे मम सूरिपदानन्तरं जयादितिलकस्य जयपूर्वतिलकस्य जयतिलकस्येत्यर्थः, मङ्गलं कल्याणं, देयासुर्वितीर्यासुः । अपिशब्दादन्येषामपीत्यर्थः ॥ १४ ॥

॥ इत्यागमिकश्रीजयतिलकसूरिकृताऽतीतचतुर्विंशतिकाजिनद्वितीयहारावलिचित्रस्तवटीका ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथानागतचतुर्विंशतिकाहारावलीतृतीयचित्रस्तवं व्याचिख्यासुः प्रथमं वृत्तमाह—

| | | |
|---|---|---|
| प | द्मा दुरापा तव पद्मना | भ!, |
| द्म | तेव शब्दादिगता जिनें | द्र। |
| ना | थोऽङ्गिनां भद्रकृदाप्तगीः | कृत्, |
| भ | वेन्दिराया इव साध्वहो | अः ॥ १ ॥ |

व्याख्या—हे पद्मनाभ जिनेन्द्र ! तव पद्मा लक्ष्मीर्दुरापा दुष्प्रापा वर्तते इत्यध्याहार्यं। केव ? शब्दादिगता द्मतेव यथा शब्दादौ 'द्म' इति संयुक्ताक्षरं दुर्लभं। अथोत्तरार्धव्याख्या—हे भद्रकृत् चरमजिनपते !। अहो इति संबोधने। त्वं साधु सम्यक्प्रकारेण, अङ्गिनां प्राणिनां, नाथो भव। किंविशिष्टस्त्वं ? आप्तगीःकृत् आगमवाणीविधायकः। क इव ? अ इव विष्णुरिव। यथा विष्णुरिन्दिराया लक्ष्म्या नाथो बभूवेत्यर्थः, सर्वत्रापातनिका पूर्ववत्॥ १॥

द्वितीयवृत्तमाह—

| | | |
|---|---|---|
| सू | रादिदेवाभ्युदयं जनी | नं, |
| र | वेरिवेच्छामि तवेह ता | त!। |
| दे | शे क ते संगम एष भा | वी, |
| व | रेण्यपुण्याप्तिरनन्तवी | र्य!॥ २॥ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—हे सुरादिदेव सूरदेव ! तात इहास्मिन् संसारे तवाभ्युदयमिच्छामि वाञ्छामि, किंविशिष्टं ? जनीनं जनेभ्यो हितं । कस्येव ? रवेरिव सूर्यस्येव, यथा रवेरभ्युदयमिच्छामीत्यर्थः । द्वितीयार्धव्याख्या—हे अनन्तवीर्य जिन ! एष तव सङ्गमः क्व देशे भावी भविता ? । किंविशिष्टः ? वरेण्यपुण्याप्तिः वरेण्येन प्रधानेन पुण्येन सुकृतेनाप्तिः प्राप्तिर्यस्य स तथा इत्यर्थः ॥ २ ॥

तृतीयवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | भाजि ते पादपयोजवृन्दे | दे, |
| सु | पार्श्व भृङ्गामि कदा मुदै | व । |
| पा | र्श्वे न दोषास्तव सन्ति वा | दे, |
| र्श्वे | पूर्वशब्दा इव देवदे | व !॥ ३॥ |

व्याख्या—हे सुपार्श्व ! जिन, ते तव, पादपयोजवृन्देऽहं कदा मुदैव हर्षेणैव भृङ्गामि भृङ्गवदाचरामि । कदाकर्ह्योर्न वेति ( ५-३-८ ) वर्तमाना । किंविशिष्टे ? श्रीभाजि लक्ष्मीजुषि । अथापरार्धव्याख्या—हे देवदेव तव पार्श्वे दोषा न सन्ति । कस्मिन् के इव । वादे श्वेपूर्वशब्दा इव यथा वदने श्वेपूर्वाः शब्दा न भवन्तीति भावः ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ चतुर्थवृत्तस्थापना—

| | | |
|---|---|---|
| स्व | यंप्रभ प्राभवमस्तु का | म- |
| यं | तुस्तवोल्लङ्घितमोहम | ल्ल । |
| प्र | भो ! पतन्तं प्रबले प्रमा | दे, |
| भ | व्यं जनं प्रोद्धर मल्लदे | व !॥ ४ ॥ |

व्याख्या—हे स्वयंप्रभ ! उल्लङ्घितमोहमल्ल तव प्राभवं प्रभुत्वमस्तु । कथंभूतस्य तव ? कामयन्तुः मदनविजेतुः । अथोत्तरार्धव्याख्या—प्रभो स्वामिन् मल्लदेव भव्यं जनं प्रबले प्रमादे पतन्तं प्रोद्धर देशनादानेन निवारयेत्यर्थः ॥ ४ ॥

अथ पञ्चमवृत्तस्थापना—

| | | |
|---|---|---|
| स | र्वानुभूते ! तव भाविनी | श्री- |
| र्वा | चंयमैरत्र न कैरना | वि ?। |
| नु | न्नो नियत्या शुभयार्थपुं | ज- |
| भू | ताय ते श्रीविजय स्तवा | य ॥ ५ ॥ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—हे सर्वानुभूते ! तव, भाविनी भविष्यन्ती, श्रीर्लक्ष्मीरत्र संसारे कैर्वाचंयमैर्नानावि न तुष्टुवे? ।अथोत्तरार्धव्याख्या–श्रीविजय जिन ! अहं, शुभया नियत्या, भव्येन पुराकृतकर्मणा, ते तव, स्तवाय स्तवनाय, नुन्नः प्रेरितः । किंभूताय स्तवाय ? अर्थपुञ्जभूताय अर्थोत्कररूपायेत्यर्थः ॥ ५ ॥

अथ षष्ठवृत्तस्थापना–

| | | |
|---|---|---|
| ति | रस्कुरु त्वं कमनीयका | य!, |
| दे | वश्रुतारीनघकौशिकां | शो ! । |
| व | चो विपक्षोऽपि यशोधरा | धः, |
| श्रु | त्वा न कर्ता तव हेतुसा | रं ॥ ६ ॥ |

व्याख्या—हे देवश्रुत जिन ! हे कमनीयकाय मनोहरशरीर ! हे अघकौशिकांशो पापोलूकरवे ! त्वं अरीन् शत्रून्, तिरस्कुरु विनाशयेत्यर्थः । अपरार्धव्याख्या–हे यशोधर जिन ! विपक्षोऽपि वैर्यपि, तव वचः श्रुत्वा, नाधः कर्ता न निराकर्ता, किंविशिष्टं वचः ? हेतुसारं दृष्टान्तैः सबलमित्यर्थः ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सप्तमवृत्तस्थापना–

| | | |
|---|---|---|
| त | मस्युदेष्यत्युदयोडुप | श्रीः, |
| उ | त्काश्चकोरा रचयन्तु ला | सं । |
| द | धाति ते संवर ! सूरतै | व, |
| य | था प्रभामेधि तथाप्रका | रः ॥ ७ ॥ |

व्याख्या—उदयोडुपश्रीः उदयजिनचन्द्रलक्ष्मीः, तमसि अज्ञानरूपे, उदेष्यति उदयं यास्यति। चकोरा दक्षा, लासं रचयन्तु हर्षं नाटयन्तु । किंविशिष्टाः ? उत्का उत्कण्ठिताः । अविवक्षितत्वादसन्धिः । अथापरार्धव्याख्या–हे संवर जिन ! यथा ते तव सूरतैव प्रभां दधाति धारयति त्वं तथाप्रकार एधि तथाप्रकारो भवेत्यर्थः ॥ ७ ॥

अथाष्टमवृत्तस्थापना–

| | | |
|---|---|---|
| श्री | रागमिश्रो भविताऽत्र यः | श्री- |
| पे | ढाल कैस्ते ध्वनिराप्यते | सः ?। |
| ढा | क्स्वराभं भुवि यस्य ना | मा- |
| ल | क्ष्मीप्रयाणे स जिनः समा | धिः ॥ ८ ॥ |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—हे पेढाल जिन !, अत्र संसारे, ते तव, यः श्रीरागमिश्रो ध्वनिर्भविता स ध्वनिः कैराप्यते ? अपि तु न कैरपीत्यर्थः। अथापरार्धव्याख्या–यस्य जिनस्य नाम, भुवि भूमौ, अलक्ष्मीप्रयाणे अश्रीनिर्गमे, ढाक्कस्वराभं ढक्काया अयं ढाक्कः ढाक्कश्चासौ स्वरश्च ढाक्कस्वरस्तद्वदाभा शोभा यस्य स तथा तं ढक्कास्वरसमानमित्यर्थः । समाधिनामा जिनो वर्तत इतिवृत्तार्थः ॥ ८ ॥

अथ नवमवृत्तमाह–

| | | |
|---|---|---|
| पो | ता द्विषः पोट्टिल ! भान्ति के | चि- |
| ट्टि | ड्डा इवार्कस्य रुचौ तवा | त्र । |
| ल | यं जना नामनि ये तवा | गु:- |
| श्रीः | सेवते तानिह चित्रगु | प्त !॥ ९ ॥ |

व्याख्या—हे पोट्टिल जिन !, अत्रास्यां रुचौ तव भवतः प्रभायां केचित् द्विषः शत्रवः, पोता इव पोता लुप्तोपमत्वाद्बाला इव, भान्ति शोभन्ते । के इव ? टिड्डा इव यथाऽर्कस्य रुचौ टिड्डा भान्ति तथेत्यर्थः । अथापरार्धव्याख्या–चित्रगुप्त जिन !, ये तव नामनि लयं अगुरगमन् , इहास्मिन् संसारे, श्रीर्लक्ष्मीः, तान् सेवते भजत इत्यर्थः ॥ ९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ दशमवृत्तस्थापना—

| | | |
|---|---|---|
| सि | तादिकीर्ते ! तव कीर्तना | नि, |
| त | न्वन्ति लोके सुविशुद्धक | र्म । |
| की | र्तिः परा निर्मम ! देहिना | म- |
| र्ति | ध्वान्तमस्यात्तव चन्द्ररुक् | श्रीः ॥ १० ॥ |

व्याख्या—हे सितादिकीर्ते ! सितकीर्ते जिन ! तव 'कीर्तनानि' नामग्रहणानि 'लोके' लोकमध्ये 'सुविशुद्धकर्म' निर्मलं कर्म 'तन्वन्ति' विस्तारयन्तीत्यर्थः। अथापरार्धव्याख्या—हे निर्मम ! तव 'परा' प्रकृष्टा कीर्तिर्देहिनां प्राणिनां अर्तिध्वान्तं पीडातमोऽस्यात्-क्षिपेत् ( क्षिप्यात् ) किंविशिष्टा कीर्तिः? चन्द्ररुक्श्रीः चन्द्रकान्तिवत् श्रीः शोभा यस्याः सा चन्द्ररुक्श्रीरित्यर्थः ॥१०॥

अथैकादशवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | सुव्रतस्यार्हति यः पदा | नि, |
| सु | रद्रुमास्तस्य गृहे पुपु | ष्पुः । |
| व्र | ते मनोवृत्तिरिहास्त्वलो | ला, |
| त | त्वोपदेशं दिश निष्पुला | क ! ॥११॥ |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्याख्या—यो जनः श्रीसुव्रतार्हतः 'पदानि' पादुका 'अर्हति' पूजयति तस्य 'गृहे' मन्दिरे 'सुरद्रुमाः' कल्पवृक्षाः 'पुपुष्पुः' पुष्पितवन्तः । अथापरार्धव्याख्या—हे निष्पुलाक जिन ! ममेत्यध्याहार्यं मम मनोवृत्तिर्व्रते-चारित्रेऽलोला स्थिराऽस्तु भवतु । त्वं मे तत्त्वोपदेशं 'दिश' अतिसर्जयेत्यर्थः ॥ ११ ॥

अथ द्वादशचित्रस्थापना—

| | | |
|---|---|---|
| श्री | खण्डचर्च्यानि पदानि ता | नि, |
| अ | र्हाम्यहं तेऽमम ! दत्तनि | ष्क !। |
| म | मास्त्वखण्डा त्वयि भक्तिरे | षा, |
| म | हामुनीनामिन ! निष्कषा | य ! ॥ १२ ॥ |

व्याख्या—हे अमम जिन! दत्तनिष्क दत्तं निष्कं सुवर्णं येन स तथा तस्यामन्त्रणं, अहं ते तव तानि सर्वलोकप्रसिद्धानि 'पदानि' पादुका 'अर्हामि' पूजयामि। किंविशिष्टानि ? श्रीखण्डचर्च्यानि-चन्दनलेप्यानि । अथापरार्धव्याख्या—हे निष्कषाय जिन ! हे महामुनीनां इन स्वामिन् ! एषा मम भक्तिस्त्वयि विषयेऽखण्डाऽत्रुटिताऽस्तु भवत्वित्यर्थः ॥१२॥



For Private And Personal Use Only

अथ नायकस्थाने वज्रबन्धविचित्रस्थापना—

भाव्या जिना मेऽत्र भवन्तु तुल्य--श्रियः सुरेनव्रजसेव्यपादाः ।
दानादिधर्मान्वितधौततत्त्वो–पदेशदानस्थितये स्थिराभाः ॥ १३ ॥

व्याख्या—'अत्र' संसारे 'भाव्या' भविष्यन्तो जिना 'मे' मम 'दानादिधर्मान्वितधौततत्त्वोपदेशदानस्थितये भवन्तु' दानमादि येषां ते दानादयः, ते च ते धर्माश्च दानादिधर्माः तैरन्वितानि धौतानि निर्मलानि तत्त्वानि, तेषामुपदेशास्तेषां दानं तस्य स्थितिस्तस्यै सन्तु। किंविशिष्टाः ? 'तुल्यश्रियः' समानलक्ष्मीकाः। अपरं किंविशिष्टाः ? 'सुरेनव्रजसेव्यपादाः' अमरस्वामिसमूहाराध्यचरणाः। अपरं किंविशिष्टाः ? 'स्थिराभा' निश्चलकान्तयः। इति वृत्तार्थः॥ १३ ॥

अथ समाप्तिवृत्तमाह—

इत्थं नायकवज्रबन्धरुचिरा सत्कण्ठभूषाकरी, येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना-स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥१४॥

व्याख्या—पूर्ववत् ॥ १४ ॥

॥ इत्यागमिकश्रीजयतिलकसूरिकृता हारावलीतृतीयचित्रस्तवटीका ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ विहरमाणशाश्वतजिनहारावलिचित्रस्तवं चतुर्थं व्याचिख्यासुः प्रथमवृत्तमाह—स्थापना—

| | | |
|---|---|---|
| सी | मन्धरः पूर्वविदेहभू | श्री- |
| मं | गल्यचित्रोऽस्तु मुदे प्रजा | सु । |
| ध | र्मं दिशन् सम्प्रति पक्वबिं | बा- |
| र | क्ताधरोऽसौ जयतात्सुबा | हुः ॥ १ ॥ |

व्याख्या—सीमन्धरो जिनः'प्रजासु' लोकेषु मुदेऽस्तु। किंविशिष्टः? 'पूर्वविदेहभूश्रीमङ्गल्यचित्रः' महाविदेहभूमिलक्ष्मीमङ्गल्यतिलकः। अथापरार्धव्याख्या—असौ सुबाहुर्जिनः सम्प्रत्यधुना धर्मं दिशन् जयताज्जयतु। किंविशिष्टः? 'पक्वबिम्बारक्ताधरः' पक्वबिम्बवदारक्तोऽधरो यस्य स तथा। इति वृत्तार्थः॥ १॥

अथ द्वितीयवृत्तस्थापना—

| | | |
|---|---|---|
| यु | गन्धर ! त्वं जय चक्रवा | यु- |
| गं | धेन संप्रीणितभव्यभृं | गः । |
| ध | र्मद्विषोऽर्कान् ग्रसतेऽत्र बुं | बा,- |
| र | वं वितन्वन् युगबाहुरा | हुः ॥ २ ॥ |



For Private And Personal Use Only

व्याख्या— हे युगन्धर ! त्वं जय । किंविशिष्टः ? 'चक्रवायुगन्धेन संप्रीणितभव्यभृङ्गः' मुखपवनपरिमलेन तृप्तिकृतभव्यभ्रमरः । अथापरार्धव्याख्या—'युगबाहुराहुः' युगबाहुरेव राहुः सैंहिकेयो 'धर्मद्विषो' धर्मवैरिणः ( अर्कान् ) सूर्यान् 'अत्र' संसारे ग्रसते । किं कुर्वन् ? बुम्बारवं वितन्वन् जितं जितमिति कोलाहलं कुर्वन् । कोऽर्थः ? राहुसमानो जिनः अर्कसमा द्वेषिणः, सबलत्वाद्राहोरुपमा ॥ २ ॥

अथ तृतीयवृत्तस्थापना—

| | | |
|---|---|---|
| सु | जात ! तीर्थङ्कर निर्विका | र, |
| जा | गर्षि येषां हृदि तैरपा | वि । |
| त | नोतु भङ्गं मम कर्मव | प्र- |
| वृ | क्षावलीनां स रविप्रभे | भः ॥ ३ ॥ |

व्याख्या— हे सुजात तीर्थङ्कर ! हे निर्विकार ! येषां हृदि त्वं 'जागर्षि' स्फुरसि तैरपावि–पवित्रैर्जातं । अथापरार्धव्याख्या— स जगत्प्रसिद्धो 'रविप्रभेभः' रविप्रभनामहस्ती मम 'कर्मवप्रवृक्षावलीनां' कर्मतटद्रुमश्रेणीनां 'भङ्गं' विनाशं तनोतु करोत्वित्यर्थः ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुर्थवृत्तस्थापना—

| | | |
|---|---|---|
| ष | ण्णामृतूनां समकालभा | वि- |
| भा | वाः श्रितास्त्वां वृषभानने | शाः । |
| न | वर्ण्यते कैस्तव हे विशा | ल!, |
| न | वाम्बुजन्यासभवा पद | श्रीः ॥ ४ ॥ |

व्याख्या— हे वृषभानन ! षण्णामृतूनां ईशाः स्वामिनस्त्वां श्रिताः। किंविशिष्टा ? 'समकालभाविभावाः' युगपत्संपद्यमानस्वस्वपुष्पोद्गमादिभावाः । अथापरार्धव्याख्या—हे विशाल जिन ! 'नवाम्बुजन्यासभवा पदश्रीः' नवकमलन्यसनोत्पन्ना चरणलक्ष्मीः कैर्न वर्ण्यते ? अपि तु सर्वैरपि वर्ण्यते ॥ ४ ॥

अथ पञ्चमवृत्तस्थापना—

| | | |
|---|---|---|
| स्व | यंप्रभ ! त्वं जय दुष्टभा | व- |
| यं | त्रोपमो मोहमहीध्रव | ज्र । |
| प्र | सन्नगम्भीरपदाः प्रबो | ध- |
| भ | व्या गिरो वज्रधरश्चका | र ॥ ५ ॥ |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या— हे स्वयंप्रभ जिन ! त्वं 'जय' नन्द। किंविशिष्टस्त्वं ? 'दुष्टभावयन्त्रोपमः' दुरध्यवसाययन्त्रसमानः। हे 'मोहमहिध्रवज्र' हे मोहपर्वतपवे । अथापरार्धव्याख्या— वज्रधरो जिनः प्रसन्नगम्भीरपदा गिरश्चकार । किंविशिष्टाः ? 'प्रबोधभव्याः' प्रकृष्टो बोधः प्रबोधः तेन भव्या इत्यर्थः॥ ५॥

अथ षष्ठवृत्तस्थापना—

| | | |
|---|---|---|
| अ | नन्तवीर्यस्य जिनस्य वा | चं, |
| नं | दिप्रदात्रीं ब्रुवते मुनीं | द्राः । |
| त | वापि चन्द्रानन ! चिन्निधा | न, |
| ब | लस्य पारं न विदन्त्यमा | न ॥ ६ ॥ |

व्याख्या— 'मुनीन्द्रा' गणधरा अनन्तवीर्यस्य 'वाचं' वाणीं नन्दिप्रदात्रीं 'ब्रुवते' कथयन्ति। अथा परार्धव्याख्या— हे चन्द्रानन ! हे चिन्निधान ! ज्ञानशेवधे 'अमान' अकलनीय । अपिः समुच्चये। तव बलस्य पारं 'न विदन्ति' न जानन्ति अनन्तवीर्यत्वादित्यर्थः ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सप्तमवृत्तस्थापना—

| | | |
|---|---|---|
| ल | गन्ति कौ यस्य पदा न या | ने, |
| भु | जङ्गदेवं तमहं नमा | मि । |
| जं | भारिसेव्यातिशयप्रदी | प्र ! |
| ग | वीह नेमिप्रभ ! मेऽस्तु ला | भः ॥ ७ ॥ |

व्याख्या—यस्य पदाश्चरणा 'याने' गमने 'कौ' पृथिव्यां 'न लगन्ति' न स्पृशन्ति, अहं तं भुजङ्गदेवं 'नमामि' नमस्करोमि । अथोत्तरार्धव्याख्या—तवेत्यध्याहार्यं । हे नेमिप्रभ जिन ! इहास्यां 'गवि' भूमौ 'मे' मम तव 'लाभः' प्राप्तिरस्तु । हे जम्भारिसेव्य ! शक्राराध्य । हे अतिशयप्रदीप्र ! चतुस्त्रिंशदतिशयदीप्तिमन् इति सम्बोधनपदद्वयं इत्यर्थः ॥ ७ ॥

अथाष्टमवृत्तस्थापना—

| | | |
|---|---|---|
| वी | रासनं क्षीरविशुद्धवा | चं, |
| रा | त्रौ दिवा च स्मर भो वितं | द्रः । |
| स | नातनं राज्यमिहाविलं | बा- |
| न | तो ददाति प्रभुचन्द्रबा | हुः ॥ ८ ॥ |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—भो इत्यामन्त्रणे हे जन! त्वं वितन्द्रः सन् सोद्यमः सन् रात्रौ दिवा च वीरासनं जिनं स्मर। किंविशिष्टं? 'क्षीरविशुद्धवाचं' दुग्धनिर्मलवचसं। अपरार्धव्याख्या—'प्रभुचन्द्रबाहुः' प्रभुश्चासौ चन्द्रबाहुश्च तत्पुरुषः। 'इह' संसारे 'अविलम्बानतो' द्रुतं प्रणतः 'सनातनं' शाश्वतं 'राज्यं' साम्राज्यं 'ददाति' वितरतीत्यर्थः ॥ ८ ॥

अथ नवमवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | ईश्वरं तीर्थकरं नमा | म, |
| ई | शा भवामो वयमप्यदे | हाः। |
| श्व | सन्ति जीवा ब्रुवति त्वयी | भ- |
| र | वे महाभद्र! जिनेन्द्रचं | द्र!॥ ९॥ |

व्याख्या—अपिश्चार्थे। वयं श्रीईश्वरं तीर्थकरं जिनं 'नमामो' वन्दामहे। ततोऽदेहा–अशरीरा 'ईशा' ऐश्वर्यशालिनो भवामः। अथापरार्धव्याख्या—हे महाभद्र! जिनेन्द्रचन्द्र त्वयि ब्रुवति सति 'जीवाः' प्राणिनः 'श्वसन्ति' प्राणधारणं कुर्वन्ति जीवन्तीत्यर्थः, किंविशिष्टे त्वयि? 'इभरवे' गजवद्गम्भीरस्वरे इत्यर्थः॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ दशमवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | पुष्करार्धे प्रणमाम्यमं | दे, |
| अ | र्हं पदे तेऽजितवीर्यदे | व ! । |
| जि | नो यकान् देवयशा इया | य, |
| त | एव रम्या जगतीह दे | शाः ॥ १० ॥ |

व्याख्या—हे अजितवीर्यदेव! अहं श्रीपुष्करार्धे पुष्करवरद्वीपार्धे 'ते' तव 'पदे' पादुके प्रणमामि। किंविशिष्टे? 'अमन्दे' अजिह्मे । अथापरार्धव्याख्या—देवयशा जिनो 'यकान्' यान् देशान् 'इयाय' जगाम, 'इह जगति' विश्वे त एव देशा रम्या रमणीया इति वृत्तार्थः ॥ १० ॥

अथैकादशवृत्तस्थापना—

| | | |
|---|---|---|
| श्री | सिद्धचैत्येष्वृषभस्य से | वा, |
| ऋ | द्ध्या महत्या विबुधैरका | रि। |
| ष | ड्धसंख्येऽत्र जगत्यशे | षे, |
| भ | व्यानतो नन्दतु वारिषे | णः ॥ ११ ॥ |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—'श्रीसिद्धचैत्येषु' सिद्धायतनेषु विबुधैर्देवैर्महत्या प्रौढया, ऋद्ध्या समृद्ध्या, ऋषभस्य शाश्वतजिनस्य,सेवा पर्युपास्तिरकारि चक्रे। अथापरार्धव्याख्या—वारिषेणो जिनः अत्र 'षडर्धसंख्ये' षण्णामर्धं षडर्धं त्रयः तत्समाना संख्या यस्य तत्तथा ( तत्र ) त्रैलोक्य इत्यर्थः। जगति विश्वे। अशेषे समस्ते । भव्यानत आसन्नसिद्धिकैर्नतो नमस्कृतः । नन्दतु समृद्धिं भजत्वित्यर्थः ॥ ११ ॥ अथ द्वादशवृत्तस्थापना—

| | | |
|---|---|---|
| चं | द्राननार्केन्दुमहांसि या | व- |
| द्रा | गोऽस्तु तावत्त्वयि मे पर | र्द्ध!। |
| न | मोऽस्तु ते शाश्वतचैत्यभू | मा- |
| न | नाढ्यपुण्ड्राय च वर्धमा | न ॥ १२ ॥ |

व्याख्या—हे चन्द्रानन जिन ! 'यावदर्केन्दुमहांसि' सूर्यचन्द्रतेजांसि वर्तन्ते। हे परर्द्ध! परः प्रकृष्ट ऋद्धः परर्द्धस्त-स्यामन्त्रणं हे परर्द्ध!।'मे' मम 'त्वयि'भवति 'तावत्'तावन्तं कालं 'रागोऽस्तु' भक्तिर्भवत्वित्यर्थः। अथापरार्धव्याख्या—हे वर्धमान जिन ! ते तुभ्यं नमोऽस्तु। किंविशिष्टाय तुभ्यं ? 'शाश्वतचैत्यभूमाननाढ्यपुण्ड्राय' सिद्धायतनभूमिश्रीमुखप्र-धानतिलकाय इति वृत्तार्थः ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ नायकस्थाने बन्धुकस्वस्तिकचित्रस्थापना—

तातोपमा मानविहीनदेहा, हावादिना नाकिनराबलाभिः ।
भिन्ना न येऽये स्वबलैरमेया, याचे रमामादरभाविनीं तान् ॥ १३ ॥

व्याख्या—ये जिना नाकिनराबलाभिरमर्त्यमर्त्यनायिकाभिः 'हावादिना' हावभावविकारेण 'न भिन्ना' न मनागपि क्लिन्नाः । किंविशिष्टाः ? 'तातोपमाः' पितृतुल्याः । अपरं किंविशिष्टाः ? मानविहीनदेहा अभिमानवर्जितदेहाः । अये इत्यामन्त्रणे । अपरं किंविशिष्टा ? स्वबलैरमेयाः निजवीर्यैरप्रमेयाः । तान् जिनान् अहं 'रमां' लक्ष्मीं 'याचे' मार्गयामि । किंविशिष्टां रमां ? 'आदरभाविनीं' आदरेण तपोविधानध्यानलक्षणेन भवतीत्येवंशीला आदरभाविनी तां मुक्तिलक्षणामित्यर्थः ॥ १३ ॥

अथ चतुर्थचित्रस्तवसमाप्तिवृत्तमाह—

इत्थं बन्धुकनायकेन रुचिरा सत्कण्ठभूषाकरी, येषां नाममयैः सुवर्णमणिभिर्हारावली निर्मिता ।
चारित्रप्रभदीक्षितस्तुतपदा देयासुरुच्चैर्जिना—स्ते श्रीसूरिपदाज्जयादितिलकस्यास्यापि मे मङ्गलम् ॥१४॥

व्याख्या—पूर्ववत् ॥ १४ ॥

॥ इत्यागमिकश्रीजयतिलकसूरिकृता विहरमाणशाश्वतजिनचतुर्विंशतिकाहारावलीचतुर्थचित्रस्तवटीका ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

। श्रीमुनिचन्द्रसूरिकृता ( ? )

# । प्रश्नावलिः ।

( सावचूरिः )

मद्गुस्त्री परिपृच्छतीदमुदिता ब्रह्मांगजा कीदृशी[1] ?, प्रश्नं व्याहरतो भुवावपशदे रम्येह का केकिनाम्[2] ?।
कामश्वक्रयुगं च पृच्छति बकं कः प्साति पक्षी हठा–[3]द्वालानां वद मातृकोपरि कथं पापठ्यते संहतिः[4] ॥१॥

अव०—"ककाकि की, कुकू के[2] कै, (ए)कोकौ कंकः[3]"[4]। द्वादशवर्गा(र्णा)णामक्षरगमनिकामात्रं लिख्यते। यथा–मद्गुर्जलकाकः तस्य स्त्री इदं पृच्छति—ब्रह्मणः सुता कीदृशी उच्यते ? काकः प्रत्युत्तरं दत्ते तां प्रति–हे ककाकि ! की सरस्वती कथ्यते, कं जलं तत्र काकी तस्याः संबोधनं हे ककाकि, को ब्रह्मा तस्यापत्यं "इणत" (६-१-३१ अतइञ् पा०)इप्रत्ययः, नदादित्वात् ई की । अपशदे कुत्सिते भुवौ पृथ्व्यौ प्रश्नं व्याहरतः पृच्छतः—इह भुवि केकिनां मयूराणां का रम्या मनोज्ञा उच्यते ? हे कुकू केका कुश्च कुश्च कू सरूपाणामेकः शेषः कु, अग्रे प्रथमा औ,इदुतोऽस्त्रेरीदूत् (१–४–२१) इत्यनेन ऊ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कू, कुत्सिते कू कुकू,केका मयूरध्वनिविशेषः। कामः–स्मरः चक्रवाकद्वयं च पृच्छति—कः पक्षी बकं प्साति भक्षयतीति। हे ए काम हे कोकौ ! कंकः पक्षी बकं अत्ति। बालकानां मातृकायां का वर्णसंहतिर्भण्यते ? इति काव्यार्थः ॥ १ ॥

का वर्णद्वितयी त्रिविष्टपधुनीं ब्रूते युता बिन्दुना[1]?, कीदृक्षं शिवयोर्युगं[2] ? तरुढया ब्रूयुः क पूर्वे सति ?
अर्थान् कांश्चिदनुक्रमेण चतुरः[3] शैलश्च कामस्तथा, कीदृक्षो हिमवानिति प्रवदतो[4] वर्ग(र्ण)स्तृतीयश्च कः[5] २

अव०—"गगां,ऽगि[2] गीगुगूगे ऽगै, गोगौगंगः[4]"[5]। गगावर्णद्वयी बिन्दुना सहिता सती त्रिविष्टपधुनीं गंगां ब्रूते। शिवश्च शिवा च तद्युगं कीदृशं उच्यते ?। अगि अगः पर्वतः विद्यते यस्य तत्। तरुढयाश्चत्वारो वर्णाः कस्मिन्नक्षरे पूर्वे सति चतुरोऽर्थान् ब्रूयुः ? गीगुगूगे एभिर्वर्णैः पूर्वस्थितैः गीतगुरुगूढगेयलक्षणान् चतुरोऽर्थान् ब्रूयुः। शैलः पर्वतः कामश्च पृच्छति—हिमवान्–हिमाचलः कीदृक्षः ? हे अग हे ए ! गोगौगंगः प्रणिगद्यते, गां गच्छतीति गोग ईश्वरः, अव रक्ष पालने अव(वु), गोगमवतीति क्विप् मव्यवि सिवि(श्रिवि)ज्वरित्वरेरुपांत्येन ( ४–१–१०९ ) अनेन व ऊः, अवर्णात् ऊटो वृद्धिः(१-२-१३ ऊटा) औ, गोगौः गंगा यत्रेति व्युत्पत्त्या। वर्ग(र्ण)स्ततीयः कः कथ्यते ? इति ॥ २ ॥

कीदृग्भूरिसरारि राजति सरो[1] ? वृत्तान्यवत् पृच्छेति[2]?, द्वित्वं प्राप्तमवोचदव्ययपदं[3] ? किंचित्तथा श्रीरपि[4]।
शोकः किंप्रभवो वदन्ति[5] कमलारक्षित्वमुक्तं च[6] किं, पश्चाच्चन्द्रकलामितः स्वरततेर्वर्णश्च वर्गश्च कः[7] ॥३॥

अव०—"ततांति[1] तीतु[2] तू[3] ते[4] तैतोऽ[5]तौतं[6] तः[7]"। भूरिसरारि ! सरः कीदृग् भाति ? ततांति तता आतयो जलजीवविशेषा यत्र तत्, आटिरातिः साराति(रि)श्चेत्येकार्थाः। वृत्तान्यवत् किंचित पृच्छति, तथाऽव्ययपदं द्वित्वं प्राप्तं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किंचिदवोचत्, तथा श्रीश्च । त्रयाणामुत्तरं दत्ते—हे तीतु, हे तू, हे ते, तैतः शोको भवेत्, तीतान्यतीतानि अवतीति क्विप्, मव्यवीत्यनेन व ऊः, अवर्णादूटो वृद्धिः औ, क्लीबे ह्रस्वः । तुश्च तुश्च तू । हे ते हे लक्ष्मि ! । तीताद्भवस्तैतः । तामवतीति तौः तावो भावः तत् तौता ( तं ), भावे तल् प्रत्ययः ( ७–१–५५– भावे त्वतल् ), स्त्रियामादा ( २–४–१८ आत् ) आ ह्रस्वत्वं, न तौतं अतौतं । षोडशो वर्णः वर्गश्च कः ? तः ॥ ३ ॥

नञ् पृष्टा मिथुने मनोभवसुखं स्याद्रंगवत्कीदृशे[1], स्वामित्रं कुलमाह[2] कीदृशि भवेद्वाक्ये वितर्कच्युतिः ।
विष्णोरन्य उवाच किं[4] कुगतये[5] पूर्णस्य संबन्धि किं, वाच्यं[6] वक्ति नरस्तथा स्वरयुतो विंशोऽथ वर्णश्च कः[8] ४

अव०—"न नानिनी[1](इ) नु[2] नूने[3]ऽ नै[4] (ए)नो[5]ऽनौ[6] नं[7] नः"[8] । हे न । नानिनि इः कामो विद्यते यस्य तत् इन् इवर्णावर्णयोः (७-४-६८ अवर्णेवर्णस्य) इति इलोपः तस्मिन् इनि, न इनि अनिनि, न अनिनि नानिनि, द्वौ नञौ प्रकृत्यर्थं गमयतः, सकामे मिथुने रंगवत् सुखं स्यात् । इनं अवतीति हे इनु ! नुना ऊने नूने वाक्ये वितर्काभावः । अः विष्णुः, न अः अनः हे अन । एनः पापं । ऊनाद्भवं औनं, न औनं अनौनं । हे नः पुरुष । न इत्ययं विंशो वर्णः ॥ ४ ॥

वर्णः कश्चिदुवाच[1] निर्दयकुलं कीदृक्[2] तथा प्यायतेः, स्वांगे क्के किमु[3] कीदृशं गुरुवचः[4] प्रायः क्व भक्ष्ये रुचिः[5] ।
कीदृग्वैष्णववर्जितोऽत्र विषयः[6] श्रीदक्षिणात्कीदृशो, देशोऽन्योऽथ[7] वदैकविंशतितमो वर्गश्च कः कथ्यताम्[8] ५

अव०—"पं[1] पापि[2] पी[3] पु[4] पूपे[5] ऽपैपो[6] ऽपौपं[7] पः"[8] । हे पवर्ण ! । पापि पापयुक्तं । प्यायतेर्धातोः पीभवति । पुना-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीति पूः क्विप्, क्लीबे ह्रस्वः, पु पवित्रं । पूपे पोलिकायां । ई पातीति ईपः विष्णुः, ईपो देवता येषां ते ऐपाः वैष्णवाः, अपगता ऐपा वैष्णवा यस्माद्देशात् सः अपैपः । पां पाने, पा पानं, पा विच्, पां अवतीति पौ, पौ च पंपा च सरः पौपंपा ( पं ) न विद्यते पौपंपा ( पं ) यत्र सोऽपौपंपः । एकविंशो वर्णः पः ॥ ५ ॥

का स्याल्लक्ष्या निशायामुडुतनयभयानङ्गमेतद्[1]ब्रवीति,
ध्वान्तं धिष्ण्यं च वक्ति प्रवर इह गमः कथ्यते[3] कः[2] सुधीभिः ।
छायासंत्रायिढक्कः कथय किल कथं पूरुषो भाषणीयो,
जैनीं संख्यां प्रपन्नो वद विबुध ककालेखके कोऽत्र वर्णः ॥ ६ ॥

अव०—"भभा, भि[1]भी(इ)भु भूभे, भैभो[2] भौभंभः[3]"[4] । भानां नक्षत्राणां भा कान्तिः भभा। उडुतनयश्च भयं चानंगश्च तत् समाहारत्वादेकत्वं नपुंसकत्वं च, एतत्त्रयं पृच्छति। भस्यापत्यं भिः, इणत ( अत इञ्) इप्रत्ययः, इवर्णावर्णश्च ( अवर्णेवर्णस्येति ) अलोपः भिः । भीर्भयं । ई लक्ष्मीस्तस्या भवतीति ईभूः कामः । भिश्च भीश्च ईभूश्च भिभीभु ह्रस्वत्वं । भुवो भा भूभा छाया ध्वान्तं तस्याः संबोधनं हे भूभे । हे भ नक्षत्र । इभानामयं ऐभः । भां अवतीति भौः भौ भंभा यस्य स भौभंभः । जैनीं संख्यां २४ रूपां भो वर्णः प्रपन्नः ॥ ६ ॥

कस्य व्याधिसमेत ! कीदृशमिह ब्रूहि त्वमास्ते व[1]पुः,
को धातुर्गमने[2] ऽब्जजां[3]घ्रगसुतौ[4] लक्ष्मीविहीनैः[5] स्मरः ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संबोध्यो हिमरुग्गमश्च वदनं पश्यन् हरः किं श्रमं,
न प्राप्नोति ? शशी ब्रवीति विदितो वर्गान्त्यवर्ग(र्ण) श्च क[1]ः ? ॥ ७ ॥

अव०—"ममा[1]मि मी[2]मु मू[3]मे[4]ऽमै[5], मो[6][7]ऽमौ [8]मं मे[9]:"[10] । हे व्याधिसमेत कस्य कीदृशं वपुरास्ते ? मम संबन्धि, अमि, अम रोगे अमनं अमः, अमो विद्यते यत्र तत् । अम द्रम हम्म मीमृ गमॢ गतौ । मीमृ धातुर्गमने । अब्जजादि । अति अदि बन्धने, ब्रह्मबन्धकं कुलं, मव्य मव बन्धने, मव्, उं ब्रह्माणं मवतीति क्विप् , मव्यवीत्यनेन वः स्थाने ऊ उमू । हे उमे गोरि । दीर्घात्परश्च(स्य) लोपः । न विद्यते मा लक्ष्मीर्यस्य सोऽमः, हे अम । हे ए काम । मसोऽमः गमः मोऽमः, हे मोऽम । उमाया इदं औमं । हे मः चन्द्र । म इत्ययं प्रान्तवर्गाक्षरः ॥ ७ ॥

के विष्णुप्रणतिप्रिया[1]ः स्वरपराद्धातोरिवर्णो भवेत्[2],
किं युक्तादिरुवाच कामयुग[3]लं कामावितॄ[4] श्रीस्तथा[5] ।
चक्रेऽस्मिन् किल किं कुविन्दनिक[6]रैः पुण्यं[7] पुनः क्व श्रिया,
रेमे[8] का जनवल्ल[9]भाः क्व मवचो वर्णेऽश्व[10]वंक्त्रं वदेत् ॥ ८ ॥
कोपायंस्त [11]कमुग्रश्च, प्रसिद्धः कीदृ[12]शो जने ।
षड्विंशतितमो वर्ग(र्ण)ः, कः ककालेखके वद ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"यया[1] यियी[2] यु[3] [4]यू[5]ये[6]ऽ[7]यै यो[8] [10]यौ [11]यं यः[12]:" । अ अग्रे स्, सो रुः, अ उ, अवर्णस्येवर्णादिनैदोदरल् अनेन अस्य ओ । ओ देवता येषां रागान्नक्षत्रअणुतस्थालोप्यादीर्घत्वे ? आः वैष्णवाः, ये आः, ए अय्, रोर्यः यत्वं ययाय् । इय् । इश्च इश्च ई, प्रथमा औ औकारः, पूर्वं औकारस्य इदीर्घत्वे ई कामयुग्मं । इं अवतीति क्विप्, मव्यवीति वः ऊ, इकारस्य यत्वे यू, स्वरो ह्रस्वो यु कामरक्षकं कुलं । ईर्लक्ष्मीः ऊये ईकारस्य यत्वे यूये । हे अय, 'अयः शुभावहो विधिः' । ए विष्णौ । ई प्रथमा जस् ईकारस्य यत्वे यः लक्ष्म्यः । मवर्णः कस्मिन् वर्णे अश्ववक्त्रं किन्नरं वदेत् ? यौ, मपूर्वः युशब्दः किन्नरवाची ॥ ८ ॥ का कं परिणीतवान् ? ईः अं । उग्र ईश्वरः, इं कामं असूच् क्षेपणे अस्यतीति क्विप् यत्वे यः । षाड्विंशो यवर्णः ॥ ९ ॥

कीदृग् नामिपरा विसर्गविहति[1]र्विद्वन् !? हरेः किं केरे[2] ?, को धातुर्वद रेषणे[3] ! मृगयुगं[4] ब्रूतेऽथ का निष्फलम्[5] ।
वाच्या चेष्टनमंबुभूश्च[6] गदितः कीदृक् क्व चोच्चस्थिते?,न श्रेयः[7] कमुपैति[8] सर्वविधिभिर्जातो विसर्गः कुतः ?
सप्तविंशत्तमः ख्यातो, वर्गो[10](र्णो) वर्ग(र्ण)विशारदैः । दुर्भेदोऽयं स्वभावेन, प्रश्नः स्मृत्वा वदोत्तरम् ॥११॥

अव०—"ररा[1] ऽरि[2] री[3] रुरू[5] रे[6] रैरो[7] ऽरौ[8] रं रः[10]:" । रं रेफं रातीति ररा । अरि अरा विद्यन्ते यत्र तत् अरि चक्रं । री रेषणे रीधातुः, रुरुश्च रुरुश्च हे रुरू, सरूपाणामेकशेषः । रेरा इत्ययं शब्दो निष्फलं चेष्टनं वक्ति । इरा जलं तत्र भवः ऐरः । अरौ शत्रौ । र् पञ्चमी ङसि रः सकाशादुत्पन्नो विसर्गो रं प्राप्नोति ॥ १० ॥ सप्तविंशो वर्गः ( र्णः ) रेफः ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कीदृक्कामिकुलं लवग्रहवतीं ब्रूते ? तथा कीदृशो, व्यापारः सुदृशां मनोभवकरैः ? पुंसु क्व कृष्णो गुणः ? ।
कं को वर्णमवाप्य कोविद ! भवेत्क्रीडार्थधातुर्वदेत्, कोऽष्टाविंशतया प्रसिद्धिमगमद्वर्गः(र्णः)ककालेखके ?

अव०—"ललालिलीलु लूले लै लो ऽलौ लंलः"। ललालिलीलु लल ईप्सायां लल् ललन्तीति अच् लला ललन्त्यो या आलयः सख्यस्तासां लीलामवति यत्कुलं तत्। लूले लुवं लातीति लूला तस्याः संबोधने हे लूले। लीलायां भवो लैलः। अलौ भ्रमरे। ( लं वर्णमवाप्य ) लस श्लेषणक्रीडनयोः लस् लसतीति क्विप् प्रथमा सि, व्यञ्जनाच्च सिलोपः, हे लः। अष्टाविंशो वर्गो ( र्णो ) लः ॥ १२ ॥

वायुः किं विदधे स्वतत्त्वपरमः ? कामांडजौ पृच्छकौ, ब्रह्मोपेन्द्रपमाह कंबुसयोरंसौ तथान्त्येतरौ ।
रक्षां पक्षित इच्छतो वद रवः कः?प्राहुराः क्व स्तवः,?केषां क्वाग्निरथाविका च जननी यस्येह वाच्यःस किम्?
अन्तस्थास्वन्त्यवर्ग(र्ण)श्च, कः प्रसिद्धो महीतले । प्रज्ञालोचनमुन्मील्य, निभालय निभालय ॥ १४ ॥

* कम्बुबुसयोरिति पाठः शुद्धः प्रतीयते, व्याख्या त्वेवं—कंबुबुसशब्दयोरन्त्येतरौ अंशौ भागौ कौ कंबुशब्दस्यान्त्यः बुसशब्दस्य च इतरः—आद्यः भागः कः इति प्रश्नः अत्रोत्तरं त्वेवं बू इति बुश्च बुश्चेत्युभयोरन्त्येतरावंशौ बवयोरैक्याद्बत्वं यद्वा कंबु—बुसयोरिति वोपान्ताद्यौ पठ्यौ, शब्दमात्रस्यात्र प्रयोजनविषयत्वात् ।

* आः इति सान्तः अव्ययः आक्रोशप्राकाश्यसंबोधनादिषु वर्त्तते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—"ववौ विवी वुवू वेऽवै वोऽवौ वंवः" । ववौ वाति स्म । इश्च विश्च इः कामः विः पक्षी हे इवी ! उर्ब्रह्मा उरुपेन्द्रः उश्च उश्च सरूपाणामेकशेषः ऊ, अवतीति क्विप् मव्यवीति व्स्थाने ऊ, ऊकारस्य वत्वे वू, स्वरो ह्रस्वो, ह्रस्वत्वं, हे वु । वुश्च वुश्च वू । हे वे पक्षिन् त्वं मां अव । ए विष्णौ । वो युष्माकं । अवौ ऊरणकें, तद्वाहनत्वादग्नेः । अवतीति ऊः, ऊ रक्षिका अंबा यस्य ऊकारस्य वत्वे वंवः ॥ १३ ॥ अन्तस्थासु अन्त्यवर्गो ( र्णो ) वः ॥ १४ ॥

कीदृक्षं मृगयोः कुलं वद सुधीः ? शीले शुभे चाक्षरं,
शूचाशेखरयोस्तथा शशिनि यत्पूर्वं समाहारवत् ।
ब्रूते शंभुरुचिर्जनःकिमुदितो ? विष्णुश्च बध्नन् बलिं,
कोऽस्मिंस्त्रिंशतया जने निगदितो वर्गः(र्णः)ककालेखके ?॥ १५ ॥

अव०—"शशांशिशी शुशूशेशैशो शौशंशः" । मृगयोर्लुब्धकस्य कुलं शशान् अश्नातीति एवंशीलं शशाशि । शीलशुभशूचाशेखरशशिनः एषां पदानां यत् यत् पूर्वमक्षरं तस्य समाहारे शीशुशूशेश संबोधनं । ईशो देवताऽस्य ऐशः । अं विष्णुं शो तनूकरणे श्यति इति आतोऽनुपसर्गाड्ड डः ( ५–१–७६ आतो डोऽह्वावामः ) आलोपः, अशं अवतीति क्त्रिप् , मव्यवीति व्स्थाने ऊ, उपधया सह अवर्णादूटो० औ अशावः, शं सुखं शस् हिंसायां क्विप् , प्रथमा सि, व्यञ्जनाच्च सिलोपः, अशौशंशः विष्णुः । त्रिंशो वर्गः (र्णः) शः ॥१५॥ इति द्वादशवर्गस्यावचूरिः ॥ इति प्रश्नावलिः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# ॥ अथ स्तवः ॥

( गयरायं )

गयरायं गयरायं गयरायं दुक्खरुक्खउक्खणणे । विरयमयं विरयमयं विरयमयं जिणवरं वंदे ॥ १ ॥

अव०—गतरागं वीतरागं । गदा रोगास्तेषां रा दीप्तिः स्फूर्तिरितियावत् तां द्यति खंडयति गदरादस्तं । अथवा अय वयेति दंडकधातो रयधातुर्गत्यर्थः । ततो रयनं ( णं ) रायो गमनं, गदानां रायो विगमो यस्मात् स तथा तं । गजराजं गजेन्द्रं । क्व ? दुःखवृक्षोत्खनने । तथा विरतमदं निवृत्तजात्यादिमदं । विरजोमतं विरजस्कं मतं शासनं यस्य स तथा तं । विगतं रतं संभोगो यस्य स विरतस्तं । अजं जन्मरहितं जिनवरं वन्दे ॥ १ ॥

सुहरयणं सुहरयणं सुहरयणं नाह तुह कहं कइया । वयणमहं वयणमहं वयणमहं सच्चविस्सामि ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—तव वदनं कथं कदा अहं द्रक्ष्यामि ? । दृशेः सच्चवि आदेशः । कीदृशं ? शुभरदनं प्रशस्तदन्तं । सुखं रचयति करोतीति कर्तर्यनटि सुखरचनं । सुधाऽमृतं तस्य ( तस्या ) रयः प्रवाहः सुधारयः तद्वद्‌णः शब्दो यत्र वदने तत्तथा, अमृतपूरमधुरस्वरमित्यर्थः । अथवा शोभना भा दीप्तिर्येषां ते शुभा रदना दन्ता यत्र । तथा शुभरत्नं कल्याणहेतुरत्नभूतं वदनमिति व्याख्येयं । वचनं प्रकरणात्त्वदाज्ञां महन्ति पूजयन्ति वचनमहाः त्वद्भक्तास्तेषामंबकानि नेत्राणि तेषां ण इति प्रकटो मह उत्सव इव तत् । 'णकारः प्रकटे बन्धे' इति वचनात् ण इति प्रकटवाची व्याख्यातः ॥ २ ॥

भद्दवयं भद्दवयं भद्दवयं सुकयवल्लिपल्लवणे । जयसरणं जयसरणं जयसरणं (सरह) जिणवसहं ॥ ३ ॥

अव०—भद्रव्रतं । भद्रो वृषभस्तद्वत् व्रजति गच्छतीति भद्रव्रजस्तं । भाद्रपदं सुकृतवल्लीपल्लवने इति स्पष्टं । जगतः प्राणिवर्गस्य शरणं त्राणं । जयस्य भावारिजेतृत्वस्य शरणं गृहं । यजन्ति यजाः पूजयितारस्तैः कर्तृभिः स्मरणं यस्य कर्मतापन्नस्य स तथा तं । जिनवृषभं जिनेन्द्रं ॥ ३ ॥

सुमणेहिं सुमणेहिं सुमणेहिं पूइओ सि जिणनाह !। पुन्नेहिं पुन्नेहिं पुन्नेहिं पूरियंगेहिं ॥ ४ ॥

अव०—सुमनोभिः शोभनचित्तैः । सुमनोभिर्देवैः कर्तृभिः । सुमनोभिः पुष्पैः करणभूतैः पूजितोऽसि त्वं नाथ ! । कीदृशैर्देवैः ? पूरितांगैः ? । कैः कृत्वा ? पुण्यैः पवित्रैः । पूर्णैरखंडैः । पुण्यैः भाग्यैः ॥ ४ ॥ ॥ ५९ ॥

१ स्मरथ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपमायं अपमायं अपमायं तुह मणं व जिण !चरणं । सत्ताणं सत्ताणं सत्ताणं भवभए हवइ ॥५॥

अव०—हे जिन ! तव त्वदुपदिष्टं चरणं चारित्रं । सत्त्वानां भवभये सति । सच्छोभनं त्राणं भवति । कथंभूतानां सत्त्वानां ? स्वार्त्तानां सुष्ठु अतिशयेन आर्त्ताः पीडितास्तेषां । कीदृशं चरणं ? अप्रमादं प्रमादरहितं । अपमायं । बाहुलकान्नपस्य वः । अप्रमां तत्त्वपरिच्छेदाभावं द्यति अप्रमादं । अप्रमः प्रमाणरहित आयो लाभो यस्मात्तत्तथा । किमिव ? मन इव त्वच्चेत इव ॥ ५ ॥

अणवरयं अणवरयं अणवरयं तं नमंति जे नाह !। कल्लाणं कल्लाणं कल्लाणं ताण साहीणं ॥ ६ ॥

अव०—अनवरतमश्रान्तं त्वां ये नमन्ति । हे नाथ ! । कीदृशं ? न नवे स्तवे रतोऽनवरतस्तं, सर्वैः स्तुत्यत्वादस्तोतारं । 'अण' इत्ययं निषेधे, 'अणणा न इत्यर्थे' इतिवचनात्, न वरदं ब्रह्महरिहरादिवत् न वरदातारं, त्वद्भक्त्या स्वत एव तेषां मनीषितप्राप्तेः, चिन्तामण्यादिवत्, तेषां कल्याणं श्रेयः । कल्याणं स्वर्णं च । स्वाधीनं हस्तवर्ति भवतीति गम्यते । तेषां कीदृशां सतां ? कल्यानां नीरोगाणां प्रवीणानां वा ॥ ६ ॥

ओसरणं ओसरणं ओसरणं तुह जिणिंद !दुरियाणं । रायनयं रायनयं रायनयं कस्स न हु इट्ठं ॥७॥

अव०—ओसरणं समवसरणं । तव जिनेन्द्र ! अपसरणं दुरितानां अपसरत्यस्मादित्यपसरणं तत् । कस्य न शरणं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इष्टं ? अपितु सर्वस्यापि । राजनतं राजभिः सुरनरेन्द्रैर्नमस्कृतं । रातो दत्तो नयो न्यायः सदाचारो येन, अर्थाद्भव्येभ्यः । राजन्नगं 'अन्त्यव्यञ्जनस्य' इति तलोपः त (य) था सभिक्खू सद्भिक्षुः । राजन् शोभमानो नगो वृक्षोऽशोकाख्यो यत्र तत् राजन्नगं ॥ ७ ॥

एवं [1]जमयपएहिं, संथुय [2]चुयकम्मलेव जिणदेव ! । [3]सिवसिरितिलय [4]पसीयसु, अजमभयं मह पयं देसु ॥८॥

अव०—न विद्यते यमभयं यत्र तत्, अजरामरपदमित्यर्थः ॥ ८ ॥

---

१ यमकपदैः । २ च्युतकर्मलेपः । ३ हे शिवश्रीतिलकः । ४ प्रसीद ।

॥ इति स्तवः ॥





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

। श्रीपार्श्वचन्द्रकविकृतम् ।

# । महावीरस्तवनम् ।

( श्रीभावप्रभसूरिकृतया टीकया संवलितम् )

स्तुत्यं सारस्वतं [1]बीजं, [2]बीजं सज्ज्ञानसंपदाम् । नयाम्यहं स्तुतेर्मार्गं, मनोमन्दिरदीपकम् ॥ १ ॥
कविना पार्श्वचन्द्रेण, वीरस्तोत्रमकारि यत् । सारस्वतस्य संज्ञाधि–कारसूत्रपदाङ्कितम् ॥ २ ॥
श्रीपूर्णिमागणाधीशः, श्रीभावप्रभसूरिराट् । कुर्वे तस्याधुना टीका–मर्थार्थिशिशुयाञ्चया ॥ ३ ॥

तत्राद्यपद्ये कविर्महावीरजिनमभिष्टौति—

कल्याणमालामणिसन्निधानं, श्रीगौतमाद्यैर्मुनिभिः प्रधानम् ।
यशोगुणैः संप्रति वर्धमानं, स्तवीमि भक्त्या जिनवर्धमानम् ॥ १ ॥

प्र० ११

१ बीजं मूलमंत्रम्. २ पंडितानां ज्ञानर्द्धीनां बीजं कारणम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या०— अर्हं पार्श्वचन्द्रनामा कविः । भक्त्या–परमसेवया कृत्वा जिनवर्धमानं स्तवीमि–स्तुतिगोचरीकरोमि इत्यन्वयः । किंविशिष्टं जिनवर्धमानं ? कल्याणेति, कल्याणानां मङ्गलानां माला श्रेणिस्तस्या मणयो रत्नानि तेषां सन्निधानं–शुभनिधिं कोशं। एतद्विशेषणेन प्रभोर्मङ्गलमयत्वं प्रोक्तं। पुनः किंविशिष्टं जिनवर्धमानम् ? श्रीगौतमाद्यैः मुनिभिः प्रधानमग्रेसरं । पुनः किंविशिष्टं ? यशोगुणैः कीर्त्या औदार्यादिभिर्गुणैः ( च ) । संप्रत्यद्यापि वर्धमानमेधमानं । एतद्विशेषणद्वयेन शालिक्षेत्रशालिवृत्तिशुभभङ्गत्वं प्रोक्तं (?)॥ १ ॥

अथ द्वितीयपद्ये वीरशासनवर्तिजनलक्षणं दर्शयन्नाह—

अइउऋऌसमानाः सन्ति लोका इदानी–मघनसरलभूता वक्रभावप्रभूताः ।
कथमिह हि लभन्ते प्राभवं शुद्धमार्गं, प्रचुरतरविशस्ते तेन तुच्छा नु चित्रम् ॥ २ ॥

व्याख्या—इदानीं–संप्रतिकाले लोका–जना अइउऋऌसमाना–अकारादिभिः पञ्चभिः स्वरैः सदृशाः सन्तीत्यन्वयः । एतत्सादृश्यं विशेषणद्वारा स्पष्टयति—किंलक्षणा लोकाः ? अघनेति, न घना अघनाः, स्तोकाः, सरलभूता ऋजुप्रायाः, येषु ते । अथवा सरला ऋजवः भूता जीवा येषु ते । अकारादिस्वरपञ्चकपक्षे अघनः स्तोक एक एवाकारः सरलप्रायो येषु ते । पुनः किंलक्षणा लोकाः ? वक्रेति, वक्रभावा अनृजुस्वभावाः प्रभूता बहवो येषु ते । अकारादिस्वरपञ्चकपक्षे ॥ ६१ ॥
एकेनाकारेण वार्जिताः सर्वेऽपि इकारादिचतुःस्वरा वक्रभावा बहवो येषु ते इति स्थितं । हि इति निश्चितं । इह कलि-

१ अथवा छन्दःशास्त्रे लघवः सर्वेऽपि सरलाः. २ ऋजव ऋजुसदृशाः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काले तेन वक्रादिभावेन हेतुना । तुच्छा अगभीराशयाः । एवंविधास्ते प्रसिद्धाः । प्रचुरतरविंशः बहुतराः । प्राभवं शुद्धमार्गं कथं लभन्ते ? अपि तु न प्रापुः । प्रभोर्जिनस्यायं शुद्धमार्गः प्राभवः तं जैनं शुद्धमार्गमिति । नु इति वितर्के । अत्र किं चित्रं आश्चर्यं ? न किमपीत्यर्थः ॥ २ ॥

अथ सर्वेषां तीर्थकराणां वर्णकद्वारेण श्रद्धानतया स्तुतिमाह—

लक्ष्मवर्णादयोऽनेके, वार्द्धिपक्षमितार्हताम् । ह्रस्वदीर्घप्लुतभेदाः, सवर्णा इति मे मतिः॥ ३ ॥

व्याख्या—हे वीरजिन ! मे मम मतिर्ज्ञानं इति एवंप्रकारा वर्त्तते, त्वदुक्तं सर्वमेतत् ईदृशं श्रद्दधामीत्यर्थः । इतीति किं ? यत् वार्द्धिपेति० वार्द्धीनां समुद्राणां पक्षः साहश्यधर्मस्तेन मितास्तुलिता अर्हन्तः गुणवर्णनादीनामपारत्वात् तेषामर्हतां जिनानां अनेके बहवः लक्ष्मवर्णादयः पदार्थाः सन्ति इत्यन्वयः । कोऽर्थः ? लक्ष्माणि चिह्नानि यथा वृषो गजोऽश्वः प्लवग इत्यादीनि ऋषभादिजिनानां क्रमेण ज्ञातव्यानि । लक्ष्मीवर्णा इति पाठे लक्ष्मीः संपत् यथा वीरस्य चतुर्दशसहस्रमितमुनीनां संपत् प्रोक्तेति । वर्णाः कायकान्तयः रक्तौ च पद्मप्रभवासुपूज्यौ इत्यादि । आदिशब्दोऽत्र प्रकारार्थः, तेन जिनानां शरीराणि आयूंषि इत्यादयः पदार्था गृह्यन्ते । कथंभूता लक्ष्मवर्णादयः ? ह्रस्वेति, ह्रस्वेन लघुना, दीर्घेण गुरुणा, प्लुतेन गुरुतरेण, भेदाः भिन्नाः । अथवा ह्रस्वादयो भेदा येषु ते । कोऽर्थः ? प्रथमं लक्ष्मापेक्षया नेमिचिह्नं शंखो ह्रस्वः, हस्ती प्रौढः, वृषभो मध्यम इत्यादि लोकरूढितः । अथ वर्णेन द्वौ जिनौ श्वेतौ, द्वौ पीतौ च

१ मनुष्यो मानुषो ना विट् इति हैमः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्रस्वशब्देन संगृहीतौ । अन्यरक्तादिवर्णेन यो वर्णः श्वेतादिः आच्छाद्यते स वर्णः ह्रस्व इति तात्पर्यं, इति ह्रस्वाः । दीर्घौ रक्तौ । प्लुतौ नीलौ कालौ च एकपदाश्रितौ तरतमयोगेन विवक्षितौ, रक्तौ च । अथ शरीरेण वीरस्य सप्तहस्ततनुरिति ह्रस्वो लघुः । द्वाविंशति तीर्थकराणां तरतमयोगेन शरीरोच्छ्रयो दीर्घः गुरुः इति । ऋषभजिनस्य पञ्चशतधनुःशरीरसमुच्छ्रयः प्लुतो गुरुतरो बृहत्तरकाय इत्यर्थः । एवं जिनानामायुःपदे ह्रस्वदीर्घदीर्घतरस्थितयो ज्ञेयाः । पुनः कथंभूता लक्ष्मवर्णादयः ? सवर्णाः वर्णैः कण्ठादिस्थानोद्भवैः द्रव्यश्रुतलक्षणैः सह वर्तन्ते सवर्णाः तीर्थकरैरुच्चार्यमाणा देशना तात्कालीनं द्रव्यश्रुतं । एतेन शिरोरन्ध्रोत्थध्वनिमानिनो दिगम्बरस्य मतं निरस्तं । अथवा सवर्णाः समानाः द्वौ जिनौ रक्तकान्त्या सदृशौ, द्वौ शुक्लकान्त्या, द्वौ कृष्णकान्त्या, द्वौ नीलकान्त्या, षोडशजिनाः सुवर्णकान्त्या सदृशाः । अथवा सवर्णाः तीर्थकरत्वेन सर्वेऽपि सदृशा इति ॥ ३ ॥

अथ स्ववक्तृत्वमिषेण वीरशासनं स्तौति—

**प्राप्तासन्धि बुधा एऐ–ओऔसंध्यक्षराणि च । व्याकुर्वन्ति यथा भावं, तथाऽहं वीर ! दर्शनात् ॥ ४ ॥**

व्याख्या०—यथा बुधाः-शाब्दिकजना एऐओऔ इति चत्वार्यक्षराणि संध्यक्षराणि संध्यक्षरसंज्ञकानि व्याकुर्वन्ति-कथयन्ति । चकारग्रहणादत्र पूर्वकाव्योक्तानपि अइउऋऌ इति पञ्च वर्णान् समानसंज्ञकान् व्याकुर्वन्ति । कथं ? प्राप्तासंधि प्राप्तः असंधिः यस्यां क्रियायां तत् इति क्रियाविशेषणं प्रसिद्धमिति । हे वीर ! तथाऽहं दर्शनात् तव सम्यक्त्वात् शासनाद्वा भावं षड्द्रव्यात्मकं व्याकुर्वे कथयामि । कथं ? प्राप्तः असन्धिः यत्रेति क्रियाविशेषणं । कोऽर्थः ? यद्यपि धर्मास्तिका-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यादिपदार्थाः संमिलिताः सन्ति, परं सूक्ष्मदृष्ट्याऽसंमिलिता एव ते सन्ति(न्तो) लक्षणेन ज्ञायन्ते 'चलणसहावो धम्मो' इत्यादिवचनात् । अथवा 'कस्यापि नाहं, ममापि केऽपि न सन्ति' इति भावं स्वाभिप्रायं कथयामि इत्यादि ॥ ४ ॥

अथ निर्मलमत्याऽऽराधकत्वं दर्शयति—

जैना अजैना उभये स्वरायं, संगृह्य मह्यां च विराधकाः स्युः ।
आराधका वा जिनपर्युपास्ते-स्तदन्तरं शुद्धधिया कृतायाः ॥ ५ ॥

व्याख्या—हे वीर ! जिनो देवो येषा ते जैनाः तद्विपरीताः शैवादयः । एते उभये च मह्यां पृथिव्यां विराधकाः त्वद्धर्मदूषकाः । वाऽथवा आराधकाः त्वद्धर्मोपासकाः स्युः । किं कृत्वा ? स्वरायं संगृह्य स्वराः शब्दास्तेषामायो लाभस्तं गृहीत्वा शब्दज्ञानं ज्ञात्वा इत्यर्थः । तेषां मध्ये ये पठितमूर्खास्ते विराधकाः, ये च पण्डितपण्डितास्ते आराधकाः "शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति" इति वचनात् । अथवा स्वरायमितिपदस्य द्वितीयमर्थमाह—स्वं निर्ग्रन्थरायं द्रव्यं संगृह्य तपोयोगशमादिकं धर्मिजनानां द्रव्यं तत् गृहीत्वा । यदुक्तं हैमकोषे—"निर्ग्रन्थो भिक्षुरस्य स्वं, तपोयोगशमादयः" इति । अत्र किं भिन्नत्वं? तत आह—हे वीर ! जिनपर्युपास्तेः त्वादृशजिनानां सेवाया द्रव्यभावभेदपूजायाः सकाशात् । कथंभूतायाः जिनपर्युपास्तेः ? कृताया निर्मापितायाः । कया ? शुद्धधिया—निर्मलबुद्ध्या तस्याः सकाशात् तदन्तरं तेषां भिन्नत्वं वर्तते इति । अत्र लुम्पकादिमतमपि निरस्तमिति ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अथाशीर्द्वारेण वीरप्रसादं स्तौति—

यावन्तः सन्ति विख्याता, अवर्जा नामिनः प्रभो !। तावन्तः शत्रवो दूरं, भूयासुस्त्वत्प्रसादतः ॥६॥

व्याख्या—हे प्रभो ! हे वीर ! विख्याताः-प्रसिद्धायावन्तो-यावत्संख्याकाः। अवर्जा-अकाररहिता एवंविधा नामिनो -नामिसंज्ञकाः स्वराः सन्ति सारस्वतमते इउऋऌएऐओऔ इत्यष्टौ नामिनः सन्तीति। तावन्तस्तावत्संख्याकाः शत्रवो ज्ञानावरणीयादिकर्मरूपा अष्टौ त्वत्प्रसादतो दूरं भूयासुरिति स्पष्टम् ॥ ६ ॥

अथ तपोद्वारेण ऋषभमहावीरौ स्तौति—

आद्यन्ताभ्यामर्हतां सुप्रसिद्धौ, यौ चक्राते वार्षिकं सामिवर्षम् ।
विश्वाधीशौ वन्दनीयौ जनानां, नित्यं वन्दे तावहं भक्तियुक्तः ॥ ७ ॥

व्याख्या—अर्हतां–जिनानां आद्यन्ताभ्यां कृत्वा । सुप्रसिद्धौ–विख्यातौ आदिनाथमहावीरौ । वार्षिकं–वर्षपर्यन्तं तपः सामिवर्षं–षाण्मासिकं तपश्चक्राते इत्यन्वयः। सामीति खण्डार्थमव्ययं। ऋषभस्य वार्षिकं वीरस्य षाण्मासिकमिति। ॥ ६३ ॥ भक्तियुक्तोऽहं तौ जिनौ नित्यं वन्दे इत्यन्वयः। कथंभूतौ तौ ? विश्वाधीशौ–त्रिजगत्स्वामिनौ । पुनः कथंभूतौ एतौ ? जनानां वन्दनीयौ इति स्पष्टम् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ वीरवाचा वर्णयति—

भूयांसीहानेहसां व्यञ्जनानि, भुक्त्वा भुक्त्वा भूयसा नैव तृप्तिम् ।
याता जीवास्तत्प्रभो तावकीनां, श्रुत्वा वाचं वीतरागा बभूवुः ॥ ८ ॥

व्याख्या—इह-संसारे जीवाः-प्राणिनः भूयसाऽनेहसा-बहुना कालेन व्यञ्जनानि भुक्त्वा तृप्तिं-संतुष्टिं नैव याताः-नैव प्राप्ताः इत्यन्वयः । व्यञ्जनानीति कोऽर्थः? अन्नपूर्वकं व्यञ्जनं भवति । अतोऽन्नानि शाल्यादीनि व्यञ्जनानि शाकानि भुक्त्वा ( त्त्वेत्या ) द्यं योज्यं । अथ द्वितीयोऽर्थः—वि इति विशिष्टानि अञ्जनानि कज्जलानि नेत्रेषु येषां तानि व्यञ्जनानि कलत्राणि । विशेषणशक्त्या विशेष्यः प्रतीयते । तानि भुक्त्वा इत्यादि पूर्ववत् । अथ तृतीयोऽर्थः—वि इति विविधानि च तानि अञ्जनानि च पुण्यापुण्यकर्माणि भुक्त्वा इत्यादि पूर्ववत् । हे प्रभो ! तत्तस्मात् कारणात् ते प्राणिनस्तावकीनां तवेयं तावकीना तां तव वाचं श्रुत्वा वीतरागाः–सहजसंतुष्टा बभूवुः ॥ ८ ॥

अथ वीतरागस्वरूपस्य दौर्लभ्यमाह—

स्वामिन्मे सर्वपापानां, कार्यायेतसंज्ञया समम् । ज्ञायते यदि सामर्थ्यं, त्वत्स्वरूपं लभेत्तदा ॥ ९ ॥

१ परस्मैपदं चिन्त्यम् ( आत्मनेपदमनित्यमिति न्यायात् )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—हे वीर ! हे स्वामिन् । मे-मम सर्वपापानां सामर्थ्यं कर्तृपदं । कार्याय कार्यं कृत्वा इत्संज्ञया समं-तुल्यं यदि जायते-संपद्यते । एति कार्यं कृत्वा गच्छतीति इत् तस्य संज्ञा तया समं । कार्यादनन्तरं पापानां सामर्थ्यं विलयं याति, अनुबन्धरहितं स्वरूपाहिंसात्वादित्यर्थः । अथवाऽत्र प्रतिलोमार्थोऽपि, यतः, सर्वपापानां कार्याय मे मम सामर्थ्यं यदि इत्संज्ञया समं जायते, कार्यं कृत्वा सामर्थ्यं नष्टं, परिणामशीलत्वेन बन्धाभावादित्यर्थः । तदा मल्लक्षणो जनः त्वत्स्वरूपं लभेदिति । ( अत्र श्लोके ) 'स्वामिन्मे' इत्यत्र संबोधनपदाग्रे आदेशश्चिन्त्यः ॥ ९ ॥

अथ जिनस्य लोकोत्तरवैद्यत्वं दर्शयति—

आमाः शृण्वन्तु मोहाद्या, अरेदोन्नामिनो गुणः। यथाऽऽयुर्वेदिनो जन्तो—स्तथा वीरो मयेक्षितः ॥१०॥

व्याख्या—अरे मोहाद्या आमा रोगाः ! भवन्तः शृण्वन्तु । यथा आयुर्वेदिनो वैद्यात् जन्तोर्जीवस्य गुणो नीरोगलक्षणो गुणो भवति । कथंभूतस्य जीवस्य ? अरेदो इति अरे इति पीडया शब्दं ददाति भाषितः सन् प्रत्युत्तरं जल्पति इति अरेदो रोगयुक्तः, उत् ऊर्ध्वं नमतीत्येवंशील उन्नामी प्रबलपीडया उच्छलच्छरीरः । अरेदश्चासौ उन्नामी च अरेदोन्नामी इति कर्मधारयः, तस्यारेदोन्नामिनः रोगाभिभूतस्येत्यर्थः श्लेषार्थत्वात् जन्तोः, कस्य इव ? नामिन इव, यथा नामिनः स्थानका वर्णा अर एत् ओत् इति गुणसंज्ञका भवन्ति । आमशब्दस्यापि अरेदोन्नामिन इति विशेषणं । यथा किंभूता आमाः ? अरे इति पीडया शब्दं रोगिणां ददति कथापयन्ति तेऽरेदाः, उन्नामयन्ति ऊर्ध्वमुच्छालयन्ति रोगिण



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति उन्नामिनः, अरेदाश्च ( ते ) उन्नामिनश्चेति कर्मधारयः । अथवा आयुर्वेदिनोऽपि अरेदोन्नामिन इति विशेषणं । यथा अरे इति पीडाशब्दं द्यति खण्डयतीति अरेदः, उत्प्राबल्येन नामयति नाशयति रोगानित्युन्नामी ( ततः पूर्ववत् कर्मधारयः ) तस्मात् अरेदोन्नामिन इति सिद्धं । तथा मया भवान् वीर ईक्षितो दृष्टः अगदङ्कारतुल्य इत्यर्थः । मम मोहाद्याः कर्मरोगा नाशं गमिष्यन्तीति परिमलः ॥ १० ॥

अथाशीर्वादद्वारेणोपसंहारमाह—

एवं कल्याणनिर्वाण–कल्याणिकतपोऽहनि । संस्तुतः पार्श्वचन्द्रेण, श्रीवीरो दिशतु श्रियम् ॥ ११ ॥

व्याख्या——श्रीवीरः श्रियं दिशतु । किंभूतो वीरः । श्रीपार्श्वचन्द्रेण संस्तुतः । एवममुना प्रकारेणेति ? कस्मिन् कल्याणेत्यादि——कल्याणं मङ्गलमयं यत् निर्वाणकल्याणिकंतपोऽहः तस्मिन् दीपालिकादिने इत्यर्थः ॥ ११ ॥

॥ इति श्रीपूर्णिमागच्छीयभट्टारकश्रीभावप्रभसूरिविरचिता श्रीमहावीरस्तोत्रटीका ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ

# । अथ महावीरस्तवः ।

( गयकलहं )

गयकलहं गयकलहं गयकलहं कुनयभंजणे वीरं। न वसुरयं नवसु रयं नवसुरयंतरणमभिवंदे ॥ १॥

अवचूरिः—नष्टयुध्धं । गतेन गमनेन कलभं हस्तिपोतकं । कुनया ( गा ) एव कौ पृथिव्यां नगा वृक्षास्तेषां भञ्जने गजकलभं। न द्रव्यरतं। ब्रह्मचर्यगुप्तिषु रतं। नूतनसुरतस्य अन्तरणं आच्छादनं स्तुवे ॥ १ ॥

दिअरायं दिअरायं दिअरायं वालमउलणे पहु तं। नित्तासं नित्तासं नित्तासंबुअसुभगमीले ॥ २ ॥

अव०—खण्डितरागं। द्विजैर्दन्तै राजते। विराजं (पक्षिराजं)। बाला एव व्यालास्तेषां मउलणं छेदस्तत्र प्रभुः समर्थः। प्राकृतत्वादनुस्वारलोपः। तं कोऽर्थः ? त्वां। निस्त्रासं गतभयं ( नित्यासं )। नेत्रास्यांबुजसुभगं। स्तुवे ॥ २ ॥

अणवरयं अणवरयं अणवरयं पिहुजणं विवाहेइ। अमयहरं अमयहरं अमयहरं नाह! तुह वयणं॥३॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—निरन्तरं । न विद्यते नवं रजः पापं यत्र । अस्तवेन रतं, कोऽर्थः ? कस्यापि प्रशंसां न करोति । अमृतगृहं सुखदत्वान्मोक्षगृहं । कुमतहरं ॥ ३ ॥

अच्चाए अच्चाए अच्चाएणं तुमं उवासीणो ( पवट्टंतो ) ।
कल्लाणी कल्लाणी कल्लाणोओ हवइ निवई ॥ ४ ॥

अव०—कस्यां पूजा ? अर्चायां प्रतिमायां । कस्य प्रतिमा ? तव । कस्या अत्याग ? अर्चायाः पूजायाः । केन ? अत्यागेन प्रवर्तमानः सेवमान इत्यर्थः । मङ्गलवान् । स्वर्णवान् । कल्पानीकः प्रधानकटकः । एवंविधो भवति नृपतिः॥४॥

सप्पणयं सप्पणयं सप्पणयंगीकयन्नगिहवासा । सक्कइणो सक्कइणो सक्कइणो तं थुणंति जई ॥ ५ ॥

अव०—सप्रणयं सादरं । सद्भिः प्रणतं । सर्पन्यायेनाङ्गीकृतोऽन्येषां गृहावासो यैः । सुकृ ( सत्कृ ) तं पुण्यं विद्यते एषां । सत्कृतं पूजा विद्यते येषां, देवानामपि पूज्यत्वात् । त्वां स्तुवन्ति मुनयः ॥ ५ ॥

सुपवयणं सुपवयणं सुपवयणं मंदधम्मिणं चइउं । निच्चरणा निच्चरणा निच्चरणा तुह भमंति भवे ॥ ६॥

अव०—शोभनं प्रवचनं सिध्धान्तं । शोभनैः प्रधानपुरुषैः गणधरादिभिः प्रकर्षेण बीज ( वृ ) द्धिलक्षणेन उच्यते । मन्दधर्मिणां । सुपवयणं सुप्रेरकमित्यर्थः, अर्थात्तदुक्तधर्मानुष्ठानकरणे इति शेषः । त्यक्त्वा । चारित्ररहिताः । नित्ययोध्धारः । निर्गतं चरणं भक्षणं येषां ते निश्चरित्रा दरिद्रा इत्यर्थः । अथवा निश्चरणा पादरहिताः "टुंटा" इत्यर्थः । तव । परिभ्रमति ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सहसऽक्खा सहसक्खा सह सक्खा संथुणंति असुरेहिं । गोविंदा गोविंदा गोविंदाखित्तचित्ताणं ॥ ७ ॥

अव०—इन्द्राः। सह हसेन विकाशेन वर्तन्ते यानि तानि सहसानि सविकाशानि अक्षीणि येषां ते तथा। साक्षात् त्वयं ( स्वयं ) संस्तुवन्ति । गोपेन्द्राश्चक्रवर्तिनः । गोपेन्द्राः शेखराजिभ्यः सकाशात् इन्दन्ति परमैश्वर्यवन्तो भवन्ति इति गोपेन्द्राः । गोवृन्दैः ॥ ७ ॥

ओसरणं ओ सरणं ओसरणं अस्सिरीइ तुह सहइ । रयणमओ रयणमओ रयणमओ जत्थ पायारो ॥

अव०—ओसरणं समवसरणं । ओ संबोधने । शरणं त्राणं। अपसरणं व्यावर्तनं। अलक्ष्म्याः। तव शोभते। रत्नमयः। रजोनमकः रजोनिर्वर्तकः । रचनेन मतोऽभीष्टः । यत्र समवसरणे प्राकारो वर्तते ॥ ८ ॥

सिरिसयणे सिरिसयणे सिरिसयणे तुह हरी किरइ जम्मे। समहुवयं समहुवयं समहुवयं सं कुसुमपयरं॥९॥

अव०—श्रिया उपलक्षिते शयने गृहे । श्रिया युक्ताः स्वजना ज्ञातयो यत्र । श्रिया युक्त बहुमूल्यं शयनं शय्या यत्र । तव जन्मनि । किरति इन्द्रः । सह मधुव्रजेन भ्रमरसमूहेन वर्तते । सह मधुव्रजेन मकरन्दव्रजेन ( प्रसिध्धः हरिर्नु वर्तते ) वसंतावतंसं । कुसुमसमूहं ॥ ९ ॥

परमोहं परमोहं परमोहं भवनईइ तं दिंतो । सत्ताणं सत्ताणं सत्ताणं जिणवइ करेसु ॥ १० ॥

अव०—परत्र परस्मिन् भवे मा लक्ष्मीस्तस्या ओघं समूहं ददत् । प्रकृष्टमोहं घ्नन् खंडयन् । भवनद्याः पूरं केवटनं ( लं ) ओघं घ्नन् । त्वं । सत्त्वानां प्राणिनां । शोभनं त्राणं जिनपते ! कुरु ॥ १० ॥ इति श्रीवीरस्तोत्रावचूरिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# । अथ श्रीनेमिजिनस्तवः ।

मानेनानूनमानेन, नोन्नमुन्नामिमाननम् । नेमिनामानममम, मुनीनामिनमानुमः ॥ १ ॥

टीका—आनुमः स्तुमः । के कर्तारः ? वयं । कं कर्मतापन्नं ? मुनीनां इनं मुनीन्द्रं । किमभिनामानं ? नेम्यभिधानं नेमिनामानं जिनं । पुनः किंविशिष्टं ? "उदै क्लेदने" इत्यस्य धातोः न उन्नं न क्लिन्नं नाक्रान्तमित्यर्थः । केन ? मानेन अहङ्कारेण । किंविशिष्टेन ? अनूनमानेन अतुच्छप्रमाणेन । पुनः किंभूतं ? उन्नामिमाननं उन्नामिनी उत्सर्पिणी मानना पूजा यस्य । पुनः किंभूतं ? अममं निर्ममित्यर्थः ॥ १ ॥

नानाऽमानामनिम्नाना–ममानानामनामिनाम् । नामिने नामिनामोमे(म्ने), नेमिनाम्ने नमो नमः॥२॥

टीका—नमस्कारोऽस्तु प्रकर्षेण,वीप्सायां(द्वित्वं)। कस्मै ? नेमिनाम्ने नेमिस्वामिनेऽभिधानाय(नेम्यभिधानाय स्वामिने)। नामिने न्यक्करणशीलाय । केषां ? नानाऽमानां नानाविधा अमा व्याधयस्तेषां । किंविधानां ? अनिम्नानां उत्कटानां ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनः किंविधानां ? अमानानां । पुनः किंविधानां ? अनामिनां नामयितुमशक्यानां । किंविधाय ? "अव रक्षणे" इत्यस्य धातोः ओमे(म्ने) रक्षकाय । केषां ? नामिनां प्रणतानामित्यर्थः ॥ २ ॥

**माने नोन्नामिनं नाम, न नानिम्नममानने । ननु नेमिममी मेना-मोमानामनमन्निनाः ॥ ३ ॥**

टीका—अनमन् नमस्कुर्वन्ति स्म । के कर्तारः ? अमी इनाः स्वामिनः । कं ? नेमिं । ननु इत्यादि पक्षे । कासामिनाः ? मेनामोमानां मेना मेनकाख्याप्सराः, मा लक्ष्मीः, उमा गौरी तासां, पुरन्दरश्रीपतिशङ्करा इति भावः । किंविशिष्टं नेमिं ? न उन्नामिनं न उत्सिक्तं । क्व ? माने पूजायां । नामेति प्रकाशे । पुनरपि किंविधं ? न न अनिम्नं अपि तु अनिम्नमेव अदीनमेव । क्व ? अमाननेऽपूजायामित्यर्थः ॥ ३ ॥

**मिन्नमन्मनमामानि-मानिनीमाननोन्मनाः । ना नानाऽमीमनन्नेमिं, मनोममिममानिनाम् ॥ ४ ॥**

टीका—ना पुरुषः । नानाप्रकारं । अमीमनत् मानयामास पूजयामास । कं कर्मतापन्नं ? इमं नेमिं । किंप्रकारं ? मनोमं "अम द्रम" इत्यस्य धातोः मनः कर्मतापन्नं अमति गच्छतीति हृदयवर्तिनं । केषां ? आनिनां आनाः प्राणा विद्यन्ते येषां प्राणिनां । ना किंविधः ? मिन्नेत्यादिपूर्वार्धं—मां-लक्ष्मीं मन्यन्ते मामानिन्यः, अतश्च मिन्नानां-स्निग्धानां मन्मनानां-अव्यक्तं लपन्तीनां (व्यक्तमलपन्तीनां) मानिनीनां-मनस्विनीनां माननं-अनुभवनं तत्र उन्मना- ॥ ६७ ॥
उत्कण्ठित इत्यर्थः ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनोमुन्निम्ननं नून–मुन्नमन्माननोननम् । नुन्नमेनोऽमुना नेमि–नाम्नाऽऽम्नानेन मामनु ॥ ५ ॥

टीका—"णुद प्रेरणे" इत्यस्य धातोः नुन्नं क्षिप्तं । किं तत् ? एनः पापं । केन ? अमुना नेमिनाम्ना । आम्नानेन आम्नानं अभ्यसनं पुनः पुनः उच्चारणं तेन । कथं ? अनु लक्षीकृत्य । कं ? मां । एनः किंविधं ? मनोमुन्निम्ननं मनसो मुद् हर्षः तं निम्नयति अल्पं करोति । पुनः किंविधं ? उन्नमन्माननोननं उन्नमन्ती उत्सर्पन्ती मानना पूजा तां ऊनयति लङ्घयतीत्यर्थः ॥ ५ ॥

नोनमुन्मानमानेन, मुनीनानेममाननम् । मीनानमिं नमन्नेमि-मनूनामामिमीम माम् ॥ ६ ॥

टीका—पुनः "अम द्रम" इत्यस्य धातोः आमिमीम आजगाम प्राप । कां ? मां लक्ष्मीं । किंविशिष्टां ? अनूनां परिपूर्णां किं कुर्वन् ? नमन् नमस्कुर्वन् । कं ? नेमिं । किंविधं ? न ऊनं न रहितं । केन ? उन्मानमानेन "जलदोण-मद्धभारं, समुहासिओ य जो नव उ ( अट्ठसयमुच्छिओ य माणवओ ) । माणुम्माणपमाणं, इय भणियं जिणवरिंदेहिं ॥ १ ॥" इतिवचनात् प्रमाणविशेषेण । किंविधं ? मुनीनानेममाननं मुनीनां सप्तर्षीणां इनः स्वामी चन्द्रस्तद्वत् अनेमाऽखण्डा मा लक्ष्मीर्यस्य तत् , एवंविधं आननं यस्य मुनीनानेममाननं । तथा "मीङ् हिंसायां" इत्यस्य धातोः मीनानं हिंसन्तं । । कं ? इं काममित्यर्थः ॥ ६ ॥

मुनीनमेनोमीनानां, निमाने नेमिमानिनम् । नेमिनामानमानाना–ममोमानममुं नम ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका०—अमुं नेमिनामानं मुनीनं नम त्वमिति संबोधनं । तथा एनांसि कल्मषाण्येव मीना मत्स्यास्तेषां । निमाने हनने । नेमिं चक्रधारामात्मानं मन्यते (एनोमीनानां निमाने नेमिमानिनं) । पुनः किंविधं ? "मुम बन्धने" इत्यस्य धातोः अमोमानं अबन्धकं । केषां ? आनानां दशविधप्राणानां, क्षीणकर्मत्वादित्यर्थः ॥ ७ ॥

नेमीनमननं नेमि–नमनं नेमिमाननम् । नेमिनाम्नो न नाम्नात्–माना नूनममी मम ॥ ८ ॥

टीका—नूनं निश्चितं मम अमी आनाः प्राणाः जीवितमिति तात्पर्यं । तत् किं ? नेमीनस्य नेमिस्वामिनः मननं स्मरणं नेमीनमननं । तथा नेमेर्नमनं नतिस्तत् नेमिनमनं । तथा नेमेर्माननं पूजनं नेमिमाननं । तथा द्वौ नञौ प्रकृत्य(तम)र्थं गमयत इति नेमिनाम्नः आम्नानं पुनः पुनरभ्यसनं उत्कीर्तनमित्यर्थः ॥ ८ ॥

इति स्तुतिं ये पुरतः पठन्ति, नेमेर्निजव्यञ्जनयुग्मसिद्धाम् ।
श्रीवर्धमानोदयशालिनस्ते, स्युः सिद्धिवध्वाः परिभोगयोग्याः ॥ ९ ॥

॥ इति श्रीनेमिस्तवः सटीकः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# । अथ श्रीपार्श्वजिनस्तवः ।

( सटीकः )

श्रीपार्श्वनाथं तमहं स्तवीमि, त्रैलोक्यलोकंपृणधामधाम ।
सामोदमुद्भासियदीयकीर्ति–रामामुखं चुम्बति कार्तिकेयः ( स० ) ॥ १ ॥

टीका—अहं श्रीपार्श्वनाथं स्तवीमि । कथंभूतं ? त्रैलोक्यस्य लोकः तं पृणातीति त्रैलोक्यलोकंपृणं, त्रैलोक्यलोकंपृणं यद्धाम तेजः त्रैलोक्यलोकंपृणधाम, तस्य धाम गृहं त्रैलोक्यलोकंपृणधामधाम । तं कं ? यदीयकीर्तिरामामुखं कार्तिकेयश्चुम्बति । सामोदं सहर्षं । उद्भासत इत्येवंशीला उद्भासिनी, उद्भासिनी चासौ यदीया कीर्तिश्च उद्भासियदीयकीर्तिः, सा एव रामा तस्या मुखं कार्तिकेयः स्पृशति ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तैरश्च्ययोगेन विवेकसेक–मुक्तास्ति या सापि जिनावतंस !।
विलोकिते कान्तिकलत्वदास्य–चन्द्रोदये नृत्यति चक्रवाकी ( स० )॥ २॥

टीका—चन्द्रोदये चक्रवाकी नृत्यतीति समस्या । हे जिनावतंस ! सापि चक्रवाकी नृत्यति । क्व सति ? कान्तिकलत्वदास्यचन्द्रोदये विलोकिते सति-कान्त्या कलं मनोहरं कान्तिकलं यत्त्वदास्यं कान्तिकलत्वदास्यं तदेव चन्द्रस्तस्योदयस्तस्मिन् विलोकिते सति । का सा ? या विवेकसेचनं तेन मुक्तास्ति । केन ? तैरश्च्ययोगेन तिर्यग्भावेन ॥२॥

पुरः प्रकीर्णानि कपोलपाली–तले तवास्ये प्रतिबिम्बितानि ।
निभाल्य संदेग्धि बुधो जनः किं, चन्द्रस्य मध्ये कदलीफलानि ( स० ) ॥ ३ ॥

टीका—हे देव ! इत्यध्याहारः । बुधो जन इति संदेग्धि संदेहं करोति—किं चन्द्रस्य मध्ये कदलीफलानि ?। किं कृत्वा ? निभाल्य दृष्ट्वा । कथंभूतानि ? पुरोऽग्रतः प्रकीर्णानि विस्तारितानि । तवास्ये निर्मले कपोलपालीतले गल्लस्थलप्रदेशे प्रतिबिम्बितानि संक्रान्तानि दृष्ट्वा । भगवतो मुखं चन्द्रोपमं, तत्र निभाल्य संदेग्धि इति युक्तमेव ॥ ३ ॥

यैर्निर्जितैः पञ्चशरेण चक्रे, कण्ठे कुठारः कमठे ठकारः ( स० )
अकीर्तिनाट्यस्य च वादितोऽलं, साम्यं क्व तेषां द्युसदां त्वयाऽस्तु ॥ ४ ॥



टीका—कण्ठे कुठारः कमठे ठकारः इति समस्या । हे देव ! त्वया सह द्युसदां देवानां सादृश्यं क्व कुतोऽस्तु ?।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां केषां ? यैः पञ्चशरेण निर्जितैः कदर्पेण जितैः । कण्ठे स्कन्धप्रदेशे कुठारश्चक्रे कृतः । च पुनः । अकीर्तिनाव्यस्य ठकारः ठणत्कारः कमठे कमठदैत्ये अलमत्यर्थं वादितः । कमठेन भगवत उपसर्गाः कृताः, तेन जनमध्येऽद्यापि कमठस्याकीर्ति पटहो वाद्यति । तेषां देवानां त्वया सह साम्यं कथमस्तु ? न कथञ्चिदपीत्यर्थः ॥ ४ ॥

अभव्यदौर्भव्यतयाऽङ्गभाजां, येषां त्वदास्ये सुभगेऽपि दृष्टे ।
संतापसंपत्तिरुदेति तेषा–मयं शशी वह्निकणान् प्रसूते ( स० ) ॥ ५ ॥

टीका—अयं शशी वह्निकणान् प्रसूते इति समस्या। हे देव ! येषामङ्गभाजां त्वदास्ये त्वन्मुखे सुभगेऽपि दृष्टे सति । संतापस्य संपत्तिः संतापसंपत्तिरुदेति उत्पद्यते । कया ? अभव्यदौर्भव्ययोर्भावः अभव्यदौभव्यता तया । तेषामङ्गिनां अयं शशी वह्निकणान् प्रसूते । भगवतो मुखं चन्द्रोपमं, अतो युक्तमेवेति ॥ ५ ॥

त्वद्दानलीलादलितप्रतापो, देव ! द्युकुम्भस्तव शक्तिमाप्तुम् ।
भृगोः पतन्नादमिमं तनोति, ठंठंठंठंठठंठंठठंठंठंः ( स० ) ॥ ६ ॥

टीका—ठंठंठंठंठंठठंठंठंठः इति समस्यापदं । हे देव ! द्युकुम्भः कामकुम्भः । इमं नादं तनोति विस्तारयति । कथंभूतः ? त्वद्दानस्य लीला त्वद्दानलीला तया दलितो निराकृतः प्रतापो वाञ्छापूर्तिरूपो यस्य स त्वद्दानलीलादलितप्रतापः । किं कर्तुं ? तव शक्तिं दानसामर्थ्यं । आप्तुं लब्धुं । किं कुर्वन् ? भृगोः पर्वतशृङ्गात् पतन् । इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दं ठठंठठंठं० इत्यादि करोति। अन्योऽपि यः कश्चित् केनापि जितो भवति सोऽपि पर्वते आरुह्य भैरवझम्पादिकं करोति, तस्य जयार्थं। एषोऽपि कामकुम्भो भगवत्सांवत्सरिकदानेन जितः, ततो भगवद्दानशक्तितुल्यां दानशक्तिं प्राप्तुं तपोरूपां भृगोः पतनं करोति ॥ ६ ॥

जनिमहे जनिते स्नपनोदकैः, प्रसृमरैरमरेश्वरभूधरे।
विदलितेषु नगेषु किलाभव-न्नुपरि मूलमधस्तरुपल्लवाः ( स० ) ॥ ७ ॥

टीका—उपरि मूलमधस्तरुपल्लवा इति समस्या। हे जिन! उपरि मूलमधस्तरुपल्लवा अभवन् संजाताः। केषु सत्सु? नगेषु वृक्षेषु विदलितेषु उन्मूलितेषु। कैः कृत्वा? स्नपनोदकैः स्नानोदकैः। कथंभूतैः? प्रसृमरैः प्रसरणशीलैः। किले-त्याप्ते ( त्याप्तोक्तौ ) क्व? मेरुपर्वते। कस्मिन् जनिमहे जन्ममहोत्सवे ॥ ७ ॥

रसना स्तवने नयनं वदने, श्रवणं वचने च करो महने।
तव देव! विशां कृतिनां सततं, रमते रमते रमते रमते ( स० ) ॥ ८ ॥

टीका—रमते रमते रमते रमते इति समस्या। हे देव! विशां मनुष्याणां। कृतिनां पुण्यवतां। सततं रसना जिह्वा। तव स्तवने स्तोत्रे रमते संतोषं करोति। तव वदने आनने लोचनं रमते। श्रवणं कर्णः तव वचने रमते। करो हस्तः तव महने ( पूजने ) रमते ॥ ८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वैकनायक ! कला न हि या त्वदर्हा, कार्ये न या च कविता भवतः स्तवाय ।
लग्नो न यस्त्वयि भवो विभवश्च सा किं, सा किं स किं स किमिति प्रवदन्ति धीराः (स०) ॥९॥

टीका—सा किं स किं स किमिति प्रवदन्ति धीराः इति समस्या । हे विश्वैकनायक ! विश्वस्य जगत्त्रयस्य एकोऽद्वितीयो नायको विश्वैकनायकः तस्य संबोधनं हे विश्वैकनायक ! । या कला यद्विज्ञानं । त्वदर्हा कार्ये त्वद्योग्या । न हि न भवति । सा कला किं ? न किञ्चित् । पुनः हे देव ! या कविता भवतः स्तवाय स्तोत्राय न भवति, सा कविता किं ? न किञ्चित् । पुनर्यो भवो जन्म त्वयि भगवति न लग्नः न व्यापृतः, स किं ? न किमपि । कोऽर्थः ? नृजन्म प्राप्य भवद्विषये पूजाभक्त्यादिकं न कृतं, स भवः किं ? न किञ्चिदित्यर्थः । च पुनः विभवो द्रव्यं त्वयि न लग्नः त्वत्कार्ये न समायातः स विभवः किं ? न किञ्चिदित्यर्थः । इति इत्थं पूर्वोक्तप्रकारेण धीराः प्रवदन्ति ॥ ९ ॥

अहीशेऽधस्तात्त्वामुपनमति जेतुं दितिसुतं, समादाय क्रोधान्मणिमधुपकान्तं किल धनुः ।
अधोऽधो मेनाकं चरति जगतीनाथ! समभूत्, धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः(स०)॥१०॥

टीका—हे जगतीनाथ ! धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः धनुषः कोटिरग्रं तत्र भृङ्गो भ्रमरस्तस्योपरि गिरिस्तदुपरि जलधिरिति समभूत् संजातं । क्व सति ? अहीशे धरणेन्द्रे त्वामधस्तान्नीचैरुपनमति सति प्रणमति सति । पुनः क्व सति ? मेनाकं पर्वतं अधोऽधो नीचैर्नीचैश्चरति गच्छति ( सति ) किं कर्तुं ? दितिसुतं कमठं दैत्यं जेतुं । किं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कृत्वा ? किलेति सत्ये । धनुः कोदण्डं क्रोधात् समादाय । किंभूतं ( धनुः) ? मणिमधुपकान्तं मणिना निर्मितो योऽसौ मधुपो भ्रमरस्तेन कान्तं सुन्दरं एवंविधं धनुर्गृहीत्वा जलधिमध्यवर्तिनं मेनाकं अधोऽधो गच्छति सति "धनुःकोटौ०" इत्यादि समभूत् । कोऽर्थः ? धरणेन्द्रकोदण्डाग्रे मधुपो वर्तते, एवंविधं कोदण्डं लात्वा मेनाकमधो गतः ( धरणेन्द्रः ) तदा मधुपोपरि पर्वतो जातः पर्वतोपरि ( च ) जलधिर्जातः ॥ १० ॥

जगच्चक्रिंश्चक्रे चरणपरिचर्यैकरुचिना-ऽमुना त्वद्दासेन स्वमनसि समन्तान्निगमनम् ।
त्वदन्यो देवस्त्वां तुलयति विभो! चेद्भुवि भवेत्, धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः(स०)॥११॥

टीका—अत्रान्वयेन समस्या पूरिता । "धनुःकोटौ०" इत्यादि समस्यापदं । हे जगच्चक्रिन् ! हे देव ! जगति विश्वे चक्रीव चक्री जगच्चक्री तस्य संबोधने हे जगच्चक्रिन् ? अमुना मल्लक्षणेन त्वद्दासेन त्वत्सेवकेन स्वमनसि स्वचित्ते समन्तात्सर्वप्रकारैर्निगमनं निश्चयः चक्रे । कथंभूतेन ? चरणपरिचर्यैकरुचिना तव चरणयोर्या सेवा चरणपरिचर्या तत्रैकाऽद्वितीया रुचिरभिलाषो यस्यासौ चरणपरिचर्यैकरुचिस्तेन । इति निगमनं चक्रे—त्वदन्यो त्वत्तोऽन्यो देवश्चेद्यदि त्वां तुलयति सदृशो भवति, तदा भुवि धनुःकोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः भवेत् जायेत् । कोऽर्थः । नान्यो देवो वीतरागसदृशो भवति, न च पृथिव्यामेवं भवतीति ॥ ११ ॥

प्रीतां रूपवतीं सतीं जिनपतेऽर्हल्लक्ष्मीलीलावतीं, हित्वा रूपरसोज्झितां रमयसे यन्मुक्तिसीमन्तिनीम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तन्नूनं भवतापि तीर्थपतिना चैतत्स्फुटं निर्ममे, युक्तायुक्तविचारणा यदि भवेत्स्नेहाय दत्तं जलम् (स०) १२

टीका—युक्तायुक्तविचारणा यदि भवेत् स्नेहाय दत्तं जलं इति समस्या । जिनपते ! यत्त्वं अर्हल्लक्ष्मीलीलावतीं जिनविभूतिस्त्रियं । कथंभूतां ? प्रीतां प्रीतिपरां, रूपवतीं सुरूपां सतीं विद्यमानां, हित्वा त्यक्त्वा । रूपरसोज्झितां रूपं च रसः शृङ्गारादिस्ताभ्यामुज्झिता रहिता तां सीमन्तिनीं रमयसे क्रीडयसि । तन्नूनं निश्चितं भवतापि तीर्थपतिना स्फुटं प्रकटं एतन्निर्ममे एतत् कृतं । एतत् किं ? चेद्यदि युक्तायुक्तविचारणा भवति, तदा स्नेहाय दत्तं जलं जलाञ्जलिर्दत्तः। एवंविधां निःशेषां जिनर्द्धिस्त्रियं त्यक्त्वा मुक्तिस्त्रियं रमयसे युक्तायुक्तविचारणा भवति तदैतत् निर्ममे १२

इत्थं योगीन्द्रचेतःकमलकमलभूर्मुक्तिकासारहंसः,
कल्याणाङ्कूरकन्दः शिवमहिमरमामञ्जरीवल्लरीश्रीः ।
मन्त्रद्रून्मेषबीजं भुवनजनवनोल्लासलीलावतंसः
श्रीपार्श्वः स्यात्समस्यास्तवकुसुमकृताभ्यर्चनोऽभीष्टलब्ध्यै ॥ १३ ॥

टीका—श्रीपार्श्वनाथोऽभीष्टलब्ध्यै अभीष्टलाभाय स्यात् भवेत् । किंभूतः ? इत्थममुनाप्रकारेण । समस्यास्तवकुसुमकृताभ्यर्चनः समस्यास्तव एव कुसुमं तेन कृतं अभ्यर्चनं पूजनं यस्य स तथा। पुनः किंविशिष्ट? योगीन्द्रचेतःकमलकमलभूः योगीन्द्राणां चेतांसि योगीन्द्रचेतांसि, योगीन्द्रचेतांस्येव कमलानि, तेषु कमलभूः ब्रह्मा इव ब्रह्मा । पुनः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किंविशिष्टः ? मुक्तिकासारहंसः मुक्तिरेव कासारः सरोवरं तत्र हंस इव हंसः। पुनः किंविशिष्टः ? कल्याणाङ्कुरकन्दः कल्याणान्येवाङ्कुराः तेषां कन्द इव कन्दः। पुनः किंविशिष्टः ? शममहिमरमामञ्जरीवल्लरीश्रीः शम उपशमः महिमा माहात्म्यं तयो रमा लक्ष्मीः सैव मञ्जरी तत्र वल्लरीश्रीः लतालक्ष्मीः। पुनः किंविशिष्टः ? मन्त्रद्रून्मेषबीजं मन्त्रा एव द्रवः वृक्षास्तेषां उन्मेष उद्गमनं तत्र बीजमिव बीजं ? पुनः किंविशिष्टः ? भुवनजनवनोल्लासलीलावतंसः भुवनानां जना भुवनजनाः, ते एव वनानि, तेषामुल्लासलीला विकाशलीला तत्रावतंस इवावतंसः। एवंविधः पार्श्वेऽभीष्टलब्ध्यै स्यात् ॥१३॥

॥ इति श्रीसमस्यामयः पार्श्वजिनस्तवः सटीकः ॥





For Private And Personal Use Only

ॐ

# । अथ एकाक्षरं विचित्रकाव्यम् ।

( रोरारे० काव्यम् )

ॐ नमः श्रीपार्श्वनाथाय । श्रीमदरस्वामिने नमः। अस्मिन्नपारसंसारसागरे निमज्जतां जन्तुव्रजानां पोततुल्यस्य जगत्रयीलोकनिर्मापितातुल्यवात्सल्यस्य भगवतः श्रीअरनाथस्य स्फुरदष्टमहाप्रातिहार्यलक्ष्मीसनाथस्य सप्तमसमग्रभरत-भूचक्रिणः अष्टादशधर्मचक्रिणः कश्चिद्विपश्चित् कुलालङ्कारावचूलो विज्ञातसर्वतत्त्वातत्त्वविवेकमूलो भगवतोऽनन्ताति-शयैश्वर्यसद्भावेऽपि मौलपूजाज्ञानापायापगमवचोरूपचतुरतिशयप्रकाशनपूर्वं तस्यैव भगवतो नाममन्त्राक्षरसदृक्षैरेवैतत्स्तु-तिवृत्ताक्षरैः स्तुतिसमुद्भूतप्रभूतसुकृतप्राग्भारसमुपार्जनायानेनैव शब्दचित्रेण स्वख्यातिप्रख्यापनप्रसिद्धये चेमां स्तुतिं तस्यैव भगवतश्चक्रेरांचकार इति स्तुतिसमुत्पत्तिसंबन्धः॥

रोरारेरां ररीरीर, रैरीरा रैरुरीररं । रुरोररुरु रे रोर–रुरोऽरा रिरुरारिर॥ १ ॥

व्याख्या–अथेदं पद्यमेकाक्षरं प्रत्यक्षरं व्याख्यायते। तथाहि—उ हे श्रीअर! इति संबोधनं प्रथमपादस्थं। इरां भूमिं

प्र० १३

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थात् भूमिसाम्राज्यं कर्मतापन्नं प्रथमपादस्थमेव । अराः प्रादाः इति चतुर्थपादस्थं । कस्मिन् ? उ इत्यव्ययं संबोधनार्थे रो नरस्तत्र रे नरे इति तृतीयपादस्थं । इति कर्तृकर्मादिसंबन्धः। हे रोर ! तीक्ष्णकोपोक्तित्यजक रा तीक्ष्णा या उ रोषोक्तय 'उ' इत्यव्ययं रोषोक्तिवाचि ता रहति त्यजति यस्तस्य संबोधनं स तथा। "रह त्यागे" इति धातुः । हे अर ! इति जिनसंबोधनं । इरां भूमिमिति कर्म । पुनः किंविशिष्टः ? रः कामो रीश्च भ्रान्तिस्तयोः ईरिणी क्षेपिणी इरा वाणी यस्य स तथा तस्य संबोधनं हे ररीरीर !। अनेन विशेषणेन वचोऽपायापगमातिशयद्वयं सूचयांचक्रे । रशब्देन कामः, कामश्चाभिष्वङ्गात्मा रागः, स च द्वेषं विना न भवतीति द्वेषाव्यभिचारी । यस्य च रागो नास्ति, तस्य द्वेषोऽपि। यस्य चैतद्वयं नास्ति तस्यान्येऽपि क्रोधमानमायालोभमुख्या अपरेऽपि शत्रवोऽन्तरङ्गा निर्मूलं व्यपगता एव । एतेन विशेषणपदांशेन भगवतः श्रीअरनाथस्य सर्वान्तरङ्गारिविजयमाह । रागादिक्षेपिणी च यस्य वाणी विद्यते तस्य कृतरागादिक्षयस्य स्वयं वागतिशयपरमैश्वर्यं अनिवारितप्रसरमेव । पुनः किंविशिष्टस्त्वं ? रैरीराः रो वज्रं, आ समन्तात् ईर्यते क्षिप्यते शत्रुं प्रति यैस्ते रैरिणो वज्रिणः तेषां संबन्धिनी या ईः लक्ष्मीस्तां राति ( ददाति ) इति क्विपि रैरीराः । पुनः कीदृक्षलक्षणस्त्वं ? रैरुरीः राः स्वर्णं, रुः सूर्यः, तयोर्द्वन्द्वः, तद्वत् 'रीङ्' गतिरेषणयोरिति धातुः, अनेकार्थत्वाद्धातूनां कान्त्यर्थोऽपि रीधातुर्द्रष्टव्यः, ततः क्विपि रीः कान्तिर्यस्य स रैरुरीः, स्वर्णवर्णत्वात् जगन्नाथस्यारस्वामिनः । ॥ ७३ ॥
अरं शीघ्रमिति क्रियाविशेषणं । पुनः किंविशेषणविशिष्टस्त्वं ? रुरोर्दैत्यविशेषस्य अरुः व्रणरूपः शल्यरूप इत्यर्थः, दैत्यविशेषोऽपि च देव एव, देवश्च प्रभासादीश्वरः, तस्य च चक्रवर्ती समुद्रादिमध्यस्थितः शरक्षेपकाले शल्यरूपो भवत्येव ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनेन च विशेषणेन परमेश्वरस्य चक्रित्वावस्थाय बाह्यशत्रूणामपि विजयः प्रादुष्कृतो भवति। कस्मिन् ? उ रे नरे उ संबुद्धौ। पुनस्त्वं किंभूतः ? रोराणां दरिद्राणां यद् रुः भयं तस्माद्रक्षतीति रोररुरः। अरा इति क्रिया व्यतारीत्। पुनः किंस्वरूपस्त्वं ? रिः "रांक् दाने" इत्यस्य धातोः कस्यचिदादानेऽपीष्टत्वात् राति गृह्णाति सर्वद्रव्यपर्यायान् इति धातोरर्थे कि.(इक्) प्रत्यये "इडेत्पुसि चातो लुक्" (४-३-९४) इत्यनेन चातो लोपे च रिः ज्ञानं, ज्ञानज्ञानवतोरभेदोपचाराच्च भगवानपि ज्ञानमेवेति ज्ञानवानित्यर्थः। अनेन च विशेषणेन भगवतो ज्ञानातिशयः प्रतिपादितः। पुनस्त्वं कीदृक् ? हे-उर! उना शम्भुना पूजार्थं रप्यते जप्यते इति उरः तस्य संबोधनं हे उर। उश्चोपलक्षणं सर्वदेवानां हरिहिरण्यगर्भपुरन्दरादीनां। ततः सर्वदेवपूज्यस्त्वं, वीतरागत्वादित्यर्थः। अनेन च संबोधनविशेषणेन परमेश्वरस्य पूजातिशयः प्रोक्तः। पुनस्त्वमेव विशिष्यते—हे अरिर अराश्चक्राङ्गं विद्यन्ते यत्र तदरि, अरिणा चक्रेण राजते इत्यरिरः, तस्य संबोधनं अरिर। अनेन च संबोधनपदेन जगदीशितुर्भाविन्यामपि धर्मचक्रित्वप्रदव्यां पूर्वं षट्खण्डभूखण्डसाम्राज्यलक्ष्मीपदव्यपि लक्षयांचक्रे॥ इति श्रीमदरनाथस्यैकाक्षरस्तुतिगर्भवृत्तस्यार्थसमर्थनप्रकारो लेशतः प्रकटीचक्रे। इत्यरनाथस्तुतिः ॥ १ ॥

अथ तीर्थान्तरीयजनमनःप्रीतये तेषामुपादेयतासिद्धये च देवतान्तरहिरण्यगर्भहरिहरपक्षाश्रितोऽप्यर्थः प्रस्तूयते—

रोरारेरार रीरीर, रैरीरा रैरुरीररं। रुरोररुरुरेरोर–रुरो रारिरु रारिर ॥ २ ॥

व्याख्या—कश्चन नरः श्रीब्रह्मलब्धप्रसादो जगत्कर्तारं तमेव ब्रह्माणं भक्तिप्राग्भारभावितस्वान्तोऽभितुष्टाव। हे आः ब्रह्मन्! भवान् उरो-हृदयं आर-प्राप अर्थात् सुकृतिनां इति कर्तृक्रियादिसंबन्धः। अथ प्रत्यक्षरं योजना विधीयते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





हे रोर! रक्षतीति यः स रो य उः ईश्वरः तत्र पूजनार्थं रङ्गति गच्छतीति "क्वचिद्"(५-१-१७१) इति उभयत्रापि डे रोरः तस्य संबोधनं हे रोर। "रगु गतौ" इति रगुधातुः। आर प्राप इति क्रिया। न चेश्वरपूजनं ब्रह्मणोऽयुक्तमिति वाच्यं, यत उक्तं—"कोमलमर्चति कंसस्तावीशं न तु तावीशः। तस्मात्तमहमर्चामि शङ्करं विश्वशङ्करम् ॥ १॥ इति"। हे इरार इरां भुवं स्वप्रणतेभ्यो राति ददातीति हे इरार। हे रीरीर! रीर्भ्रान्तिः विपर्ययेण वस्तुस्वरूपपरिज्ञानलक्षणा तस्याः क्षेपिणी इरा वाणी यस्य तस्य संबुद्धौ हे रीरीर। यदुक्तमनेकार्थनामकोशे—"इराम्भोवाकूसुराभूमिषु" इति इराशब्देन वाणी। किंविशिष्टस्त्वं? रैरीः रैवत् कनकवत् रिणाति शोभते इति "रींश् गतिरेषणयोः" इति धातुः रैरीः। आः ब्रह्मन् इति संबोधनं। किंविशिष्टः? रैरुः रैवत् मेघवत् रुः शब्दो वेदोच्चारसमये यस्य स तथा। पुनः किंविशिष्टस्त्वं? ईईर् ई इत्यव्ययं प्रकोपार्थे तं ईर्ते "ईरिक् गतिकम्पनयोः" कम्पयतीति ईर् दीर्घत्वं। अरं लघु इति क्रियाविशेषणं। रुवन्तीति क्विपि रुवः शब्दायमाना ये रोरा दरिद्रास्तेषां यत् रुर्भयं तस्य यत् रु रक्षणं तत् रचयतीति रुरोररुरर संबुद्धौ। ई लक्ष्मीं रमते इति कृत्वा ईरो विष्णुस्तत्र वसतीति वसेः क्विपि ऊः ईरोः, ब्रह्मणो विष्णुनाभिभूतत्वात्। पुनः कीदृक्? "ऋश्" गतौ इति धातुः सर्वे गत्यर्था ज्ञानार्था इतिवचनात् ऋणाति जानाति अर्थात् सर्ववस्त्विति विचि गुणे च अर् इति सिद्धं। उरो हृदयं कर्मतापन्नं। पुनस्त्वं कीदृक्? रस्य कामस्य अरिः वैरी, जितकन्दर्पत्वात्। पुन कीदृक्षः? उ रारिर उ इत्यव्ययं संबोधनार्थे। रं तीक्ष्णं अरि चक्रं येषां ते रारिणः चक्रिणो जनार्दनादयस्तैः राजते इति रारिरस्तस्य संबोधनं। इति ब्रह्मपक्षाश्रितोऽर्थः॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ विष्णुलक्ष्मीपक्षाश्रितोऽर्थः प्रकाश्यते—

रोरारेरा ररीरीर–रैरीरारैरुरीररम् । रुरोररुरे रोरु–रुरो रारिरुरा रिर ॥ ३ ॥

व्याख्या—कश्चिन्नरो विष्णुं प्रपूज्य तमेव जगन्निवासं स्तुतिगोचर्यचरीकारीत् । हे इ ! लक्ष्मि एः विष्णोस्त्वं उरः ऐः प्रापः । लक्ष्मीः किंविशिष्टा ? रोरारेरा रोराणां दरिद्राणां यदारं दारिद्र्यादिशत्रुसमूहस्तं (तत्) ईरयतीति क्षेपयतीति अचि रोरारेरा । पुनः सैव विशिष्यते—रं तीक्ष्णं यत् रीरीवत् दीप्यमानं रो वज्रं तदेव रा धनं यस्य स ररीरीररा इन्द्रस्तत्र प्रणामार्थं ज्येष्ठत्वात् रिणातीति "रींश् गतौ" इति धातोर्गच्छतीति क्विपि ररीरीररैरीः तस्याः संबोधनं हे ररीरीररैरि । हे इ लक्ष्मि । पुनः किंभूता ? इराऽरा इर इति शब्दः समीपवाची देशीयः इरे अराः शीघ्रगाः "अरं चकाङ्गे शीघ्रशीघ्रगयोरपि" इत्यनेकार्थवचनात् नरा यस्याः सा तथा । ऐः प्रापः क्रिया । उरी विस्तारोऽर्थाद्दिव्यर्धस्तत्र ऋणातीति क्विपि "ऋतां क्ङितीर्" (४-४-११६) इति इरादेशे उरीर् । पुनस्त्वं कीदृशी ? रुरोर्दैत्यविशेषस्य अरुः व्रणः शल्यरूपा साम्रागा (समरा) ङ्गणे नानादैत्यानां भेदकत्वात् । इयमेव विशिष्यते—उरून् गुरून् समृद्ध्या स्वभक्तान् नरान् करोतीति क्विपि उर् । एः विष्णोः षष्ठ्यन्तं पदमेतत् । पुनः सा कीदृशी ? राजेते इति डे रौ शोभायमानौ ऊरू यस्याः सा तथा । उरो हृदयं कर्मतापन्नं, विष्णुकलत्रत्वेन तस्यास्तदुरोनिवासो युक्त एव । पुनः किंविशिष्टा ? अरारिरुरा अरं शीघ्रं यदरीणां रुर्भयं तस्मात् रक्षतीति अरारिरुरा । ऋशब्दोऽव्ययः कुत्सावाची, इकारश्चाव्ययः खेदवाची, ततः ऋ कुत्सितो य इ खेदस्तं रहति त्यजति यत् हृदयं तस्य विशेषणमिदं तद् रिरं । अत्रानुस्वारो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽसन्नपि श्लोके चित्रत्वेऽध्याहारादोषात् द्रष्टव्यः। इति लक्ष्मीविष्णुपक्षाश्रितोऽयमर्थो लेशतो दर्शितः ॥ ६ ॥ अथ कश्चिदन्ययूथ्यःस्वमानसान्तरप्रथमानासमानभक्तिव्यक्तिः स्वकीयदैवतं शम्भुं पर्यष्टौत् इति शम्भुपक्षाश्रितोऽर्थः प्रकाश्यते-

रोरारेऽरा ररीरी र–रैरीरारैरुरीररम् । रुरोऽररुरु रे रोरु–रुरो राररिरुरारिर ॥ ४ ॥

व्याख्या–ओ उ इत्यव्ययं संबुद्धौ ओ हे शम्भो त्वं ईर्लक्ष्मीः कर्मतापन्नाः रे नरेऽर्थात् स्वभक्तेऽराः प्रायच्छः इति कर्त्रादिसंबन्धः । हे रोरारे! रोरा दरिद्रा आरस्य ईः लक्ष्मीर्यस्य तस्य संबोधनं तथा। अराः लक्ष्मीः । किंविशिष्टाः ? रं कामं रिणन्ति गच्छन्तीति ररीः कामार्थसहिता इत्यर्थः । ईः लक्ष्मीः पुत्रमित्रकलत्रधनधान्यसमृद्धिरूपाः कर्म । हे रैरीर रं वज्रं तदेव रा द्रव्यं यस्य स इन्द्रस्तस्य रीर्भ्रान्तिरज्ञानविपर्ययज्ञानलक्षणा तां ईरयति निराकरोतीति अचि हे रैरीर । पुनः किंविशिष्टस्त्वं ? आ समन्तात् यो राः स्वर्णं तस्य रुः रक्षणः (कः) । पुनः कीदृग्लक्षणलक्षितस्त्वं ? ई प्रत्यक्षार्थेऽव्ययं, ई प्रत्यक्षं अर्थात् स्वर्गक्षितिपातालरूपत्रैलोक्यस्य ऋणाति प्रयातीति क्विपि ईर् । अरं शीघ्रं । पुनस्त्वं कीदृक् ? रुः रक्षकः अर्थात् संसारभयस्य हे ओ शम्भो इति संबोधनं। पुनस्त्वं कथंभूतः ? अररुः न विद्यते ररुर्भयं यस्य स तथा । उ कस्मिन् लक्ष्मीस्त्वमरा उ इति संबुद्धौ रे पुरुषे। त्वं किंभूतः ? रः तीक्ष्ण उरुर्विशालो रुः सूर्यः तद्व-द्रोचते दीप्यते स्वकान्त्या यः स रोरुरुरः । पुनः कीदृक् ? रारिः कामस्यारिः। हे उरारिर उं ईश्वरं रपन्तीति उरा ईश्वर-नामग्राहिणः एवंविधा येऽरिणश्चक्रिणो रावणादयस्तान् रक्षति परेभ्य इति उरारिरः तस्य संबोधनं हे उरारिर । इति शम्भुपक्षाश्रितोऽप्यर्थप्रथनप्रकारप्रकटनप्रकारः ॥ ४ ॥ ॥ इत्येकाक्षरं विचित्रकाव्यम् ॥



For Private And Personal Use Only

ॐ

# । द्विस्वरत्रिव्यञ्जनयुक्ता षट्श्लोकी ।

स रसासारसंसारं, संसारं तरसा रसात् । ततार तरसा तारं, ससतां तारसाररा: ॥ १ ॥

टीका—हे "तारं ससतां तारसाररा:" तारमतिशयेन, ससतां सत्येन सह वर्तन्त इति ससन्तस्तेषां ससतां सम्यक्-तत्त्ववतां पुरुषाणां, परमपुरुषनयनस्य तारः कनीनिका तद्रूपं सारं न्याययुक्तिसङ्गतोऽर्थः तदेव रा धनं यस्य तस्यामन्त्रणं हे तारं ससतां तारसाररा: । "सः" सकलाबालगोपालप्रसिद्धो भवान् ( भगवान् ) "तरसा" वेगेन । "तरसा" बलेन निरवधिध्यानरूपेण । ( रसात् ) यज्जातनिर्वृतिरूपनियतानुयोगात् । "संसारं" भवं वार्धिवदगाधस्वरूपं । "ततार" तीर्णवान् । किंभूतं संसारं ? "रसासारसंसारं" रसै रौद्रादिभिः असारोऽनुत्तमः संसारः संसरणं परिभ्रमणं यत्र तं रसासारसंसारम् ॥ १ ॥

तान्तासात रसं तान्ता–सातान्तं संततातत । सारसारसतारान्त–रससारसरः सताम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका—हे "संतत" सं शोभनार्थे विशिष्टवीर्यविज्ञानादिभिः तत व्याप्त, 'सं अव्ययं शोभनार्थे' इत्यनेकार्थः । हे "तान्त" ता लक्ष्मीरन्ते समीपे यस्य स हे तान्त । भवान् । "सतां" सज्जनानां । "रसं" निरुपमं परमामृतस्वादं । "असात" अदात् । अत एव "तान्तासातान्तं" "अतत" अतनोत्, तान्तं विस्तीर्णं असातं दुःखं तस्य अन्तं नाशं कृतवानित्यर्थः । कथंभूतः सः ? "सारसारसतारान्तरससारसरः" सारं बलं तदेव सारसश्चन्द्रः, तारान्ताः रूप्यावयवाः, रसः पारदः, तद्वदुज्वलं विमलं सारं जलं तस्य सरस्तडागः अतुलबहलबलाधार इत्यर्थः ॥ २ ॥

**सारतां रसता तारं, तारतारसारत । तातारारसतां तात–तारातरसतः सतः ॥ ३ ॥**

टीका—हे "तारतारसारत" तारा नक्षत्राणि, तारा निर्मलमौक्तिकानि, रसो जलं, तद्वन्निर्मलं अरतं ब्रह्म यस्य तस्यामन्त्रणं हे तारतारसारत । हे "तातारातः" ताताः अनुकम्प्याः सत्त्वाः तेषां तां लक्ष्मीं रातीति राता तस्यामन्त्रणं हे तातारातः । हे "तात" भवता करुणारसलालसेन । "सतः" विदुषः । "असतः" मूर्खानपि अधिलक्ष्य ( न त्यजति ) । "तारं" उच्चतरस्वरं । सारतां परमधर्मश्रेष्ठतां सिद्धान्तमुखेन "रसता" कथयता । अहमज्ञोऽपि "अरसतां" नीरागतां । " आर" प्राप ॥ ३ ॥



**रसरासासरसासा–सारसारससारसं । रसासाररसासारं, रसं सरससारसम् ॥ ४ ॥**

टीका—हे "रसरासासरस" रसः शान्तरसः,रासा भाषाशृङ्खलकानि विविधभाषाचित्राणि तेषां आस उपवेशनं यत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सा रसरासासा एवंरूपा रसा जिह्वा यस्य तस्यामन्त्रणं हे रसरासासरस! भगवन् भवान्। "रसं" रागं अरिरूपं। "आस" निराकृतवान्। किंभूतं? "असारसारससारसं" असारं अयुक्तं न्यायान्यायोपार्जिता सा लक्ष्मीः सैव रसो जलं तत्र सारसं कमलं। पुनः किंभूतं? "रसासाररसासारं रसायां जगत्यां असारोऽस्थिरो रसः शृङ्गारः स एव असारो बलप्रसारो यस्य स तं रसासाररसासारं। पुनः किंभूतं? "सरससारसं" रसेन देहधातुविशेषेण सह सारो मज्जा (तां) स्यतीति। यतो रागात्मनां कामिनां देहधातुवीर्यादि सर्वं क्षीयते इति। अयमत्र भावः—रागः शत्रुराजः शृङ्गारबलप्रसारेण जगद्विद्रवन् भगवता निरासितः ॥ ४ ॥

रसासारं सतां तार–रतं संसरतां सताम्। संसारान्तररं सा त–ततारं सारसं ततः ॥ ५ ॥

टीका—हे "साततत" सातेन परमसुखेन तत व्याप्त। तत आदौ अस्मिन् भवे गत्याभोगात् अहं त्वां परमदैवतं "आरं" प्रापं। किंभूतं? "रसासारं" रसाया वसुधाया आसारो मेता (घः) अर्थात्रिजगत्याऽ (त्याअ) पि। पुनः किंभूतं? "सतां ताररतं" सतां साधूनां ताराय तारणाय रतं सक्तं (यस्य तं सतां साररसं)। किंभूतानां सतां? "संसारान्तः संसरतां" सतां, भवमध्ये भ्राम्यतां सतां। पुनः किंभूतं त्वां? "अरं" अत्यर्थं। "सारसं" सारा स्थिरा सा लक्ष्मीर्यस्य तम् ॥ ५ ॥

सान्तांतरारराररा, रसारसस संतत। सान्तरान्तरान्तान्तं तं, रससारतरान्तर ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





टीका—हे "सान्तान्तरारराररार" अन्तेन सह वर्तत इति सान्तो विनाशशीलोऽन्तर्मध्य आरो वैरिगणस्तस्य ध्वंसाय रा तीक्ष्णा रा शस्त्री (यस्य) तस्यामन्त्रणं हे सान्तान्तरारराररार। हे "रसारसस" रसो विषं तद्रूपा अरसास्तुच्छरसाः शृ-ङ्गारादयस्तान् स्यतीति क्षयं नयतीति व्याख्यामुखेन । हे "संतत" । हे "रससारतरान्तर" रसः शान्तरसः स एव सारतरः श्रेष्ठतरः अन्तरः आत्मा यस्य तस्यामन्त्रणं हे रससारतरान्तर । हे विभो त्वं भव्यानां "तं" सकलाप्तप्रतीतं । "सान्तरान्तरान्तान्तं" सान्तरः सविशेषः अन्तरः अन्तरङ्गः अन्तः स्वरूपं तस्य अन्तं निश्चयं सकलजगज्जन्तुजातजी-वान् ददा ( सि )ति स्मेति ॥ ५ ॥ ॥ इति षट्श्लोकीविवरणम् ॥

# । अथ चतुःश्लोकी स्तुतिः ।

सहसा महसा सहसा महसा, महता परमं महताऽपरमम् ।
शमितस्वमृतं शमितस्वमृतं, गवि तीर्थकरं गवि तीर्थकरम् ॥ १ ॥

व्याख्या—सहसाऽतर्कितं । महत पूजयत । तीर्थकरमिति संबन्धः । किंभूतं ? परमं प्रकृष्टं । केन ? सहसा बलेन, ॥ ७७ ॥
तथा महसा उत्सवेन, महसा तेजसा । महतेति त्रयाणामपि विशेषणं । अपरमं निवृत्तकामं, "रमः कान्ते रक्ताशोके, मन्मथे च रमा श्रियां" इतिवचनात् रमो मन्मथः । शं सुखं इतं प्राप्तं स्वमृतं प्रधानमोक्षो येन तं । शमितं निवर्तितं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वस्यात्मनो मृतं मरणं येन सः। गवि भूम्यां। तीर्थस्य सङ्घस्य कं सुखं रातीति। गवि, स्वर्गे च यतः सम्यग्ज्ञानदर्शनगुणालङ्कृतत्वेन अविरतगुणस्थानवर्तित्वेन च सम्यग्दृष्टिदेवदेवीनां शङ्करत्वात्॥ १॥

रुचिरारुचिरा रुचिराजिघना, जनका जनका जनकामभिदः।
महितामहिता महिता दधता–मतमामतमा मतमामरुहाः॥ २॥

टीका—रुचिरा मनोज्ञा रुचिर्मनोरथस्तां रान्ति ये ते। रुचिराजी प्रभाशोभी घनो देहो येषां ते। जनकाः पितृतुल्याः। तथा जनकाः। कस्याः? जनानां कामस्य भिद् भिदा तस्याः। महिः। सोत्सवा ताँ* चारित्रलक्ष्मीर्येषां ते महिता आमेषु रोगेषु हिताः पथ्याः। तथा लोकोक्तिः अस्मिन् लोके (रोगे) हरीतकी हितेति आमहिता रोगहरत्वात्, महिताश्च ते आमहिताश्च महितामहिताः। महिता इन्द्रादिभिः पूजिताः। दधतां पुष्णन्तु। तमो लोभः स एवाधिव्याधिहेतुत्वात् आम इव तमामः, न विद्यते तमामो येषां ते (अतमामाः) अतिशयेन अतमामाः अतमामतमाः। मतमां सिद्धान्तलक्ष्मीं अभीष्टश्रियं वा। अरुहा अर्हन्तः इति॥ २॥

शमरं शमरं दधतं दधतं, समयं समयं सदयं सदयम्।
सुपदं सुपदं नुत तं नु ततं, बहुधां बहुधामहितं महितम्॥ ३॥

---

* ता सा श्रीः कमलेन्दिरेति कलिकालसर्वज्ञपादाः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



टीका—नुत स्तुत तं समयं सिद्धान्तं इति योगः। किंभूतं? दधतं पुष्णन्तं। किं? सुखं। अरं क्षिप्रं भवनकालादनन्तरमित्यर्थः। किंभूतं शं? शमरं कषायोपशमदं दधतं बिभ्राणं। समयमाचारं। सदयं सकृपं। सन्विद्यमानोऽयः शुभावहो विधिर्यस्य तं। शोभनपदं। सुपदं वरव्यवसायं स्वर्गापवर्गदानुष्ठानसमर्थमित्यर्थः। न्विति पादपूरणे। ततं विस्तीर्णं। बहुधेति क्रियाविशेषणं। बहुधाम प्रचुरप्रभावं हितं अनुकूलमित्यर्थः॥ ३॥

विभया सितया विभयाऽऽसितया, कलिता परदा कलितापरदा।
वरदानकरा वरदानकरा, सतिगौरवमा सति गौरव मा॥ ४॥

टीका—विभया निर्भीतिः। सितया धवलया विभया कान्त्या। आसितया शरीरस्थितया। कलिता युक्ता। परदा शत्रुखण्डिका। कलितापरदा विग्रहजनितचित्तोद्वेगविलेखिनी। वरं मनोवाञ्छा, तं ददातीति वरद एवंविध (आन) स्तदभिनयसूचकः करो हस्तो यस्याः सा। वरान(न्)सम्यक्त्वाद्यवाप्त्या प्रधाना(न्)दयते पालयतीति वरदमेवंविधं कं ज्ञानं राति या सा। सती विद्यमाना गौरवस्य मा लक्ष्मीर्यस्याः। खेति भिन्नेति ह्रस्वः (?)। सति सदाचारे। हे गौः हे सरस्वति!। अत्र रक्ष। मा मामिति॥ ४॥ चतसृष्वपि स्तुतिषु तोटकच्छन्दः॥

॥ इति स्तुतिः॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# । अथ श्रीवर्धमानजिनस्तवः ( निर्वर्ग्यः ) ।

( सावचूरिः )

श्रेयःशालः सहःशाली, श्रीवीरः श्रेयसां हि वः। वारंवारं वरं वारं, वासवावासवासरः॥ १ ॥

अवचूरिः—श्रीवीरः श्रेयसां मङ्गलानां वरं श्रेष्ठं वारं समूहं वारंवारं मुहुर्मुहुः वो युष्माकं । ददातु इत्यध्याहार्यं । किंभूतः ? श्रेयःशालः श्रेयसि मोक्षे शाला गृहं यस्य सः, सिद्धा(द्ध्या)वासत्वात्। पुनः कथंभूतः ? सहसा बलेन शालते शोभत इति सहःशाली । पुनः किंभूतः ? वासवावासे स्वर्गे वासमावासं स्थितिं राति ददातीति वासवावासवासरः स्वर्गवासप्रदः इति ॥ १ ॥

सहसा सार्वसिंहावा- शिवोहवैरिवीर हे । वारिवाहरव वीर, वसुसारशरीररुक् ॥ २ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—हे वीर ! सहसा शीघ्रं अव रक्ष मां भवभयादिति शेषः । हे सार्वसिंह जिनशार्दूल । ( सिंहेन लक्ष्मगतेन सह वर्तते यः स सिंहः ) । अशिवस्यामङ्गलस्य य ऊहः समूहस्तद्रूपो वैरी शत्रुस्तस्य पराजये वीरः यः सोऽशिवोहवैरिवीरः तस्य संबोधनं । पुनः हे मेघसमनाद! । हे स्वर्णप्रधानकायकान्ते! ॥ २ ॥

सुरासुरेशसंसेव्य, शम्बरारिसहोहर । श्वोवसीयससंराशि–वर्यावास वशीश्वर ॥ ३ ॥

अव०—हे सुरासुरेशसंसेव्य इति सुगमं । हे मदनारिबलहर । हे मङ्गलसमूहप्रधानगृह । हे मुनिनायक ॥ ३ ॥

संसारवारिराशीरा–त्ररोर्वसेय संवर । श्रेयःसहस्त्रबर्हाली–हासश्रीवासरेश्वर ॥ ४ ॥

अव०—संसारसमुद्रजलशोषणे प्रधानागस्तिसम । संवरणं संवरः, संवरो वैराग्यं ( अस्मिन् स संवरस्तस्य ) संबुद्धौ हे संवर । मङ्गलकमलश्रेणिविकाशशोभादिनकरस्तस्य संबोधनं ॥ ४ ॥

अंहोरसारुहवार्क्ष(प्लोष) (प्लक्ष)हव्यवाह बलांसल । वारीशसूर सूरीश, सूरांशो सहसा सह ॥ ५ ॥

अव०—हे पातकवृक्षवनदाहकृशानुसमान । हे बलपुष्ट! हे बलमयेत्यर्थः । वारीशसूर्लक्ष्मीस्तां राति ददातीति यः स वारीशसूरः तस्य संबोधनं हे लक्ष्मीप्रद । हे पण्डितजननायक । हे सूर्यसमकान्ते । हे सह ! हे समर्थ ! (सहसा-युगपत्) सर्वाशापूरणे इति शेषः ॥ ५ ॥

हारिहारहरहास–क्षीरक्षीराम्बुसद्यशः । शिववृक्षशिरःसार–क्षीरवाह व्यवायहृत् ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—हे हारिहारहरहासक्षीरक्षीराम्बुसद्यशः! हारी मनोहरो यो हारः हरहासश्चेश्वरहसनं, क्षीरं च, क्षीराम्बुश्च क्षीरसमुद्रः, हारिहारहरहासक्षीरक्षीराम्बवस्तद्वदुज्ज्वलं निर्मलं सत् प्रधानं यशो यस्य स तथा तस्य संबोधनं। हे शिववृक्षशिरःसारक्षीरवाह! हे मङ्गलतरुशिरःसिञ्चनप्रधानतरजलद। हे व्यवायहृत्! हे विघ्नहर ॥ ६ ॥

शिवश्रीवर शौर्य्यर्य्य, विश्वविश्वालसंहर। रोषव्यूहारिसंहारिन्, शिशिरांश्वास्यसारस ॥ ७ ॥

अव०— हे सिद्धिलक्ष्मीपते। हे शौर्य्यर्य्य! शौर्यं विद्यते येषां ते शोर्यिणस्तेषामर्य्यः स्वामी यः स शौर्य्यर्य्यः तस्य संबोधनं हे शौर्य्यर्य्य हे पराक्रमवत्पते! अतुलपौरुष इत्यर्थः। हे विश्वविश्वालसंहर! विश्वे त्रिजगति विश्वानि समस्तानि यानि आलानि अनर्थास्तानि संहरति अपनयति यः स तथा तस्य संबोधनं विश्वविश्वालसंहर। हे रोषव्यूहारिसंहारिन्! रोषः क्रोधस्तद्रूपो व्यूहो महान् योऽरिः शत्रुस्तस्य संहारो मरणं विद्यते यस्मात्स रोषव्यूहारिसंहारी तस्य संबोधनं। हे शिशिरांश्वास्यसारस! शिशिराः शीतला अंशवः किरणा यस्य स शिशिरांशुश्चन्द्रस्तद्वदास्यसारसं मुखकमलं यस्य स तथा तस्य संबुद्धौ हे शिशिरांश्वास्यसारस ॥ ७ ॥

एवं महावीरजिनेश पञ्च–वर्गाक्षरालीरहितेन सम्यक्।
शं सूरचन्द्रेण मया स्तवेन, देहि स्तुतो भूतलभूषण त्वम् ॥ ८ ॥

अव०—एवमित्यादि कण्ठ्यम् ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ

# । अथ श्रीफलवर्धिपार्श्वस्तोत्रम् ।

( सटीकम् )

नत्वा सरस्वतीं देवीं, गुरोश्च क्रमयामलम् । स्तोत्रस्यास्य मया किञ्चि-द्व्याख्या प्रारभ्यते मुदा ॥

श्रेयोमयं ह्री बलमालमालमा-ह्लादावलीदं सकरंकरं करम् ।
श्रेयोऽग्रलक्ष्म्याः प्रवरं वरं वरं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ १ ॥

व्याख्या—ही इति विचित्रे ( वैचित्र्ये )। ( अहं पार्श्वं वामेयं सार्वीयं भजे सेवे )। कः कर्ता ? अहं। कं कर्मतापन्नं ? पार्श्वं। भजे इति क्रियापदं । अथ प्रभोर्गुणगणवर्णनकरणमाह—कथंभूतं पार्श्वं ? श्रेयोमयं श्रेयः कल्याणं तदेव प्रधानं यस्य स श्रेयोमयस्तं। अत्र प्राधान्यार्थे मयट्। पुनः कथंभूतं ? बलं बलं विद्यतेऽस्मिन्नसौ बलस्तं। पुनः ॥ ८० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथंभूतं ? आलमारः आलमनर्थः अर्थादुपद्रवस्तं मारयति निराकरोतीति आलमारः, अत्र रलयोरैक्यं, अनर्थसार्थमथक इति । पुनः कथंभूतं ? आह्लादावलीदं आ समन्तात् ह्लादस्य आनन्दस्यावली माला तां ददातीति आह्लादावलीदस्तं । सकरमित्यत्र बिन्दुच्युतकं । करयोरित्यत्र रलयोरैक्यं । करस्य कान्तेः कला शोभारूपा तया सह वर्तत इति यः स तं सकरकलं । पुनः कथंभूतं ? । करं कलं मनोज्ञं । पुनः कथंभूतं ? श्रेयोऽग्रलक्ष्म्याः श्रेयो मुक्तिस्तद्रूपाऽग्रलक्ष्मीः प्रधानश्रीः तस्याः श्रेयोऽग्रलक्ष्म्याः मुक्तिरूपप्रधानश्रियाः वरं भर्तारं । पुनः कथंभूतं ? बरं बं विमलं नैर्मल्यं अर्थान्निष्पापत्वं राति ददातीति बरः पुण्यद इत्यर्थः तं, बवयोरैक्यं । यथैकाक्षरनाममाला—"बशब्दः स्याद्विमले बिन्दुविसर्गे च कुवले चेति" । पुनः कथंभूतं ? सकलं कलया ज्ञानकलया सहितो यः स सकलः तं । पुनः कथंभूतं ? कलं कलं कलंको लोकापवादस्तं लुनाति च्छेदयति यः स कलंकलस्तं । यो जिनं जनः स्तौति तस्य लोके लोकापवादो न भवतीत्याशयः इति ॥ १ ॥

यः शर्मदं प्रष्ठतमस्तमस्तमः–संस्फेटनांशुर्विदरं दरंदरम् ।<br>
विश्वस्य देवैर्महितं हितं हि तं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ २ ॥

व्याख्या—हि निश्चितं तं पार्श्वमहं भजे सेवे । तं कमित्याह—यः पार्श्वः तमस्तमःसंस्फेटनेऽंशुर्वर्तते तमः पापमज्ञानं वा तदेव तमोऽन्धकारं तस्य तमस्तमसः सम्यक्प्रकारेण स्फेटनं दूरीकरणं तस्मिन् अंशुरिवांशुः अज्ञानान्ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारहरणकरणतरणिकरणिरित्यर्थः । पुनः कथंभूतः ? यः पार्श्वः प्रष्ठतमः अतिशयेन प्रष्ठः श्रेष्ठः प्रष्ठतमः । अतिशयार्थे तमप्रत्ययोऽत्र । कथंभूतं पार्श्वं ? शर्मदं शर्म सुखं ददातीति शर्मदस्तं । पुनः कथंभूतं ? विदरं विगतो दरो भयं यस्मात्स विदरस्तं । पुनः कथंभूतं ? दलदलं दलानि अर्थात् कर्मबलानि तानि दलति मश्नातीति दलदलस्तं । अत्र रलयोरैक्यं, अत्र बिन्दुच्युतकमपि । पुनः कथंभूतं ? विश्वस्य त्रिजगतो हितं हितकारकं अर्थात् जगज्जन( राज )-राजिविहितहितसन्ततिमित्यर्थः ॥ २ ॥

सभ्याब्जबोधे सुभगं भगं भगं-युक्तं तपोऽर्चिर्व्रजिनं जिनं जिनम् ।
शंमारतौ वै विशदं शदं शदं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ ३ ॥

व्याख्या—वै स्फुटं अहं पार्श्वं भजे । अन्यत्सर्वं प्राग्वत् । कथंभूतं पार्श्वं ? सभ्याब्जबोधे भगं सभ्याः सज्जनास्तद्रूपाण्येवाब्जानि नलिनानि तेषां बोधनं बोधस्तत्र सभ्याब्जबोधे भगं रविं सज्जनजनाब्जबोधनाब्जबान्धवमित्यर्थः । पुनः कथंभूतं पार्श्वं ? सुभगं सुष्ठु भगो माहात्म्यं यस्य स तं सुभगं । पुनः कथंभूतं ? भगयुक्तं भगेन ज्ञानेन युक्तं भगयुक्तं ज्ञानसमन्वितं, अत्र बिन्दुच्युतकं । पुनः कथंभूतं ? तपोऽर्चिर्व्रजिनं तपसोऽर्चींषि कान्तयस्तेषां तपोऽर्चिषां व्रजः समूहो विद्यते यस्य स तथा तं तपोऽर्चिर्व्रजिनं तपःकान्तिकलापसहितमित्यर्थः । पुनः कथंभूतं ? जिनं जयति कर्मशात्रवानिति जिनस्तं । पुनः कथंभूतं ? शं सुखं तद्रूपैव मा लक्ष्मीस्तया सह या रतिः संभोगसंयोगस्तत्रं जिनं ॥ ८१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृष्णं सौख्यमुख्यलक्ष्मीभोगयोगे गदाग्रजमिवेति । पुनः कथंभूतं ? विशदं निर्मलं कर्ममलरहितमिति । यद्वा विशत् प्रविशत् अं परमब्रह्म यस्मिन्नसौ विशदस्तं, परमब्रह्ममयत्वात् । यथैकाक्षरनाममालायां—"अं भवेत् परमं ब्रह्मेति" पुनः कथंभूतं ? शदं शः शान्तिशोभा उपशमरूपा तं ददातीति शदः तं । यथैकाक्षरनाममालायां—"शः परोक्षे समाख्यातः शान्तिशोभावरेण्ययोः" इति । पुनः कथंभूतं ? सदं सं श्रेष्ठं तद्ददातीति सदः तं प्रधानवस्तुस्तोमदायकमिति । अत्र शसयोरैक्यं । यथैकाक्षरनाममाला—"सकारः कीर्तितः श्रेष्ठे" इति ॥ ३ ॥

तेजोनिशान्तं तरसा रसारसा–लीलं शिवागे जलदं लदं लदम् ।
शिवांगनाया ह्यपतिं पतिं पतिं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ ४ ॥

व्याख्या—तरसा शीघ्रं पार्श्वमहं भजे । अन्यत्सर्वं प्राग्वत् । कथंभूतं पार्श्वं ? तेजोनिशान्तं तेजसो वर्चसोऽर्थाज्ज्ञानज्योतिषो निशान्तमिव यः स तं तेजोनिशान्तं तेजःस्थानं । पुनः कथंभूतं ? रसारसालीलं रसायां पृथिव्यां ये रसा अर्थात् क्षीरतरसास्तेषामाली श्रेणिस्तां लुनातीति रसारसालीलस्तं रसावशारसराशिरहितमित्यर्थः । पुनः कथंभूतं ? शिवागे जलदं शिवं मङ्गलं तद्रूपोऽगो वृक्षस्तत्र जलद इव यः स तं शिवागे जलदं, मङ्गलतरुशिरःसिञ्चनजलदपटलं । पुनः कथंभूतं ? लदं लो दानं अर्थादत्र दानमभयदानं तं ददातीति लदस्तं अभयदानदायकमित्यर्थः । पुनः कथंभूतं ? लदं लो व्याजः कपटस्तं द्यति खण्डयतीति लदस्तं कपटकोटिखण्डनकरमिति । यथैकाक्षरनाममाला—"ल इन्द्रे लवणे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याजे लश्च दाने प्रकीर्तितः" इति । पुनः कथंभूतं पार्श्वं ? शिवांगनायाः पतिं "हि इति निश्चितपादपूरणासूयासु" शिवं सिद्धिस्तद्रूपा याऽङ्गना रमणी तस्याः शिवांगनायाः पतिं भर्तारं निर्वाणवरेण्यरमणीरमणसाधारणमिति । पुनः कथंभूतं ? अपतिपतिं न पतिर्विद्यते येषां तेऽपतयो निःस्वामिनस्तेषामपतीनां पतिः स्वामी तमपतिपतिं अनाथनाथं, अत्र बिन्दुच्युतकं ॥ ४ ॥

अंहस्त्रियामोष्णकरं करंकरं, कल्पावदं सर्वविदं विदं विदम् ।
कैवल्यकारं सुकुलं कुलं कुलं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ ५ ॥

व्याख्या—पुनः कथंभूतं पार्श्वं ? अंहस्त्रियामोष्णकरं अंहः पातकं तद्रूपा या त्रियामा निशा तत्र अर्थात्तस्याः स्फेटने उष्णकर इव रविरिव यः सोऽंहस्त्रियामोष्णकरस्तं पातकजातकदोषापहारसूर्यानुहारमित्यर्थः। पुनः कथंभूतं ? करकरं करः शुण्डादण्डस्तदनुकारौ करौ भुजायामलं यस्य स करकरस्तं करकरं प्रशस्तहस्तिहस्तहस्तद्वैतमित्यर्थः। अत्र बिन्दुच्युतकं । पुनः कथंभूतं ? कल्पावदं कल्पा शुभा गम्भीरसान्द्रभद्रविधायिनी तां वदतीति कल्पावदस्तं कल्पावदं "मा हत मा हत" इति वचनकथनात् कल्पावदः शुभवाणीवदक इति । पुनः कथंभूतं ? सर्वं वेत्ति जानातीति सर्ववित् तं सर्वविदं सकलप्रकटाप्रकटवस्तुव्रातज्ञातारं सर्वज्ञमित्यर्थः । पुनः कथंभूतं ? विदं विगतं दं कलत्रं स्त्रीपरीग्रहो यस्य यस्माद्वा विदस्तं विगतपरिग्रहपरिग्रहं । यथैकाक्षरनाममालायां—"दं कलत्रं बुधैः प्रोक्तं, छेदे दाने च दातरि" इति । ॥ ८२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनः कथंभूतं ? विदं विर्गमनं अत्र अर्थाच्चतुर्गतिभ्रमणकरणलक्षणं तत् द्यति खण्डयतीति विदस्तं विदं दुर्गतिविच्छेदनच्छेकमित्यर्थः । पुनः कथंभूतं ? कैवल्यकारं कैवल्यं मोक्षं करोतीति कैवल्यकारः मोक्षासंख्यसौख्यदायकमिति । पुनः कथंभूतं ? सुकुलं सुष्ठु कुलं यस्य सुकुलस्तं । सुकुलोत्पन्नत्वात् । सुष्ठु कुलमस्माद्वा सुकुलस्तं । अत एव यो जनो जिनाधिपं नमति स नीचकुले नोत्पद्यते इत्याशयः । पुनः कथंभूतं (यं) ? कुलं कु कुत्सितं लुनात्यपहरतीति कुलस्तं असद्वस्तुखण्डनकारकं । पुनः कथंभूतं ? कुलं कौ पृथिव्यां ल इवेन्द्र इव यः स कुलस्तं जगन्नायकतया भूतले सुरेश्वरतुल्यं, समृद्धत्वात्तेजोरूपभराच्चेति । यथैकाक्षरनाममाला—"कुः पृथिव्यां समाख्यातः, कुशब्दः कुत्सितेऽपि च" इति ५

चन्द्रेन्दुकीर्तिं सुमनोमनोमनो–वाञ्छाप्रदं सद्विनयं नयंनयम् ।
ज्ञानस्वदाने धनदं नदं नदं, पार्श्वं भजेऽहं सकलं कलंकलम् ॥ ६ ॥

व्याख्या—पुनः कथंभूतं ? चन्द्रेन्दुकीर्तिं चन्द्रः कर्पूरः, इन्दुश्चन्द्रः, चन्द्रेन्दुवत् कपूरपूरचन्द्रवत् कीर्तिर्यशो यस्य स चन्द्रेन्दुकीर्तिस्तं । पुनः कथंभूतं ? सुमनोमनोमनोवाञ्छाप्रदं सुष्ठु मनो येषां ते सुमनसः सज्जनाः पण्डिता वा तेषां यानि मनांसि मानसानि सुमनोमनांसि तेषां या मनोवाञ्छा मनोरथास्ताः प्रददातीति सुमनोमनोमनोवाञ्छाप्रदस्तं । पुनः कथंभूतं ? नयनयं नयं नयाध्वानं नयति प्रापयति यः स नयनयस्तं नयमार्गप्रापकमित्यर्थः । अत्र बिन्दुच्युतिरपि । पुनः कथंभूतं ? ज्ञानस्वदाने धनदं ज्ञानं सर्वज्ञत्वं तद्रूपं स्वं द्रव्यं तस्य दानं वितरणं ज्ञानस्वदानं तस्मिन् ज्ञानधनदाने धनदं श्रीदसदृशं । पुनः कथंभूतं ? नदं नो ज्ञानं तं ददातीति नदस्तं नदं । यथैकाक्षरनाममाला—"नकारः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कीर्तितो ज्ञाने, निषेधेऽपि प्रकीर्तितः" इति । पुनः कथंभूतं ? नदं नो बुद्धिरर्थात् सद्बुद्धिस्तं ददातीति नदस्तं नदं । यथैकाक्षरनाममाला—"नो बुद्धौ ज्ञानबन्धयोः" इति । एवंविधं पार्श्वमहं सद्विनयं प्रवरविनयं यथा स्यात्तथा भजे इत्यादि प्राग्वत् ॥ ६ ॥

**एवं पार्श्वजिनेश्वरः सुयमकैर्भक्त्या प्रशस्तः स्तुतः,श्रीमच्छ्रीफलवर्द्धिराट् सुमनसामीशैः सतां वन्दितः। चारित्रोदयपादुपास्तिरसिकेन प्रातु सौख्यं मया,सद्वामात्मभवो हि विश्वशिवकन्दः सूरचन्द्रर्षिणा ॥ ७॥**

व्याख्या—पार्श्वजिनेश्वरः सतां सज्जनानां सौख्यं प्रातु ददातु । कथंभूतः पार्श्वजिनेश्वरः ? एवममुना प्रकारेण मया सू(रि)चन्द्रर्षिणा स्तुत ईडितः । कया ? भक्त्या । कैः स्तुतः ? सुयमकैः प्रधानयमकैः । पुनः कथंभूतः ? प्रशस्तः प्रधानतमः । पुनः कथंभूतः ? श्रीमच्छ्रीफलवर्द्धिराट् श्रीर्विद्यते यस्यां सा श्रीमती, श्रीमती चासौ श्रीफलवर्धिश्च श्रीमच्छ्रीफलवर्द्धिस्तस्यां राजते इति श्रीमच्छ्रीफलवर्द्धिराट् । पुनः कथंभूतः ? सुमनसामीशैः देवानामधिपैः सुरेश्वरैर्वन्दितः प्रणतः । पुनः कथंभूतः ? सद्वामात्मभवः सती प्रधाना या वामा तस्या आत्मा शरीरं तस्मिन् भवतीति तस्माद्भव उत्पत्तिर्यस्य स वा सद्वामात्मभवः वामाङ्गजात इत्यर्थः । पुनः कथंभूतः ? विश्वशिवकन्दः विश्वानि समस्तानि यानि शिवानि तेषां कन्द इव यः स विश्वशिवकन्दः समस्तशस्तमूलं इत्यर्थः । कथंभूतेन मया ? चारित्रोदयपादुपास्तिरसिकेन चारित्रोदयानां या पादुपास्तिः क्रमतामरससेवा तत्र रसो विद्यते यस्य स तेन । अत एव वाचनाचार्यश्रीचारित्रोदयपादपद्मसेवाकरणतत्परेणेति मया ॥ ७ ॥

॥ इतिश्रीफलवर्द्धिपार्श्वनाथस्तवः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# ।अथ पार्श्वनाथस्तवः ( वरसंवरसं )।

( सावचूरिः )

वरसंवरसंवरसं वरसं-भवदं भवदं भवदंभवदम् । सममासममासममासममा-गमभंगमभंगमभं गमभम्॥१॥

अवचूरिः—वरा प्रधाना संवरस्य देहस्य संवरस्य च वैराग्यस्य सा लक्ष्मीर्यस्य स तथा तं । पुनः किंभूतं जिनं । वरसंभवदं वाञ्छितसमुत्पत्तिदायकं । पुनः भवदं भवं संसारं द्यति खण्डयतीति तं । पुनः भवदंभवदं भवस्य जन्मनो यो दंभस्तं वदति निवेदयतीति तं । पुनः सममासं समेषु सज्जनेषु आनन्दकत्वात् मासं चन्द्रमसं, यद्वा समाः सदृशा मासा दिनानि वा यस्य स तथा तं । पुनः अमानां रोगाणामासः क्षेपो यत्र स तथा तं । पुनः अमं ज्ञानं तेन असमं असदृशं पुनः आगमे भंगा यस्य स तं । पुनः अभंगं नित्यं । पुनः अः कृष्णस्तद्वत् भा कान्तिर्यस्य स तं अभं । पुनः गम्यन्ते इति गमा नयविशेषास्तैर्भासत इति गमभस्तं ॥ १ ॥

दरमंदरमं दरमंदरमं, गतरंगतरंगतरं गतरम् ।गरसंगरसंगरसंगरसं,न वरं नवरं नवरं नवरम् ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—पुनः किंविशिष्टं जिनं पार्श्वं ? दर एव मन्दरो मेरुस्तं मिनाति मश्नातीति तथा तं । पुनः दरः ईषन्मन्देषु मूर्खेष्वपि दयावत्त्वात् अर्थात् प्रकटिता रमा लक्ष्मीर्येन स तं। पुनः गता रंगतरंगाः सांसारिकहर्षकल्लोला यस्य यस्माद्वा सः, अतिशयेन गतरंगतरंगः गतरंगतरंगतरस्तं। पुनः गतं शोभनगमनं तेन राजते इति गतरस्तं डप्रत्ययः। पुनः गरो विषं संगरस्य संग्रामस्य संगरः प्रतिज्ञा तयोः संगे रसो यस्य तथा तादृशं न कदापि। पुनः वरं प्रधानं। नवरं केवलं । नवनं नवः स्तुतिस्तेन राजते इति नवरस्तं। पुनः नवो नवीनो रः शब्दो रा दानं वा यस्य तथा तं, "रा दाने" इति वचनात् ॥२॥

रमुदारमुदारमुदारमुदा–समिनं समिनं समिनं समिनं ।
विदि तं विदितं विदितं विदितं, नमतेनमतेन मतेन मतेः ॥ ३ ॥

अव—भो भव्याः उदारमुदाऽद्भुतहर्षेण तं ईदृशं रं पुरुषं वीतरागं नमत यूयं। कीदृशं ? उदारं उद्गतं अरीणां समूह आरं यस्मात् स तं उदारं। पुनः कीदृशं ? उदारं उत्कृष्टं, यद्वा उद्गता आरा शस्त्री यस्मात्स उदारस्तं। पुनः० असमं असदृशं अर्थविज्ञानादि वस्तु विद्यते यत्र सः असमी तं असमिनं । पुनः समिनं उपशमवन्तं, शसयोरैक्यं। पुनः समिनं समाः सज्जनाः सेवकत्वाद्विद्यन्ते यस्य स समी तं। पुनः० सम्यक् इनं स्वामिनं समिनं। पुनः इनः सूर्यः तद्वत्, मतेन प्रकाशकत्वात् इष्टेन, मतेन शासनेन कृत्वा, विदि पण्डितलोके विदितं ख्यातं। पुनः विद् ज्ञानं तेन इतं प्राप्तं। पुनः विगतं दितं खण्डितं ज्ञानदर्शनादिवस्तु यस्मात्स तं। एतावता सर्वमपि शोभनं वस्तु पूर्णं लभ्यत इति। मतेः सकाशात् ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतनायत नायतनायत ना–नय मानयमानयमानय माः।
क्षणलक्षण लक्षणलक्षणल–क्ष रदक्षरदक्षरदक्षरद॥ ४ ॥

अव०—यतनया जीवकृपया आयत विस्तीर्ण। आयतनानि च, आयश्च, ता लक्ष्मीश्च, ता विद्यन्ते यत्र स तथा तस्य संबोधनं। ईदृशो नेति निषेधः। हे नानय! अन्यायरहित। मानश्च, यमा नियमाश्च, तान् मानयमान्। अयं च भाग्यं च। माः लक्ष्मीश्च। आनय। क्षणला उत्सवला क्षणा वेला यस्य स तस्य संबोधनं। लक्षणानि व्याकरणादिशास्त्राणि, लक्षणानि च शरीरचिह्नानि तेषां लक्षा विद्यन्ते यत्र स तथा तस्य संबोधनं। रदेभ्यः क्षरन्ति यानि अक्षराणि तेषु दक्षरेषु चतुरेषु नरेषु दा दानं यस्य स तस्य संबोधनम्॥ ४॥

प्रमदाप्रमदाप्रमदाप्रमदा–नकरानकरानकरानकरा (:)।
नवमानवमानव मानवमा, नसदान सदान सदान सदा॥ ५॥

अव०—प्रगतो मदो यस्मात्स प्रमदस्तत्संबुद्धौ। न विद्यते प्रमदासु स्त्रीषु प्रमदो हर्षो यस्य स तत्संबुद्धौ। अप्रमेषु बुद्धिरहितेषु नरेष्वपि दानं करोति तस्य संबुद्धौ न अकरः कान्तिरहितः अनकरः तत्संबुद्धौ। अकं दुःखं राति ददातीति अकरः, न अकरः अनकरः, तत्संबुद्धौ। अनकः निष्पापः रा द्रव्यं यस्य सः अनकराः तत्संबुद्धौ। नवमान् नवल-

१ उत्सवदायिनी इत्यर्थः.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्ष्मीकान्, तदनु अवमान् अधमांश्च । अव रक्ष । हे मानवमाः मानवेषु मनुष्येषु माश्चन्द्र इव तस्यामन्त्रणं । हे न सदान[1] सखण्डन । हे सदान दानगुणसहित । हे सदान सत् प्रधानं आनं निःश्वासो यस्य स तथा तस्यामन्त्रणं । सदा नित्यम् ॥५॥



तरसा तरसाऽतरसात रसा–दयनोदय नोऽदय नोदय नो ।
कदमं कदमंकदमंकदमं, विभवाविभवाविभवाविभ वा ॥ ६ ॥

अव०—तरसा वेगेन । तरसा बलेन । अतरं दुस्तरं सातं सुखं यस्य सः अतरसातः तत्संबुद्धौ । रसात्, नः अस्माकं, कदमं कुत्सितरोगं, नोदय दूरीकुरु । हे अयनोदय ! अयनं मार्गस्तस्य उदयो यस्मात् स तत्संबुद्धौ । पुनः हे अदय नो-न विद्यते दया यस्य तादृशो न, सदयेत्यर्थः। किंभूतं कदमं ? कं सुखं द्यति खण्डयति यत्तत् कदं । पुनःकिंभूतं ? अंके उत्सङ्गे समीपे दमनं दमो यस्य तत् । पुनः अङ्कं कलंकं ददाति यत्तत् अंकदं । हे विभो, आ सामस्त्येन, विभव वि, गतसंसार । हे अविभव निर्द्रव्य । वा पूरणे । अविभ विगता भा कान्तिर्यस्य सः, न विभः अविभः तस्य संबोधनम् ॥६॥

इति पार्श्वजिनेश्वर ते स्तवनं, रचितं खचितं यमकैः सुघनम् ।
परिरञ्जितदक्षनरप्रकरं, कुरुतां शिवसुन्दरसौख्यभरम् ॥ ७ ॥

अव०—सुगमम् ॥ ७ ॥ ॥ इति यमकबद्धश्रीपार्श्वनाथस्तवः ॥



१ दानं खंडं तेन सह वर्तमानः सदानः अर्थात् ज्ञानादिखंडवान्, तादृशो न, संपूर्णज्ञानादियुक्त इत्यर्थः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# ॥ अथ श्रीपार्श्वलघुस्तवः ॥

( सावचूरिः )

लक्ष्मीनिदानं गुरुकर्मदानं, सद्धर्मदानं जगते ददानम् ।
यक्षेशपार्श्वाङ्कितपादपार्श्वं, नुवामि पार्श्वं भवभेदपार्श्वम् ॥ १ ॥

अवचूरिः—अहं पार्श्वं नुवामि स्तौमि । कीदृशं पार्श्वं ? लक्ष्मीर्मुक्तिरूपा तस्य निदानं कारणं । पुनः कीदृशं ? गुरूणि महान्ति कर्माणि अष्टसंख्यानि तेषां दानं छेदनं अस्ति यस्य स तं । पुनः कीदृशं ? जगते त्रैलोक्याय सत् समीचीनं धर्मदानं ददानं प्रयच्छन्तं । पुनः कीदृशं ? यक्षेशश्चासौ पार्श्वश्च यक्षेशपार्श्वस्तेनाङ्कितं चिह्नितं पादपार्श्वं चरणाभ्याशभागो यस्य तं । पुनः०भवस्य संसारस्य भेदो भेदनं तत्र पार्श्वमिव पार्श्वं पर्शुसमूहतुल्यमित्यर्थः । नुवामीति तौदादिकात् "णु स्तवे" इत्यस्माल्लट् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्मेरातसीसूनसमप्रभा वा–समप्रभावा भवदीयमूर्तिः।
विभाति वामाप्रभव ! त्रिलोके–ऽभव त्रिलोकेनसमर्च्यपाद॥ २॥

अव—हे वामाप्रभव! वामायाः प्रभव उत्पत्तिर्यस्य तदामन्त्रणं। पुनः हे अभव! न विद्यते भवः संसारापत्तिर्यस्य तदामन्त्रणं हे मुक्ता(ना)दिविभाव। पुनर्हे त्रिलोकेनसमर्च्यपाद! तृतीयो लोकस्त्रिलोकः,पूरणप्रत्ययोऽत्र वृत्तौ गतार्थत्वान्न युज्यते। त्रिलोकस्य लोकत्रयापेक्षया स्वर्गस्य इनः स्वामी इन्द्रः तेन तस्य वा समर्च्यौ पादौ यस्य तदामन्त्रणं। हे पार्श्व-देव!। भवदीयमूर्तिः कर्त्री। त्रिलोके विभाति शोभते इत्यन्वयः। त्रिसंख्यो लोकः "शाकपार्थिवादिः"। त्रयाणां लोकानां समाहार इति द्विगौ तु ईब्भावो दुर्वारः स्यात्। कीदृशी भवदीयमूर्तिः ? स्मेराणि विकसितानि यानि अतसीसूनानि उमापुष्पाणि तैः समा तुल्या प्रभा कान्तिर्यस्याः सा विनीलवर्णत्वादित्यर्थः। अतसीशब्देन लोकभाषया "अलसी" इत्युच्यते। पुनः कीदृशी ? असम उत्कृष्टः प्रभावो यस्याः सा, यत्स्मरणेन स्वर्गादिप्राप्ते(प्ति)रिति भावः। असमेति वाश-ब्दात् परोऽकारश्लेषो बोध्यः। वाशब्दो निश्चये पादपूरणे वा, निपातानामनेकार्थत्वात्॥ २॥

तवेश पादाम्बुजमादरेण, हृद्यादधाना जनता दरेण।
मुक्ता भवेदेकपदेऽपराया, निर्वेशवन् सौख्यपरंपरायाः॥ ३॥ 

१ पात्रादिवर्जितोऽदन्तोत्तरपदेति न काऽपि शङ्कापङ्काविलता तथा, त्र्यवयवो वा लोकस्त्रिलोकः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—हे ईश! हे नाथ!। हे सौख्यपरंपरायाः सुखसन्ततेः निर्वेशवन् निर्वेश उपभोगोऽस्यास्तीति तद्वन्। कीदृश्या-सौख्यपरंपरायाः ? अपराया न विद्यते परा प्रकृष्टा यस्याः सा तस्या महत्या इत्यर्थः। हे पार्श्वदेव। जनता जनसमूहः। तव पादाम्बुजं आदरेण हृदि चित्ते आदधाना बिभ्राणा सती। दरेण भवाब्धिभ्रमणजनितभयेन। एकपदे सहसा मुक्ता भवेत् विरहिता स्यादित्यन्वयः। एतेन भगवच्चरणारविन्दयोर्जगति प्राशस्त्यं प्रपूजनीयत्वं चोक्तं। एक-पदे इत्यव्ययं अकस्मादर्थे ॥ ३ ॥

निःशेषभूवर्षितदानवारि, यन्मानसे त्वं भ्रियसे सदैव।
स एव गव्युत्तमदानवारि–प्रोच्चारितोद्दामयशाः सदैवः ॥ ४ ॥

अव०—संबोधनमध्याहार्यं। हे पार्श्वदेव। यस्य पुरुषस्य मानसे त्वं सदैव निरन्तरं भ्रियसे तिष्ठसि, स एव पुमान् गवि पृथिव्यां सदैवो भाग्यवान्। अहमेवं तर्कयामीति शेषः। सह दैवेन भाग्येन वर्तत इति सदैवः। कीदृशस्त्वं ? निःशेषभुवि समग्रभूमौ वर्षितं दानमेव वारि जलं येन सः, येन व्रतग्रहावसरेऽखिला भूमिरभीष्टदानप्रदानेन संतोषिते-त्यर्थः। कीदृशः स पुमान् ? उत्तमा ये दानवारयो देवास्तैः प्रोच्चारितं प्रकटीकृतं उद्दाममुत्कटं यशो यस्य सः। भ्रियसे इति "धृङ् अवस्थाने" अस्मात्तौदादिकात् कर्तरि लट् ॥ ४ ॥

देवाधिदेवाधिहरस्त्वमेव, सुज्ञान सुज्ञानभिबुद्धरूपः।
सारांगसारांग वितीर्णभूयः–कल्याण कल्याणकृदङ्गभाजाम् ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—अङ्गेति संबोधने हे देवाधिदेव ! त्वं अङ्गभाजां प्राणिनां । आधिहरः आधिं मनसः पीडां हरतीति आधिहरः । असीति शेषः । पुनः हे सुज्ञान ! सुष्ठु शोभनं ज्ञानं यस्य तत्संबुद्धौ । त्वं सुज्ञानभिबुद्धरूपोऽसि सुज्ञैर्विशेषज्ञैरपि अनभिबुद्धमज्ञातं रूपं स्वरूपं यस्य सः । पुनः हे साराङ्गसार! सारं ज्ञानं विद्यते येषु तानि साराणि "मत्वर्थे अः" तानि अङ्गानि येषां ते साराङ्गास्तेषु सारः प्रवरः तत्संबुद्धौ, यद्वा साराणि श्रेष्ठानि अङ्गानि येषामिति समासः । पुनः हे वितीर्णभूयःकल्याण! वितीर्णं दत्तं भूयः प्रचुरं कल्याणं स्वर्णादिद्रव्यं येन स याचकेभ्य इति शेषः, तत्संबुद्धौ। त्वमेवाङ्गभाजां कल्याणकृत् शिवंकरोऽसि । एतेन भगवतः सर्वोत्कृष्टत्वं सूचितम् ॥ ५ ॥

**यैरर्च्यसे त्वं वरवैद्यराज!, मनोऽभिरामैः सुमनोभिरामैः ।**
**कर्माभिधैरुज्झितभूघनास्ते, विसारिलोकेश! विसारिलोके ॥६॥**

अव०—हे वरवैद्यराज रागद्वेषाद्यन्तरोपतापक्षयंकरत्वादित्युक्तिः। पुनर्हे विसारिलोकेश! विशिष्टः सारो बलं अस्त्यस्येति विसारी, 'अस्त्यर्थे इन्,' लोकस्येशः लोकेशः, विसारी चासौ लोकेशश्च विसारिलोकेशस्तत्संबुद्धौ । हे पार्श्वदेव सुमनोभिः शोभनमानसैः,अत एव मनोऽभिरामैः सर्वजनमनोवल्लभैरित्यर्थः। एवंभूतैर्यैः प्राणिभिस्त्वमर्च्यसे। ते प्राणिनः। अस्मिन् विसारिणि विस्तारवति लोके संसारे । कर्माभिधैः आमैः कर्मरूपै रोगैः । उज्झितभूघनाः त्यक्तदेहा भवन्तीति शेषः, कर्म अभिधा नामधेयं येषां ते तैः । अर्च्यसे इति कर्मणि लट् ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थं ते जिनपुङ्गवस्य भगवन् प्रोद्दामधामान्वितं, पादाब्जं परभागभृत्रिभुवनस्तुत्यं स्तुवन्तोऽनिशम् ।
दक्षं कर्मविपक्षपक्षदलने भव्या भवन्तु क्षमाः, कल्याणाश्रय मुक्तिमाप्तुमखिलं तीर्त्वा भवाम्भोनिधिम् ॥७॥

अव०—हे भगवन् । पुनः हे कल्याणाश्रय ! हे पार्श्वदेव ! भव्या मुक्तिमपवर्गं आप्तुं प्राप्तुं क्षमाः समर्था भवन्तु । किं कृत्वा ? अखिलं भवाम्भोनिधिं तीर्त्वा । भव्याः किं कुर्वन्तः ? इत्थममुना प्रकारेण ते तव जिनपुङ्गवस्य जिनेन्द्रस्य पादाब्जं चरणारविन्दं अनिशं निरन्तरं स्तुवन्तः । कीदृशं पादाब्जं ? प्रोद्दामधामान्वितं प्रकृष्टतेजोयुक्तं । पुनः कीदृशं ? परभागभृत् गुणोत्कर्षधारकं । पुनः०त्रिभुवनस्य स्तुत्यं स्तवनार्हं । पुनः दुष्कर्मशत्रुवर्गविनाशने दक्षं चतुरम् ॥ ७ ॥

॥ इति श्रीपार्श्वलघुस्तवावचूरिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ

# ॥ अथ श्रीशङ्खेश्वरस्तवः ॥

( सावचूरिः )

यस्य ज्ञानदयासिन्धो-र्दर्शनं श्रेयसे ध्रुवम् । स श्रीमान् पार्श्वतीर्थेशो, निषेव्यः सततं सताम् ॥ १ ॥

टीका—ज्ञानस्य दयायाश्च सिन्धोः समुद्रस्य । ( यस्य ) पार्श्वदेवस्य । दर्शनं ध्रुवं निश्चितं श्रेयसे भवति प्राणिनामिति शेषः । स श्रीमान् पार्श्वश्चासौ तीर्थेशश्च पार्श्वतीर्थेशः । सतां प्राणिनां सततं निरन्तरं निषेव्यः सेवनीयोऽस्ति । "कृत्यानाम् ( कृत्यस्य वा २-२-८८ )" इत्यनेन कर्तरि षष्ठी ॥ १ ॥

वामासूनोर्यशःपुञ्जै-रगाधस्यानघा गुणाः । स्मर्यन्ते येन स स्मार्यो, भवेत्प्राचीनबर्हिषाम् ॥ २ ॥

टीका—यशःपुञ्जैः कीर्तिसमूहैः अगाधस्यानन्तस्य वामासूनोः श्रीपार्श्वस्य अनघा निर्मला गुणाः येन प्राणिना स्मर्यन्ते । स प्राणी प्राचीनबर्हिषां चतुःषष्टिशक्राणामपि स्मार्यो ध्येयो भवेत् ॥ २ ॥



विहाय विषयासक्तान्, सांसारिकसुरासुरान् । सेव्यतामक्षयो धीराः, पार्श्वदेवोऽपरप्रभुः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टीका—पञ्चेन्द्रियाणां विषयेषु आसक्तान्मग्नान् । संसारे भवा सांसारिकाः, ते च ते सुरासुराश्च तान् अप्राप्तपञ्चमगतिकानित्यर्थः । विहाय त्यक्त्वा । भो धीरा भो भव्याः! । अक्षयः न विद्यते क्षयो यस्य सः । अत एव अपरः-न विद्यते परः प्रकृष्टो यस्मात्सः । पार्श्वदेवः प्रभुः सेव्यतांम् ॥ ३ ॥

जिताः सर्वार्थदानेन, येन कल्पद्रुमा अपि । भवेदभ्यर्चितो लोके, स श्रिये चामृताय च ॥ ४ ॥

टीका—येन भगवता भविकेभ्यः सर्वार्थदानेन कल्पद्रुमा अपि जिताः पश्चात्कृताः । सर्वेषामर्थानामिष्टानां दानं तेन हेतुना । इहत्यसुखहेतुत्वात् कल्पवृक्षा इष्टार्थदाः, अयं चेह लोके परत्र च सौख्यहेतुरस्ति, अतः सर्वार्थदायकः । तेन एते जिता एवेति भावः । स पार्श्वः अभ्यर्चितः सन् लोके श्रिये इह भवे लक्ष्म्यै कीर्त्यै च भवेत् । अमृताय च परभवे मुक्तये भवेत् ॥ ४ ॥

संस्तुतो मधुरश्लोकै-र्जैनलाभप्रदायकः । कल्याणकारको भूया-च्छ्रीमान् शं(मच्छं) खेश्वरप्रभुः ॥५॥

टीका—मधुरश्लोकैर्मनोज्ञयशोभिः संस्तुतः परिचितः प्रसिद्ध इतियावत् । तथा मधुरश्लोकैर्मनोज्ञपद्यैः संस्तुतः पुनः। जैनलाभप्रदायकः जैनानां जिनधर्मिणां जैनेभ्यो(वा)बोधलाभः तं प्रददातीति जैनलाभप्रदायकः । श्रीमान् शङ्खेश्वरप्रभुः कल्याणकारको भूयात् । देहिनामिति शेषः ॥ ५ ॥

॥ इति श्रीशङ्खेश्वरप्रभोः स्तवः सावचूरिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ

# ॥ विहरमाणविंशतिजिनस्तवः ॥

( सावचूरिः )

श्रीवीतरागाय नमः ॥

सीमंधराधीश महाविदेह-क्षोणीवतंसः सुमहा विदेह ।
भवान् भवत्ताविष वै नतेऽय-श्रीदोऽस्तु मे रुग्विषवैनतेय ॥ १ ॥

अवचूरिः—हे श्रीसीमन्धरजिन! भवान् मे मम । अयश्रीदो भाग्यलक्ष्मीप्रदोऽस्तु भवतु। भवान् कथंभूतः? महाविदेहभूमिमुकुटः। पुनः किंविशिष्टः? सुमहाः शोभनं महस्तेजो यस्य सः। हे विदेह विशिष्टो देहः शरीरं यस्य स तस्य संबोधनं। हे भवत्ताविष! भवन् जायमानस्ताविषः स्वर्गो यस्मात्स तस्यामन्त्रणं। वै निश्चितं । कस्मिन्? नते जने। रुग् रोगः स एव विषं तस्मिन् वैनतेयः गरुडः॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युगन्धर त्वं परमां प्रदेहि-काम्यां मम ब्रह्मरमां प्रदेहि ।
दुरन्तदुष्कर्मभवाधिकार–स्करावलीभो विभवाधिकार ॥ २ ॥

अव०—हे युगन्धर! त्वं परमां प्रकृष्टां ब्रह्मरमां मोक्षलक्ष्मीं मम प्रदेहि वितर। ब्रह्मरमां कथंभूतां ? प्रकर्षेण देहिभिर्जन्तुभिः काम्यां स्पृहणीयां। त्वं कथंभूतः ? दुरन्तानि च तानि कर्माणि च तेभ्यो भवा उत्पन्ना याऽऽधिर्मानसी पीडा सैव कारस्करावली वृक्षावली तस्यामिभो गजः समूलमुन्मूलनकारित्वात् । विगता भवस्य संसारस्याधिकारा व्यापारा यस्मात्स तस्य संबोधनम् ॥ २ ॥

श्रीबाहुनेतस्तनुतां भवस्य, दुष्कर्मबन्धात्तनुतां भवस्य ।
भवान्नतस्यासुमतोऽसमान-गुणावले सत्सुमतोऽसमान॥ ३ ॥

अव०—श्रीबाहुनेतः भवान्। नतस्य असुमतः प्राणिनः। दुष्कर्मबन्धात् भवस्य जातस्य। भवस्य संसारस्य । तनुतां तुच्छतां। तनुतां कुरुतामिति संबन्धः। त्वं कथंभूतः ? सतां सुष्ठु अतिशयेन मतोऽभीष्टः । सह मानेनाहङ्कारेण वर्तते यः स समानः, न समानोऽसमानस्तस्य संबोधनम् ( असमानाऽसाधारणा गुणावली यस्य तस्य संबुद्धौ इति ) ॥ ३ ॥

सुबाहुतीर्थेश नवारिदाव-नीरर्द्धिवल्लीवनवारिदाव ।
भवोदपाने पततो मम त्वं, नुदन्नतालीकृततो ममत्वम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अव०—हे सुबाहुजिनेश त्वं! भवोदपाने संसारकूपे पततो मम अव रक्ष। हे नवारिदावनीर! नवाः प्रत्यग्रा येऽरयो रागादिरिपवस्त एव संतापकारित्वाद्दावो दावानलस्तस्मिन्नीर उपशमविधायकत्वात्। हे समृद्धिवल्लीवनपल्लवनमेघ। त्वं किं कुर्वन्? नुदन् क्षिपन्। किं? ममत्वं ममी (म) कारभावं। त्वं कथंभूतः? नतालेः कृता ता लक्ष्मीर्येन सः ॥४॥

हे पोत! संसारमहोदधाव–भितो हि ते सारमहो दधाव।
देयाः शिवं वः (नः) स सुजात रूप–स्मराङ्गकान्त्यस्तसुजातरूप ॥ ५ ॥

अव०—हे श्रीसुजातजिन! स त्वं वो युष्माकं (नोऽस्माकं) शिवं मोक्षं देयाः। यस्य ते तव सारमहः प्रधानतेजः हि निश्चितं अभितः समन्ततो दधाव प्रससारेति संटंकः। हे रूपस्मर! अङ्गकान्त्याऽस्तं सुष्ठु शोभनं जातरूपं सुवर्णं येन स तस्यामन्त्रणम् ॥ ५ ॥

दुःखं जिनेशापनयस्व कान्त–द्युसत्कृतोद्यद्विनय स्वकान्त।
स्वयंप्रभ त्वं विनमज्जनानां, कृतक्षमाजीवनमज्जनानाम् ॥ ६ ॥

अव०—हे स्वयंप्रभ! त्वं विनमज्जनानां दुःखमपनयस्व निराकुरु। कान्ताः प्रधाना ये द्युसदो देवास्तैः कृतो विहित उद्यद्विनयो यस्य स तस्य संबोधनं। हे स्वकान्त! न विद्यते कान्ता यस्य सोऽकान्तः, सुष्ठु अतिशयेन मनोवाक्कायैः अकान्तः। कथंभूतानां विनमज्जनानां? क्षमा क्षान्तिः सैव शीतलत्वाज्जीवनं जलं तत्र कृतं मज्जनं स्नानं यैस्तेषाम् ॥६॥ ॥ ९० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमोऽस्तु ते श्रीऋषभाननाय–प्रदाय शश्वद्वृषभाननाय ।
सुरासुरेन्द्रैर्महिताय कामं, विनिघ्नते विश्वहिताय कामम् ॥ ७ ॥

अव०—हे श्रीऋषभानन! ते तुभ्यं नमोऽस्तु । ते कथंभूताय? वृषभाननाय "वृषो गव्याखुधर्मयोः श्रेष्ठे स्यात्" इत्याद्यनेकार्थवचनात् वृषा श्रेष्ठा भा कान्तिर्यस्य तत् वृषभं, वृषभमाननं मुखं यस्य स तस्मै । ते किं कुर्वते? विनिघ्नते हिंसते । कं? कामं मारं । काममत्यर्थम् ॥ ७ ॥

अनन्तवीर्यो वरराजितोय–वर्षे घनः संवरराजितो यः ।
तनोतु संसृत्युदयासमुद्रः, श्रेयो जिनो वः स दयासमुद्रः ॥ ८ ॥

अव०—स जिनो वो युष्माकं श्रेयः कल्याणं तनोतु । योऽनन्तवीर्यनामाऽर्हन् वरा वाञ्छितार्थलाभास्तेषां राजिः श्रेणिः सैव तोयं नीरं तस्य वर्षे-वर्षणे घनो मेघसदृशोऽस्ति । संवर आश्रवद्वारनिरोधरूपस्तेन राजितः शोभितः । पुनः कथंभूतः? संसृतिः संसारस्तस्या उदयमस्यन्ति क्षिपन्तीति संसृत्युदयासा अर्था द्रव्या (जीवा) स्तेषां मुदं हर्षं राति ददाति यः स संसृत्युदयासमुद्रः । दया कृपा तस्याः सागरः ॥ ८ ॥

सूरप्रभाधीश्वर मा मुदारा–न्नतं दद्च्छैवरमामुदाराम् ।
रक्षाक्षयज्ञानतमोहरागः–सारङ्गसिंहो गतमोहरागः ॥ ९ ॥

प्र० १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अव०—हे सूरप्रभाधीश्वर! त्वं मुदा हर्षेण नतं मा मां आरात् अरीणां समूहात् रक्ष। त्वं किं कुर्वन्? ददत्। का? शैवरमां सिद्धिश्रियं। उदारां महतीं। अक्षयज्ञानेन तमोऽज्ञानं हरतीति स तस्य संबोधनं। यद्वा हे अक्षयज्ञान! तमोहरेति (च) पृथक् संबोधनद्वयं। त्वं कथंभूतः? आगोऽपराधः स एव सारङ्गो मृगस्तस्मिन् सिंहः, नाशकारित्वात्। गतौ मोहरागौ यस्मात्सः ॥ ९ ॥

विशाल! तायिन् सनय स्वराम—भेदिन् प्रबोधं जनयस्व राम ।
स्थैर्यास्तभूभृद्धरमेरुजन्तु-हितस्तमोजा हर मे रुजं तु ॥ १० ॥

अव०—हे श्रीविशाल! जिन। हे तायिन् रक्षक। सह नयैर्वर्तते यः स सनयस्तस्यामन्त्रणं। स्वरेण कृत्वाऽमान् रोगान् भिनत्तीति स तस्यामन्त्रणं। प्रकृष्टं बोधं ज्ञानं। जनयस्व कुरुष्व। तथा हे राम प्रधान। त्वं कथंभूतः? स्थैर्येणास्तः पराभूतो भूभृद्धरो मेरुर्येन, जन्तूनां वत्सलो जन्तुहितः, ततः स्थैर्यास्तभूभृद्धरमेरुश्चासौ जन्तुहितश्चेति विशेषणसमासः (कर्मधारयः)। तु पुनर्मे मम तमोजां कर्मभवां रुजं रोगं हर ॥ १० ॥

आज्ञां वरां मूर्ध्नि वहेम धाम—नीराग यत्ते नवहेमधामन् ।
मानद्विपे वज्रधराङ्गजारे—र्नोऽव श्रिताश्चित्तधरां गजारे ॥ ११ ॥

अव०—(हे वज्रधर! प्रभो) यस्मात्ते तवाज्ञां मूर्ध्नि वयं वहेम धरामः। यत्तदोर्नित्याभिसंबन्धात्तस्मादिति गृह्यते।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः कारणान्नोऽस्मान् । अङ्गजारेः कामशत्रोः अव रक्षेति संबन्धः । हे धामनीराग ! गृहनिरीह । नवं सद्यस्कं यद्धेम सुवर्णं तद्वत् धाम कान्तिर्यस्य तस्यामन्त्रणं। हे गजारे सिंह। कस्मिन् ? मानद्विपेऽहङ्कारकरिणि । अङ्गजारेः किंविशिष्टात् ? श्रितात् । कां ? चित्तधरां स्वान्तभूमिम् ॥ ११ ॥

भव्यास्तलोभाशममानमार, चन्द्राननार्हन्तममानमार ।
श्रये जिनाधीश! सुधामनोज्ञ–वाचं भवन्तं वसुधामनोज्ञ॥ १२ ॥

अव०—हे चन्द्रानन! भवन्तमहं श्रये सेवे । भव्यानामस्ता लोभक्रोधाहङ्कारकामा येन स तस्य संबोधनं । न विद्यते मानं प्रमाणं यस्याः साऽमाना, सा चासौ मा च लक्ष्मीस्तां राति ददातीति स तस्यामन्त्रणम् ॥ १२ ॥

दूरीचरीकर्ति तमःसमूहं, यद्वाक्चयो वर्यतमः समूहः ।
श्रीवज्रबाहोः कमलाशयस्य, तस्य क्रमौ नौम्यमलाशयस्य॥ १३ ॥

अव०—तस्य श्रीवज्रबाहोः क्रमौ चरणौ अहं नौमि स्तौमि । यद्वाक्चयः तमःसमूहमज्ञानपूरं दूरीचरीकर्ति । सं सामस्त्येन ऊहा वितर्का यस्मिन् । पुनः कथंभूतः अत्यर्थं वर्यो वर्यतमः । तस्य कथंभूतस्य ? लक्ष्मीस्थानस्य । अमल आशयश्चित्तं यस्य तस्य ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुजङ्गभर्तर्भवतोयदस्य, भिद्युग्रवायो भवतोऽयदस्य ।
वचश्चयः श्रीजिनराज पाता–न्मां दुर्गतेर्नम्रनराज पातात् ॥ १४ ॥

अव०—श्रीभुजङ्गस्वामिन् भवतो वाक्चयो मां दुर्गतेः पातात् पतनात् पातात् रक्षतात् । हे (उग्र) वायो समीर । कस्यां ? भिदि । कस्य ? भवतोयदस्य संसारघनस्य । भवतः कथंभूतस्य ? अयदस्य भाग्यप्रदस्य । हे नम्रनर । हे अज ! न जायत इत्यजः ॥ १४ ॥

व्रतं दधौ यः शुभरं विहायः, सदार्चितो भोगभरं विहाय ।
तमीश्वरं तीर्थकरं नु वाम, पञ्चेषुपंकोष्णकरं नुवामः ॥ १५ ॥

अव०—यो भोगभरं विहाय त्यक्त्वा शुभरं कल्याणदं व्रतं संयमं दधौ धृतवान्, तमीश्वरनामानं तीर्थङ्करं नुवामः स्तुवीमः । यः कथंभूतः ? विहायःसदो देवास्तैरर्चितः पूजितः । नु इति वितर्के स्तवनशक्तिसद्भावालोचनस्वरूपे । तं कथंभूतं ? वामः प्रतिकूलो यः पञ्चेषुः कामः स एव पङ्कः कर्दमः तस्मिन् उष्णकरं सूर्यं, शोषकत्वात् ॥१५॥

नमन्नरामर्त्यसभाजनाय, माध्यस्थ्यचञ्चद्रसभाजनाय ।
नेमिप्रभाधीश्वर ! तेऽस्तु तारं, नमो बुधैर्धर्मरते स्तुतारम् ॥ १६ ॥

अव०—हे श्रीनेमिप्रभ ! ते तुभ्यं तारं रुचिरं नमोऽस्तु । ते कथंभूताय ? नराश्च मनुष्या अमर्त्याश्च देवास्तेषां सभाः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्षदस्तासां जनाः, नमन्तो नरामर्त्यसभाजना यस्मै तस्मै। पुनः कथंभूताय? समतावररसपात्राय। हे धर्मरते! पुण्यरुचे। हे स्तुत। कैः? बुधैः। अरमत्यर्थम्॥ १६॥

श्रीवीरसेनं जितमोहसेनं, मुक्तं सदा मानतमोहसेन।
स्तुवन्नरः स्याद्दमदं तु दंत-पंक्त्या सुखी पुष्पमदं तुदन्तम्॥ १७॥

अव०—श्रीवीरसेनं जिनं स्तुवन् नरः सुखी स्यादिति। जिनं कथंभूतं? जिता मोहसेना येन स तं। सदा मुक्तं। केन? अहङ्काराज्ञानहास्येन। दम इन्द्रियनोइन्द्रियजयरूपस्तं ददातीति दमदं। श्रीवीरसेनं किं कुर्वन्तं? तुदन्तं व्यथमानं। कं? पुष्पाणां कुसुमानां मदं गर्वं, कया? दन्तपङ्क्त्या। तुर्विशेषणसमुच्चये॥ १७॥

मम प्रदेया वृजिनाधिराज-रवे महाभद्र! जिनाधिराज।
भवभ्रमोत्थश्रमहामहीन-कीर्ते मतिं नम्रमहामहीन॥ १८॥

अव०—हे महाभद्र! जिनेश त्वं मम भवभ्रमोत्थश्रमहां संसारपरिभ्रमणसमुत्पन्नक्लमापहां। मतिं बुद्धिं। प्रदेयाः प्रवितर। वृजिनं पापं, आधिर्मानसी पीडा, ते एव राजा चन्द्रस्तस्मिन् रवे सूर्य, निष्प्रभावत्वविधायकत्वात्। अहीन शेषनागराजस्तद्वन्निर्मला कीर्तिर्यस्य स तस्यामन्त्रणम्॥ १८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दद्यान्मुदं देवयशा हिमानी–हंसावलिश्वेतयशा हि मानी।
कैवल्यलक्ष्मीसदनं तरङ्ग–रङ्गद्गुणालीसदनन्तरङ्गः ॥ १९ ॥

अव०—श्रीदेवयशा जिनो मुदं प्रीतिं दद्यात्। महद्धिमं हिमानी, शेषं स्पष्टं। हि निश्चितं। मानः पूजा बोधो वाऽस्यास्तीति मानी। तरङ्गवद्रङ्गन्ती या गुणाली तस्यां सन् विद्यमानोऽनन्तोऽपर्यन्तो रागो यस्य सः ॥ १९ ॥

यं पाददीप्त्या सुरराज राजी–वास्यं नमन्ती सुरराजराजी।
तन्यान्मतं मेऽजितवीर्यपार--गतः स दक्षागतवीर्यपारः॥ २० ॥

अव—यं राजीवास्यं कमलमुखं नमन्ती नमस्कुर्वन्ती सुरराजराजी इन्द्रश्रेणी सुरराज अतिशयेन शोभितवती, सोऽजितवीर्याभिधः पारगतः सर्वज्ञो मे मतमभीष्टं तन्यात् क्रियात्। स कथंभूतः ? दक्षैर्विशारदैः "सर्वे गत्यर्था ज्ञानार्थाः" इति वचनादगतोऽज्ञातो वीर्यपारो बलपर्यन्तो यस्य सः ॥ २० ॥

श्रेयस्करः श्रीऋषभः सदा नः, सोऽस्तु क्षमाधूर्वृषभः सदानः।
जवेन कर्ता नमदङ्गिराय–श्छिनत्ति पीयूषमदं गिरा यः ॥ २१ ॥

अव०— स ऋषभो नोऽस्माकं श्रेयस्करोऽस्तु। कथंभूतः ? क्षमा क्षान्तिः सैव धूर्धुरा तस्यां वृषभः। सह दानेन



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानादिदानेन वर्तते यः सः। यो गिरा वाण्या माधुर्यादिगुणातिशयतः पीयूषमदं अमृतगर्वं छिनत्ति। नमन्तश्च तेऽङ्गिनश्च तेषां रा द्रव्यं तस्याः कर्ता ॥ २१ ॥

श्रीवर्धमानेशमलोभवन्तं, यः स्तौति भक्त्या विमलो भवन्तम्।
सङ्गं शिवश्रीस्तरसा न तस्य, चिकीर्षते सा न रसानतस्य ॥ २२ ॥

अव०—हे श्रीवर्धमान! भवन्तं यो भक्त्या विमलः सन् स्तौति, तस्य जनस्य सङ्गं संयोगं सा जगत्प्रसिद्धा शिवश्रीर्निर्वाणकमला न न चिकीर्षते इति, कोऽर्थः? चिकीर्षत एव "द्वौ नञौ प्रकृत्यर्थं गमयतः" इतिवचनात्। भवन्तं कथंभूतं? ईशं स्वामिनं। पुनः कथंभूतं? न विद्यते लोभो यस्य स तं तथा। तरसा जवेन। तस्य कथंभूतस्य? पृथ्वीस्थजननतस्य ॥ २२ ॥

श्रीवारिषेणं तरसा परागं, भव्यव्रजत्राणरसापरागम्।
नमामि कीर्त्यस्तहरं नदीनं, गाम्भीर्यतो मोहहरं नदीनम् ॥ २३ ॥

अव०—तरसा बलेन परागं प्रकृष्टपर्वतं मेरुमित्यर्थः। भव्यव्रजत्राणे रसोऽभिलाषो यस्य, अपगतो रागो यस्मात्, ततो भव्यव्रजत्राणरसश्चासौ अपरागश्चेति विशेषणसमासः (कर्मधारयः) तं। कीर्त्याऽस्तो हर ईश्वरो येन स तं। नदीनं समुद्रं। कस्मात्? गाम्भीर्यतो गम्भीरतागुणेन ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गङ्गेव तापं जलतासु गौरा–च्छिनत्ति यस्यावनतासु गौरा।
चन्द्राननोऽसौ धृतिलो ममाल–मस्तु श्रियेऽस्तप्रतिलोममालः ॥ २४ ॥

अव०—यस्य गौर्वाणी गङ्गेव जनतासु जनसमूहेषु तापं संसाराटवीपर्यटनसंभवं आच्छिनत्ति, स चन्द्राननो मम श्रियेऽलमत्यर्थमस्तु। गौः कथंभूता? गौरा निर्मला। चन्द्राननः कथंभूतः? धृतिं संतोषं लातीति धृतिलः। अस्ता निराकृता प्रतिलोमानां प्रतिकूलानां कामारीणां माला श्रेणिर्येन सः ॥ २४ ॥

कृतं यतीनां गुरुणा कृतान्तं, भवस्य नोनोम्युरुणा कृतान्तम्।
कुवादिवीथीविपदाधिरोहं, प्रजाभवत्सिद्धिपदाधिरोहम् ॥ २५ ॥

अव०—यतीनां गुरुणा तीर्थकृता कृतं कृतान्तं सिद्धान्तं अहं नोनोमि भृशं स्तौमि। कृतोऽन्तो विनाशो येन। कस्य? भवस्य। गुरुणा किंविशिष्टेन? उरुणा चतुस्त्रिंशदतिशयादिश्रिया महता। कुत्सिता वादिनः कुवादिनस्तेषां वीथी श्रेणिस्तस्याः तच्चिन्तितकुवितर्कविफलीकरणात् विपदश्च आधयश्च तान् रान्तीति कुवादिवीथीविपदाधिराः (ईदृशाः) ऊहा वितर्का यस्मिंस्तं। प्रजाया लोकस्य भवन् जायमानः सिद्धिपदेऽधिरोहो यस्मात्तम् ॥ २५ ॥



रतिं जिना मे सकलाः क्रियासु, शस्यासु शश्वत्सकलाः क्रियासुः।
दिवाकरामानतनुप्रभा वाः–पवित्रवाक्या अतनुप्रभावाः ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अव०—सकलाः समस्ता जिना मे मम शस्यासु प्रधानासु क्रियासु कर्तव्येषु । शश्वन्नित्यं रतिं रुचिं क्रियासुर्विधेयासुः । सह कलाभिर्वर्तन्ते ये ते सकलाः । दिवाकरः सूर्यस्तद्वदमानाऽप्रमाणा तनुप्रभा शरीररोचिर्येषां । तथा वाः पानीयं तद्वत्पवित्रं वाक्यं वचनं येषां । अतनुर्महान् प्रभावो महिमा येषां ते ॥ २६ ॥

प्रह्वाशया शासनभासनाया-र्हतां यशःपूर्णनभाः सना या ।
गीर्देवताढ्या प्रवरक्षणेन, धिनोतु वः शात्रवरक्षणेन ॥ २७ ।

अव०—याऽर्हतां शासनभासनाय सना सदा प्रह्वाशया सावधानचित्ताऽस्ति, सा गीर्देवता सरस्वती शात्रवो रिपवस्तेषां रक्षणं त्राणं तेन कृत्वा वो युष्मान् धिनोतु प्रीणातु । या कथंभूता ? यशसा पूर्णं भृतं नभो व्योम यया सा । आढ्या समृद्धा । केन प्रवरक्षणेन प्रधानो ( त्सवे ) न जा ( तावेक ) वचनम् ॥ २७ ॥

॥ इति श्रीसीमन्धरजिनस्तवः सावचूरिः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# शुद्धिपत्रकम्

| पत्राङ्कः | पृष्ठाङ्कः | पङ्क्तिः | अशुद्धम् | शुद्धम्. |
|---|---|---|---|---|
| १ | १ | ४ | धन० | घन० |
| १ | २ | १ | पुं–रूपाणा | पुं–रूपाणां |
| १ | २ | ३ | कृत्वेत्यथः | कृत्वेत्यर्थः |
| ४ | २ | १ | मासेन | मांसेन |
| ११ | १ | १ | समवण० | समवर्ण० |
| १३ | २ | ९ | अवेगड्डुरिकार्याः | अवेर्गड्डुरिकायाः |
| २४ | १ | ४ | याञ्चा. | याञ्ञा. |
| २८ | २ | ६ | विपरीतमञ्जरि० | विपरीतमञ्जरी० |
| ३० | २ | ९ | दुर | डुर् |
| ३० | २ | ९ | दित्य० | डित्य० |
| ३१ | २ | १ | ता | तां |
| ३६ | १ | ५ | मुमते | सुमते ! |
| ४२ | १ | ७ | निखिला, | निखिलाः |
| ४३ | २ | ७ | विस्तीर्णहृः | विस्तीर्णहृ– |
| ४५ | २ | १ | तेषा | तेषां– |
| ५१ | १ | १ | तृप्तिकृत– | तृप्तीकृत– |
| ५२ | १ | २ | मोहमहिध्र० | मोहमहीध्र० |
| ५५ | २ | १० | स्ततीयः | स्तृतीयः |
| ५७ | १ | ६ | गोरि | गौरि– |



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

| पत्राङ्कः | पृष्ठाङ्कः | पङ्क्तिः | अशुद्धम् | शुद्धम्. |
|---|---|---|---|---|
| ६२ | १ | ९ | लक्ष्मीवणा | लक्ष्मीवर्णा |
| | २ | १ | वीरवाचा | वीरवाचं |
| ६३ | १ | २ | नेहसां | नेहसा |
| ६४ | २ | १२ | अर | अर् |
| ६६ | १ | १४ | परिभमति | परिभमन्ति |
| ७० | १ | १ | कदर्न्पेण | कन्दर्पेण |
| ८२ | २ | ५ | कलपावदं | कल्यावदं |
| ८३ | १ | ९ | कपूर० | कर्पूर० |

Published by Venichand Surchand, Secretary Shri Yashovijay Jain Sanskrit Pathashala, Mhesana.
Printed by R. Y. Shedge at the "Nirnaya-sagar Press," 23, Kolbhat Lane, Bombay.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीस्तोत्ररत्नाकरद्वितीयभागः सटीकः ॥

For Private And Personal Use Only